विद्यावाचस्पति श्री श्री शंभुलिंगेश्वर

विजयचंपू :

श्रीमच्चन्द्रमहेन्द्रमुख्यविलसद्वन्दारु[1]वृन्दारका-[2]
ली[3]वृन्दारकवृन्दवन्दितपदद्वन्द्वारविन्दश्रियम् ।
स्यन्द[4]द्दानपयोमरन्दकणिकापानोत्कपुष्पंधया-[5]
मन्दानन्ददसिन्धु[6]राननमहं वन्दे परं दैवतम् ॥ १ ॥

स्वस्तिदं भुवि समस्तजीविना-
मस्तदूषणमपास्तसंकटम् ।
निस्तुलं च कविभिस्तुतं सदा
वस्तु हस्तिमुख[7]मस्तु नः श्रियै ॥ २ ॥

स्वस्तरू[8]पममुपस्थितार्थिनां
ध्वस्तपापमपहस्तितासुरम्
सुप्रशस्तममरैश्च शस्तदं[9]
वस्तु हस्तिमुखमस्तु वो मुदे ॥ ३ ॥

---

1) वन्दारुः - वन्दनशीलः. 2) वृन्दारकाली - देवसमूह.
3) वृन्दारकाः - श्रेष्ठाः, 4) दानपयः - मदोदकम्, 5) पुष्पन्धयाः - भ्रमराः, 6) सिन्धूराननः - गजाननः, 7) वस्तु हस्तिमुखं - गणपतिः, 8) स्वस्तरुः - कलपवृक्षः, 9) शस्तदं - सुखप्रदम्

केलीधूलीकृताशेषव्यालीक्रूरासुरावली ।
काली शूलीश्वरालीढतनुर्वस्तनुतां शिवम् ॥ ४ ॥

पादाम्भोजनमच्चतुर्मुखकुटुम्बिन्यम्बुजावासिनी–[1]
जम्भारातिनितम्बिनी[2]मुखदिवोदेवीकदम्बा[3]र्चिताम् ।
जृम्भद्दम्भनिशुम्भशुम्भदनुभूकुम्भीन्द्रसम्भेदिनीम्
अम्बां शम्भुहृदम्बरेन्दुकलिकां सिंहोरुसत्वां भजे ॥ ५ ॥

गिरीशहृत्करीन्द्रस्य
वारी[4] नारी शिवंकरी ।
भवसिन्धुतरी[5] गौरी
नरीनर्तु हृदन्तरे ॥ ६ ॥

लोके यस्तु विषादिता[6]मुपगतोऽप्यानन्दपूर्णः सदा
स्थाणु[7]र्यद्यपि सर्वलोकफलदः सर्वज्ञ इत्यर्चितः ।
कामं काममभावयन्नपि सतीश्लिष्टो भुजंगा[8]वृतः
भूत्यै चित्रविचित्रचारुचरितश्चोग्रो[9]ऽपि सौम्यः शिवः ॥ ७ ॥

आपन्नाखिल पापपर्वतकुलव्यापादनारूपिणि
व्यापारे कुलिशास्त्रकौशलभृतस्तापार्तिचिन्ताछिदः ।
भालब्रह्मलिपिं च येऽन्यथयितुं शक्ताश्च भक्तावलेः
श्रीमद्रेणुकपादरेणुकणिका नः श्रेयसे भूयसे ॥ ८ ॥

---

1) अम्बुजावासिनी - लक्ष्मीः, 2) जम्भारातिनितम्बिनी - शची,
3) दिवोदेवीकदम्बः - स्वर्गीयदेववनितासमूहः
4) वारी - गजबन्धनस्थली, 5) तरी - नौका, 6) विषादिता - विषण्णता शिवपक्षे विषभक्षकत्वं, 7) स्थाणुः - शुष्कवृक्षः शिवश्च
8) भुजङ्गः - सर्पः विटश्च, 9) उग्रः - शिवःक्रूरश्च

पावित्र्याच्छवचःप्रवाहसुयशोगम्भीरिमस्वच्छता-
लोकोद्धारकतादि सद्गुणगणैर्मन्दाकिनीं मन्दयन् ।
शिष्याणामुपदर्शयन् सुचरितादर्शं निजाचारतः
सच्छास्त्राद्युपदेशतश्च भगवान् श्रीरेणुकार्यो मुदे ॥ ९ ॥

श्रीरेणुकाचार्यमुनीन्द्रवर्य-
श्रीपादरेणोः कणिकाः पुनन्तु ।
ये तीर्थसार्थस्य विलोपयन्ते
पापापनोदक्षमतावलेपम् ॥ १० ॥

आचार्यत्वं हि यत्रैव
पर्याप्तं रेणुकं स्तुमः ।
आर्यत्वं ज्ञानि धुर्यत्वं
योगिवर्यत्वमेव च ॥ ११ ॥

इंद्रियस्थैर्यगाम्भीर्य-
दानौदार्यमुखा गुणाः ।
वाक्श्रीचातुर्यमाधुर्य-
धुर्या यत्र व्यवस्थिताः ॥ १२ ॥

वेदान्तदेशिकं[1] वन्दे
सर्वशास्त्रोपदेशकम्
सूर्यालयम्बुजसूर्यं[2] श्री-
रेणुकाचार्य योगिनम् ॥ १३ ॥

---

1) देशिका.- उपदेशकाः, 2) सूर्यालयम्बुसूर्यं - सूरीणां पण्डितानाम्
आल्याः समूहरूपस्य अम्बुजस्य विकासने सूर्यायितमित्यर्थः

नामं[1] नामं गुरुस्तोमं
कामं क्षेमंकरं हरम् ।
शम्भुलिंग शिवाचार्य-
वृत्तचम्पूं समारभे ॥ १४ ॥

बलिनाद्य हन्त कलिनाऽकुले कुले
महतां क्षितौ च वसतां सतामपि ।
प्रमुखेषु धर्मविमुखेषु दुर्दशां
त्रिदशार्चितापि सुरभारती गता ॥ १५ ॥

पदबन्धुराणि रससुन्दराणि च
स्तवनानि कुत्र कवनानि संस्कृते ।
क्वचनापि काव्य रचना न दृश्यते
मरुतां[2] वचोम्बु[3]मरुतामि[4]ता मही ॥ १६ ॥

लक्ष्मीकटाक्षविषयत्वमिहाधिगंतु-
मांग्लीप्रशिक्षणमनुक्षणमभ्यसत्सु ।
सर्वेषु भारतजनेषु सुपर्ववन्द्या[5]
गीर्वाणवाग् भजति शोच्यतमामवस्थाम् ॥ १७ ॥

सद्यस्फूर्तिसमुद्यदुक्तिरचनावैदग्ध्यवैशद्यतो
गद्यं संस्कृतवाचि पद्यमपि वा निर्मातुमेकैककम् ।
वैशारद्यमिहाद्य न क्वचिदहो श्लाघ्यं पुनर्विद्यते
गद्यालीयुतपद्यबद्धरसवच्चम्पूकृतेः का कथा ॥ १८ ॥

---

1) नामं नामम् - पुनः पुनः नमस्कृत्य 2) मरुतां - देवानाम्
3) वचोम्बु मरुताम् - (देवानां) वचः संस्कृतवाग् एव अम्बु जलं तस्य मरुतां मरुस्थलताम्, 4) इता - प्राप्ता, 5) सुपर्ववन्द्या - देववन्द्या

स्वभाषाज्ञानदुर्भिक्षे
रससन्दर्भगर्भिताः ।
नाविर्भवन्ति कृतयः
कृतिनो यत्र तादृशाः ॥१९॥

किंत्वस्मिन् संस्कृतज्ञान–
मरुभूते महीतले
एकैवास्ति चक्रास्त्यत्र
संस्कृतज्ञानवाहिनी ॥२०॥

जम्बुकण्डीपुरीसीम्नो
नातिदूरतरे गिरौ
रसोर्मिसंभृतं भाति
ज्ञानामृतसरोवरम् ॥२१॥

शम्भुलिंगशिवाचार्यो
ज्ञानमेरुर्महागुरुः
जंगमज्ञानकोशोऽयं
भाति विद्यास्वयंवरः ॥२२॥

साहित्ये सरसार्थसुन्दरतरे पाण्डित्यमेतद्यतेः
सच्छास्त्रेषु विशिष्य गीष्पतिसमं वैदुष्यमस्याद्भुतम्
गद्यावद्यविहीनपद्यरचनासौविद्यविद्योतितो
नान्यः कश्चन विद्यते कविवरो नेदृक् सुधी नो यतिः ॥२३॥

पाण्डित्यं मणिकारपाणिनिपतञ्जल्यादितुल्यं गुरोः
बाणश्रेष्ठमयूरमाघजयदेवेड्यं कवित्वं पुनः
कर्णौदार्यपरार्थकार्य जनतोद्धारोपकारान् गुणान्
दृष्ट्वा कस्य जडस्य चापि कवितास्फूर्तिर्भवेन्न स्तुतौ २४

जडधीरहं तु मृडधीगुरोर्महा–
गुणकृष्टमुष्टपरितुष्टमानसः
महिमाविवर्णयिषया प्रचोदितः
सुरवाक्प्रबन्धकृतिचापलोद्यतः ॥२५॥

गुरुराट् स्वयं हि कविराट् सुसंस्कृते
चरितं प्रभावभरितं तदस्य तु
उचितं भवेद्धि रचितं दिवो गिरा
तदहं यते[1] कवियतेः प्रवर्णने ॥२६॥

क्व क्लिष्टा संस्कृतं भाषा
क्व चम्पूः श्लिष्टबंधुरा
क्व चाहं जडधीर्मन्दः
जाड्यादेवोपपद्यते ॥२७॥

मंदोऽप्यनास्वादित काव्यगंध–
श्चम्पूप्रबन्धोपनिबन्धनोत्कः
हा स्यामहं पङ्गुरिवोपहास्यः
विन्ध्याद्रिमुल्लङ्घितुमुद्धताङ्घ्रिः ॥२८॥

अथवा गुरुचरणानां
करुणाकिरणाः पुनः
प्रेरणाकारणानीह
न संकल्पो ममाल्पकः ॥२९॥

अनूरुररुणो व्योमायाममुल्लङ्घतेऽन्वहम्
पतङ्गस्यैव[2] नो पङ्गोर्महिम्नो गरिमा हि सः ॥३०॥

1) यते - प्रयत्नं करोमि, 2) पतंगः - सूर्यः

प्रेरकः कारकश्चात्र
गुरुरेव न संशयः
अहं तु लिपिकारोऽस्मि
ममकारो न मेऽप्यणुः ॥ ३१॥

अणुर्वापि कणो वाऽत्र
गुणश्चेत्सा गुरोः कृपा
दोषाः शेषा ममाज्ञत्व–
विशेषा इति भाव्यताम् ॥ ३२ ॥

प्रारम्भे जगदालम्बे
लम्बोदरपदाम्बुजे
शिवाचार्यचरित्राख्यां
चम्पूं नत्वाऽरभे पुनः ॥ ३३ ॥

भारताभिधभूमातुः कर्णाभरणभूषणम् ।
कर्णाटकाख्यदेशोऽयं भूयटे भातिशो भया ॥

अस्ति खलु समस्तोच्चावचवस्तुविस्तारप्रशस्ता सुरासुर नर किन्नरादिनिकुरम्ब[1]समभिशस्ता कौस्तुभकोहिनूरसदृशनैकनिस्तुलरतप्रस्तर प्रकराकर[2]निकरोदारोदरसार्थकीकृतवसुमतीत्यभिधाना विश्वविश्वम्भरा[3]-वलयकुवलयकर्णिकारालंकारभूता प्रभूततरतीर्थक्षेत्रदेवमन्दिरादिपुण्यस्थल पवित्रीकृतधरित्रीतला भावुकास्तिकधार्मिकजननिर्वर्त्यमाननित्य नैमित्तिक नानाधर्मकर्मदानदक्षिणाद्युत्कटपुण्यकोटिविपाटितपापपटलीसमुच्चाटित-कलिकाटवावतारितकृतयुगप्रकृताविकृतसुकृतराशिदोधूयमानसदातनधर्म-विजयवैजयंतिका खेलालोलानिलवालातिलीलालालितोत्तालितोल्लोल-कल्लोलकुल्कुल्कलालापवाचालवीचीमालाजालशीलितक्षालितसागरकूला नुकूलपरिखापरिवृता मेरुमन्दरहिमधरमाहेन्द्रविन्ध्याद्रिसह्याद्रिप्रमुखनैक कन्दरिवृन्ददेवमन्दिरसुन्दरनानाकन्दरशिखरसन्दोहवन्धुरा अमरावतोयशः पटलपटभेदनपटुतरासंख्यपुटभेदन[4]सुषुमाशालिनी विविधकुटीरधामाराम स्तोमरमणीयापरिमितग्रामग्रामा[5]भिरामा अगणितवनोपवनप्रवृद्धफलपुष्प समृद्धकुन्दमन्दारमाकन्दश्रीगन्धपिचुमन्दनन्द्यावर्तकुरविन्दबन्धूकहरिचन्दन-श्रीचन्दनकर्कन्धूस्यन्दनकन्दरालकिंशुककोविदारकपित्थश्वत्थतिन्त्रिणीप्ल-क्षादिलक्षलक्षवृक्षराशिलक्षितवक्षस्थला मालतीमाधवीशेवन्तिकाशेफालि काचम्पकजाजिकमलकल्हारकुरवककेसरमल्लीप्रभृतिवल्ली[6]मतल्लीवेल्लित मञ्जुलताकुञ्जाग्रसम्फुल्लसुरभिसुमसन्दोहस्यन्दमानामन्दमकरन्दबिन्दुपान मुदितमिलिन्दवृन्दसानन्दांगीक्रियमाणसंगीतभंगीमञ्जुलगीतगुञ्जारवरंजित

---

1) निकुरम्बं-समूहः, 2) आकराः-खनयः, 3) विश्वविश्वम्भरा-समस्तपृथ्वी, 4) पुटभेदनं-पत्तनं, 5) ग्रामग्रामः-ग्रामाणां समूहः
6) ...

रसिकपान्थपुञ्जा गङ्गागोदावरीगण्डकीगोमतीयमुनानर्मदाकृष्णाकावेरी प्रमुखपुण्यपयस्विनीपाथःप्रवाहतरलतरङ्गसंघाप्लावितपाविताप्यायितक्षेत्र सार्थप्ररूढप्रभूतधान्यराशिसंतृप्तजानपदपौरजननिबिडा संस्कृतभाषा परिपोषितप्रसूतबहुभाषाभाषिमानुषकोटिसमध्युषिता आसेतुशीताचल प्रसृतविशालदेशावकाशविकसितवैदिकसंस्कृतिसुवर्णसूत्रसन्दानित विविध-धर्मसम्प्रदायाचारविचारप्रचुरनानाजातिमतानुसारिभिन्नभिन्नमनुजकुलाधि ष्ठिता विश्वमानवताभावैक्यस्नेहसामरस्यजातीयसौहार्दधर्मसहिष्णुता सहजीवनमिथोमैत्र्यादिसद्गुणबीजभूमिः सकलाविकलकलाकलापकलम मञ्जरीकेदारायमाणा पत्तनपल्लीवितायमानहोमधूमस्तोमामोदामोदमेदुर सुमनःसमुदयमनःसमुदयद्दयासौमनस्यनिसृष्टसुवृष्टिफलितसस्यसमृद्धिप्रश स्या सर्वलोकनमस्या नरकुलतपस्यापचेलिमफलायमाना धरादेवीकंधरसुन्द रहारिहीरहारायमाणा च शोशुभीति भारतवसुन्धरा विश्वज्ञानोपदेश धुरंधरा ।

सर्वेऽपि देवा ननु पूर्वदेवा
महर्षयोऽपूर्वमहीसुदेवाः
प्रजज्ञिरे यत्र निजां जनिं च
विजज्ञिरे सार्थकतामुपेताम् ॥ ३४ ॥

वितानानां वितानानि
वितन्वन्तो नराः पुरा
सुरतां सुरतन्वङ्गी-
सुरतं चापुरन्विताः ॥ ३५

निष्कारुण्यजघन्यदुष्कृतिकरव्रात्याग्रदैत्यावली-
दुर्दात्यूहसमूहभूरिभरतो भ्रश्यद्विनश्यद्भुवः
नित्यापत्तिनिवारणाय हरेणा सर्वावतारा अपि
यत्रान्यत्र न कुत्रचिद् भगवता प्रेम्णा कृता नो धृताः ॥३६॥

यद्गोत्रोत्तरसद्गोत्र–
पुत्रीमुद्वहच्छिवः
सगोत्रामपि यत्स्नेहात्
कालीं शैलीमुमामपि ॥ ३७ ॥

यत्र च सन्ति वसन्ति विलसन्ति सन्तो महान्तःअधीतब्रह्माणः अधिगत ब्रह्माणः ब्रह्मर्षिसब्रह्मचारिणः ब्रह्माणीस्वयंवृतवरा विद्वत्प्रवराश्‍च ब्राह्मणाः, राजन्ते प्राणान् पणीकृत्य तृणीकृत्य च क्षतात्नृणां परित्राणं कुर्वाणाः खल कुलकानकृपाकृपणकृपाणाः विहिंसितनृशंसा क्षत्रियावतंसाः, भ्राजन्ते च नैपुण्यनिर्वर्तितवाणिज्यव्यापारोपार्जितप्रभूतसंपद्विलोपितकौबेरावलेपाः परोपकारार्थंवितीर्णसर्वार्थाः निस्वार्था स्साधितपुमर्थाः सर्वसमर्थाः सार्थवाहसार्थाः, भासन्ते च परिश्रमसेवाभावकृषिकर्मादिविद्रावित देशोन्निद्रदारिद्र्याः गुणसमुद्रा विनयमुद्राश्च शूद्राः समाराधितरुद्राः

कष्टाकृष्टिविमर्दितातिमृदुलतक्षेत्रोप्तसंवर्धितो–
द्यत्सस्योदितधान्यजातजगतीकुक्षिम्भराः श्रीकराः
शश्वद्भूरिपरिश्रमोद्गतबहुस्वेदार्द्रकेदारकाः
यत्रालस्यविवर्जिता हि जनताहृद्हर्षकाः कर्षकाः ॥४८॥

अर्चासुन्दरदेवमन्दिरमठप्राकारकाभ्रङ्कषा–
ट्टालीगोपुरभर्म्यहर्म्यपटलीनिर्माणकर्मोद्धुराः
आकल्पस्थिरशिल्पकल्पनकलानल्पाच्छवास्तुक्रिया
वास्तोष्पत्युपमा हि जक्कणजितो यत्रासते शिल्पिनः ३९

वीणावेणुमृदङ्गवादनकलावैदग्ध्यविद्योतिताः
शृङ्गारादिरसोत्तरङ्गलयवत्सङ्गीतपारङ्गताः
चञ्चच्चारुविचित्रचित्ररचनाचातुर्यधुर्या नराः
यत्रैवाऽप्रतिमल्लमल्लनृमतल्ला उल्लसन्त्यन्वहम् ॥ ४० ॥

यत्र च श्रिय इव उल्लसच्छ्रियः शारदा इव विशारदाः आर्या इव आर्याः अनसूया इव अनसूयाः अरुन्धत्य इव पतीननुरुंधत्यः पाञ्चालिका इव विजयोत्साहवर्धिन्यः, जनकतनया इव रामाभिरामाः अहल्या इव सौन्दर्याकर्षितसहस्रलोचनाः सुरभय इव सन्तर्पितकामाः वनदेवता इव जनितामोदाः रतिरूपिण्यः सतीगुणिन्यः मैत्रेयीमनीषिण्यः सती शिरोमण्यः मङ्गलस्वरूपिण्यः अगण्याः अङ्गनाः पुण्यदेवीभूता आनन्दसन्दायिका नन्दनीकुर्वन्ति अवनीतलमपि।

पुरुषा अपि यत्र अपरुषा अपरुषस्वभावाः स्वभावानुभाव प्रभावावर्जितसुहृन्मंडलाः परोपकारपरायणाः धनधान्यादिदान-दत्तदीक्षाः शमदमदयादाक्ष्यदाक्षिण्याद्यगण्यपुण्यगुणमण्याभरणायिताः श्रीरामा इव भरतानुरागिणः श्रीकृष्णा इव सत्यालापतत्पराः भीमादिपाण्डुनंदना इव धर्मानुसारणबद्धदीक्षाः श्रीकंठा इव शिरसादृतकलाधराः काव्य कलापा इव सद्वृत्तशोभिताः सुरलोका इव प्रशांतसुमनसः माण्डव्य कथा इव यमनियमसंन्तताः याज्ञिकविधय इव शांतिप्रधानाः करिकलभा इव दानवर्षिणः ब्रह्मशरीरा इव सत्त्वोद्रेकविभाविताः प्रकृत्या सम्भाविताः सनातनसंस्कृत संस्कृति प्रभाविताः प्रभासंते ।

तस्याश्च कर्मभूमिरिति प्रथिमानं धर्मभूमिरिति महिमानमनुपमानमेव संमानं च समासादितवत्या भगवत्या भारतक्षित्या अत्युज्वलकर्णकुण्डलमण्डनतामुपयाति अखण्डमिदं कर्णाटकमहीमण्डलं यद्वैभवसमुपवर्णने चक्षुष्कर्णकुलचक्रवर्त्यपि न प्रभुः प्रभवति। अङ्घ्र्यादिशृङ्गोत्तमाङ्गपर्यन्तं यदङ्गाङ्गांगणमङ्गल भूभागमाप्लावयन्ति पावयन्ति च तुङ्गादितरङ्गिण्यः त्वङ्गत्तुङ्गतरङ्गभङ्गैः कृतदुरितभङ्गैः। कलिकालकलितकल्मषकूटविपाटनपटुतरकृपाणी विविधवेणीप्रवाहपाथःपूरपूरितक्षोणी-कोणीकोणीसंवर्धितधान्यद्रोणीश्रेणीसन्तर्पितसर्वप्राणिगणसंकुला कृष्णवेणी चास्य कर्णाटदेशस्य हृदयालवालप्रेमपीयूषरस्यरसायमानरसा आसह्यशैलमूलं श्रीशैलशैलशिखरं यावदाल्हादयति यावज्जनान् कृतमज्जनान् कलितपयःपानांश्च। आप्याययति कूलानुकूलसञ्चरणचञ्चुरचञ्चलचरणान् पशुगणान्। आमोदयति च सामोदतटपुटावटपटुतरनटायमानवातविधुतविकटविशङ्कटविटपपटलपटपटायमानविविधविटपिकोटिकोटीरकोटिसमाटीकमानविहङ्गसङ्घम्।

एवं सवेगसलिलौघप्रवाहव्यूहपातावघातविदारितसह्यकन्दरिदरीदृश्यमानदरीकंदरोदरसुन्दरायाः शरवेगवत्याः शरावत्या जोगादिजलपात-समुत्पादितविद्युज्जालोद्दीपितदीप्रदीपनिकुरम्बैः प्रतिग्रामारामं प्रतिमठमन्दिरं प्रतिवर्त्मचत्वरं प्रतिविपणिवीथीवितर्दिकावलभीविटङ्काङ्गणं च चञ्चच्चारुचन्द्रशावकैरिव अवतारितैः जगदण्डमण्डलमखिलमेव शरज्योत्स्नाजालजटालमिव हारनीहारहारिहराट्टहासभाभासितमिव स्वयंप्रकाशासङ्ख्यज्योतिष्टोमप्रसृमरप्रकाशपुञ्जपिञ्जरितमिव च समाकलयन्ति यत्रत्याः विज्ञानविद्याप्रज्ञानिनः,। यत्र च प्रवहन्तीव अगस्त्यमुनितपःपरम्परा दक्षिणदेशपुण्यसम्पदिव पयोरूपेण क्षरन्ती कवेरकुलकीर्तिपताकेव दोधूयमाना कलिकालकलितकृच्छ्र कलुषकदम्बकरालकरवालायितकीलालधाराधरा कावेरी कुशलकर्मिनिर्मितसहस्राधिककुल्यानालीजालजलार्द्रीकृतकेदारकलममञ्जरीजरीजृम्भमाणा राष्ट्रस्य धान्यकोषं करोति सदासमृद्धिसमेधितम्। एवमेव मनुजकुलमलोन्मूलनकलाकुशला

मलापहा, पापघटाविघटनपटीयसी घटप्रभा, जलतरङ्गशीकरासारार्द्रीकृत क्षेत्रमृदुमृद्वती कुमुद्वती, पिपासितपशुपक्षिपुरुषवारिवरदा वरदा अन्याश्च पुण्यपयोधन्याः मानवलोकमान्याः सत्कविकविता इव रसोत्कर्ष शालिन्यः वनिता इव चञ्चच्चारुपयोधराः महात्ममनोवृतय इव विमलाशयाः साधुपुरुषप्रवृत्तय इव गाम्भीर्यगहनाः वैदर्भीरीतय इव प्रसादभूयिष्ठा अम्बिकावतारा इव गिरीशधृतजनुषः हरतनव इव लसद्विषधराः मोहिनी लीला इव स्वाश्रितामृतवितरणनिपुणाः यात्रिका इव नैकक्षेत्रानु धाविन्यः पीठाधिपतियतिचर्या इव तीर्थपावितनैकलोकाः अभंगा अपि भङ्गान्विताः जडात्मानोऽपि सरसाः पङ्काढ्या अपि पावनाःअनुकूल प्रवाहा अपि प्रतिकूल प्रवाहा दशावतारकथा इव मत्स्यकूर्मादिलीलाभा सुराःस्वादिष्ठपयःपूरपरीताःशुक्तिशङ्खपुलिनवेतसादिवितानभरिता नैका एव सरितः रसार्द्रतामापादयन्ति कर्णाटक भूमातुरन्तरङ्गम् ।

यत्र गोकर्ण श्रीशैल हरिहरेश्वर शृङ्गेरी रम्भापुरी पम्पादि परमेश्वर दिव्यसन्निधिसन्निधिसन्नुतानि शताधिकान्येव शैवक्षेत्राणि उडुपि सुब्रह्मण्य शूर्पालय तोरवी गदग बलूरु मेलुकोटि श्रीरङ्गपट्टण कनकगिरि वेंकटाचलादीनि च भगवतः खगकेतनस्य निगमागमोक्तागणितस्वरूप प्रतिरूपप्रतिष्ठानसविशेषसन्निधानशोभीनि वैष्णव क्षेत्राणि, मन्त्रालय मेलुकोटि शृंगेरी धर्मस्थल श्रीशैल प्रभृतीनि गुरुस्थानानि च अखिल भारतभूभागसम्भूतसकलभक्तभावुकयात्रिकलोकानामत्यादरपात्राणि यात्रा क्षेत्राणि विलसन्ति । बदामि हळेबीडु हम्पी ऐहोळी पट्टदकल्लु गदग लक्कुंडि मंसूरु बलूर प्रभृति पट्टणग्रामेषु कर्णाटक प्रान्तीयैः वास्तुविद्याविदग्धैः मूर्तिशिल्पकलाकुशलैः स्थपतिभिः चित्रकारैः तक्षकैश्च निर्मितानि सूक्ष्मातिसूक्ष्माणि महामहन्ति च प्रस्तरखण्डविस्तारित वास्तुशिल्पानि, बृहच्छैलखण्डस्य अखण्डैकगण्डशिलायामुत्कीर्णाः कौशल्य पूर्णाः दिव्यभव्या गुहाः, अतिसुन्दराणि देवमन्दिराणि, सौन्दर्येण अप्रतिमाः प्रतिमाः, स्फुरच्चैतन्यस्फूर्तय इव देवतामूर्तयः, आश्चर्यस्तंभित प्रेक्षककदम्बाः, स्पर्शनक्षण एव समुदञ्चतसप्तस्वरारम्भाः उत्तम्भित

स्तम्बेरममुस्ताविडम्बा विचित्रस्तम्भाः, सञ्चुम्बितसुरपुरपुरन्ध्रिकापादनूपुरा गोपुराः, चित्रविचित्राणि शैलशिलोट्टङ्कितानि दक्षिणोत्तर-शिल्पशैलीकौशलीसमुन्मीलितचञ्चत्पाञ्चालिकाविविधभावभङ्गीहृदयंगमदृश्यचित्राणि, रामपादमहिमानीव जीवभावापादितपाषाणानि, पशुपतिचरितानीव शैलबालिकाहावभावभरितानि, नन्दनवनानीव अम्लानकुसुमोपशोभितानि, सुरलोक संस्थानानीव अमरशिल्प समुल्लसितानि, गगनमण्डलानीव चन्द्रार्कस्थायीनि, देवेन्द्रस्थानानीव जीवकला प्रशस्तानि, टङ्कोद्भासितान्यपि विटंकोद्भासितानि, भिन्नान्यपि पूर्णानि, सूक्ष्मान्यपि महत्वभाञ्जि, पङ्कजवनानीव सहस्रकरोन्मीलितानि, राकाशशिबिम्बानीव संपूर्णविकसितकलानि अविकलानि सकलान्यपि कलाकौशल्यपराकाष्ठोपस्पृष्टवास्तुकृत्यशिल्पानि मोदयन्ति प्रेक्षकान् विस्मापयन्ति विमर्शकान् सहस्रशश्च आकर्षयन्ति वैदेशिकरसिकान् संप्रीणयन्ति यात्रिकान्, रोमाञ्चयन्ति शिल्पशास्त्रविचक्षणान् उन्नमयन्ति च कर्णाटकमातुः प्रतिष्ठाशिरःकिरीटम्।

कीर्त्या विश्वकर्णाटेऽस्मिन्नेव कर्णाटके हन्त अनन्ता एव सन्तो महान्तो धीमन्तः सन्ति समुल्लसन्ति स्म च मताचार्या वसिष्ठा इव वशिष्ठाः विश्वामित्रा इव विश्वमित्राः शक्तय इव प्रसादितशक्तयः कश्यपा इव काश्यपीभूषणभूता बोधायना इव बोधायनतामहिनाः सुयज्ञा इव सुयज्ञाः अत्रय इव अनसूयान्तरङ्गप्रतिष्ठिताः सन्ततानुष्ठित जपतपोनुष्ठान परिपूतात्मानो महात्मानः।

यत्राचार्यकुलार्यतामुपगता अध्वर्युतां योगिनां
विद्वन्मण्डलवर्यतामपि तपःस्वाध्यायिनां धुर्यताम्
प्राथम्यं प्रमथेषु चाप्य विगतौपम्याः प्रणम्याःक्षितौ
श्रीमद्रेणुकपूज्यपादमहिताचार्या अभूवन् पुरा ॥ ४१ ॥

शिवाप्रियत्वमापन्ना अपि सर्वज्ञमूर्तयः
शङ्करा अपि ये नोग्रा निष्कलङ्काः कलाधराः ॥४२॥

समुद्धृत गिरीशाना ये सदानन्दिनोऽमलाः
विभूतिभासिताङ्गाश्च साक्षाच्छ्रीवृषभर्षभाः ॥ ४३ ॥

एवं यमेव कर्णाटकप्रदेशं स्वकार्यक्षेत्रं विधाय सकललोकशिवंकरा बौद्धवादभयंङ्कराः खंडितनास्तिकाहंकारा ओङ्कारा इव सर्ववेदार्थ प्रतिपादकाः शिवधनुष्टङ्कारा इव दक्षविपक्षविदलनदीक्षिता नागा इव उज्झितभोगाः कण्ठालङ्कारा इव मुक्ताहारोल्लसिताः कलमाङ्कुरा इव भारतक्षेत्रसमृद्धसम्पद्भूताः कुबेरकिङ्करा इव विभूतिभासुराः श्वेतवराहा इवसर्वगोत्रोद्धारकाः कैलासपर्वताइव शिरसाधृतादृतगङ्कराःसाक्षाच्छंकरा वतारत्वेन प्रथिताः शंकराचार्या अपि समग्रभारत एव अतिप्रवृद्धं प्रसिद्ध च बौद्धमतमुद्ध्वस्य उद्दध्रुः वेदोक्तं शुद्धतरमध्वानमद्धा विद्वद्धौरेयाः ।

द्विजन्मनां मूर्धसु पावकाः शिखा होमीयकुण्डेषु च पावकाः शिखाः
सद्ब्रह्मसूत्राणि भुजेषु विप्रमुखेषु सुस्थानि च यन्महिम्ना ४४

त एते पाखण्डादिवण्डदुर्मतषण्डखण्डनपण्डिता मण्डनमिश्रादि-मीमांसापण्डितवेतण्डमण्डलमतगण्डभेदनप्रचण्डपुण्डरीकाः मुण्डकुला--खण्डलाः वैदिकजनहृत्पुण्डरीकविकासकचण्डमयूखायमानाः श्रीमच्छ्री शङ्कर भगवत्पादाः केरळदेशधृतजन्मानोऽपि कर्णाटकदेशस्य महतीं महतीं निध्याय अत्रत्यामेव तुङ्गोत्तुङ्गोत्तरङ्गतरङ्गसङ्घात संघातसंघातिताघसंघां श्रृङ्गेरीं स्वतपोभूमिं कार्यक्षेत्रं च विधाय महासंस्थानं च संस्थाप्य इत एव सर्वसर्वसहायां स्वाद्वैतमतं प्रसारयामासुः ।

तथैव च श्रीमद्रामचरणाब्जषट्चरणाः सदावरणशास्त्रवारण देवपादपरिचरणपरायणाः श्रीरामानुजाख्याः शिष्टविशिष्टपण्डितश्रेष्ठ समभिष्टुताः सर्वजातिजनाङ्गसमुद्धारबद्धादराः विशिष्टाद्वैतमतसंप्रदाय-प्रवर्तकाचार्यपादाः देशांतरगृहीतजनुषोऽपि कर्णाटकमातुः हृदयस्थानाय मानं मेलुकोटिक्षेत्रमुपागत्य चिरतरमध्युष्य राजाश्रयमधिगत्य जनानुराग मासाद्य च श्रीवैष्णव सिद्धान्तं भारतभुवः कोणे कोणे प्रसारयामासुः ।

तथैव श्री मध्वमुनिनामानः भेदसिद्धान्तप्रसारणबद्धादराःविद्वद्धौरेयाः सुप्रसिद्धाः सिद्धपुरुषाः परशुरामक्षेत्रम् इति प्रथिमानमुपगते कर्णाटक-भूमातुः कर्णकुण्डलायमाने उडुपीमण्डले मध्यगेहनामक गृहस्थ लब्धजन्मानः सर्वत्रापि प्रसारयामासुः द्वैतदर्शनम् ।

एवं जैनादि नास्तिकमतान्यपि कर्णाटके लब्धप्रसाराणि अत्रत्यैरेव सकलशास्त्रपारदृश्वभिः विमतीयपण्डितमेघमण्डलविखण्डनविवासनोद्दण्डचण्डमातरिश्वभिः पण्डावत्पुण्डरीकैः विहितसर्वंकषसंस्कृतप्राकृत ग्रंथरत्नैः सार्वत्रिकप्रसारं सार्वकालिकं प्रचारं च समुपेत्य दृढमूलानि संबभूवुः ।

मुख्यतः परशिवपरमप्रसादासादनप्रधानसाधनानि, सर्वजाति जनोद्धारैकोद्देशानि, अतुल्यमपि कैवल्यं जनसाकल्यगोचरं सारल्येनैव संसाधयन्ति, प्रतिजीवं शिवभावं विकासयन्ति' भक्तिभागीरथीं प्रतिशरण हृदयक्षेत्रमवतारयन्ति आपामरामरं सर्वानपि संसारसागरात् तारयन्ति विश्वमानवधर्मव्यपदेशार्हतैकमात्रभाजनानि, रेणुकादिप्रमथगणाधीश्वर संमान्यसंमतिसौभाग्यधन्यानि, शुद्धानवद्यनिष्कृष्टसिद्धान्तशद्धैकतम-लक्ष्याणि साक्षात्कृतपरमेश्वरमहापुरुषपरिष्कृतानि निगमागमानुमतानि विवेकिपूर्वपुरुषसार्थानुसृतानि अत्रैव कर्णाटकभूखण्डे प्रसारं प्रचारं प्रतिष्ठां प्रशस्ति प्राधान्यं प्राबल्यं प्राचुर्यं च स्वयमनुप्राप्य अनादिकालत आरभ्य अद्य यावत् प्रसरंति श्री रेणुकादि प्रवर्तितानि वीरशैवादि प्रमुखसन्मतानि ।

एवमशेषगुणविशेषविशिष्टे महतो महिष्ठे महीयसां प्रेष्टे तेजीयसां प्रेष्ठे साधीयसां प्रकोष्ठे सकलकलाकामगवीगोष्ठे देशश्रेष्ठे कर्णाटके षट्शतवत्सरेभ्यः पूर्वम् उपहसितहस्तिनावती विविधधनधान्यमण्यादि व्यापारपरीवर्तसरीसरंत्सम्पज्झरीपरीभावपरीतसुरपुरी जरीजृम्भते स्म नगरी गरीयसी बिजयनगर नाम्नी राजधानी ।

पम्पार्धीश्वरसम्प्रसादबलतः सम्प्राप्तनिष्कम्पन-
श्रीसम्पत्तिपरम्परापरिवृतेयं पूश्च हंपीरिता ॥
या नीलम्पपुरीं विजित्य विजयाभिख्यस्वनाम्नः श्रिया
याथार्थ्यं च न् सम्प्रिपादयिषति द्युत्या स्म शम्पाभया ॥४५॥

यस्यास्तुङ्गपतङ्गमण्डलसमालिङ्गोत्कशृङ्गाट्टव-
सौधोत्सङ्गगताङ्गनापुरुषसल्लापश्च वाद्यध्वनिः
दूराद् भूमिगतैः क्वचित् श्रुत इहैत्याकाशवाणीप्रथाम्
प्राग्ग्रन्थेष च देवदुन्दुभिरिति ख्यातोऽभिगीतो बुधैः ॥४६॥

धर्मध्वसन धनोहसन महाहिन्दुत्वविस्रंसन-
क्षत्रभ्रंशनमूर्तिभञ्जनसतीभङ्गप्रसङ्गादिभिः
ख्यात्या नित्यकृतैः कुकृत्यशतकैर्दैत्याः कृतात्याहिता
यत्कीर्तिश्रवणक्षणे हि यवना भीत्या दिशो दुद्रुवुः ॥ ४७ ॥

हिन्दूसंस्कृतिरक्षण च यवनारिप्रस्थसन्धुक्षणे
चान्यायेक्षणतत्क्षणेऽखिलखलानां तक्षणे शिक्षणे
दीक्षादाक्ष्यधृतो जगद्धितकृतो धैर्योल्लसद्धीभृतो
यत्रासन् सुभटाः कलिप्रतिभटाः लक्षाधिका रक्षकाः ॥४८॥

गङ्गोत्तुङ्गतरङ्गभङ्गललदोतुङ्गान्तरङ्गस्थली-
रङ्गोत्सङ्गनिषङ्गिवातविधुताम्भः प्लाविते पाविते
श्रीपम्पापतिसन्निधानमहिते क्षेत्रे व्यधत्तामुभौ
हुक्को बुक्क इतीरितौ नृवरौ यस्याः प्रतिष्ठां पुरा ॥४९॥

शुष्कहृत्पुष्कलात्युग्र-
तुरुष्कस्त्तरापथे ॥
आक्रान्ते धर्मरक्षाय
यत्रालङ्कारभवद भाव ॥५०॥

विद्यारण्यब्रह्मतेजो
हुक्कसामर्थ्यमेलने
ब्रह्मक्षत्रियतेजःश्री—
सङ्गमाद् दुर्जयं ह्यभूत ॥ ५१ ॥

ब्रह्मक्षत्रियतेजोधीसङ्गमे हृदयङ्गमे
मग्ना भग्नास्तथोद्विग्ना यवनास्तद्बलं धनम् ॥ ५२ ॥

यवनात्याहितात्युग्र-
प्रवाहमरुतामितम्
मरुतामिव नो राज्यं
स्थिरतां यत्र चाभजत ॥ ५३ ॥

बलाक्रान्ते प्रान्ते हवनहतकैरुत्तरपथे
भिया वङ्गे चाङ्गे नमति च कलिङ्गेऽरिपदयोः
उदञ्चत्पञ्चत्वेऽन्विव पतति पाञ्चालवलये
महाराष्ट्रे भुग्ने लुठति पदि सौराष्ट्रविषये ॥ ५४ ॥

अहो काशीक्षेत्रे सुभृशमपवित्र गतकथेऽ
प्यनाथे सोम्नाथे पितृवनसमे मन्दिरगणे
गदाभग्ने लग्ने मृदि च निखिले मूर्तिनिवहे
रिपून् हत्वा याऽपाद् भरतवसुधां धार्मिकजनम् ॥ ५५ ॥

यद्गत क्षत्रचित्रता
हूणाः क्षीणायुषो द्रुताः
शकाश्च मशकीभूता
बर्बरा भयानर्भराः ॥ ५६ ॥

यवना भवनापाया
भवि नानार्तिपीडिताः

मरणं शरणं जग्मुः
चरणं वाऽ रणं ययुः ॥ ५७ ॥

वेदाश्च विगलत्खेदाः
मूर्तयश्च गतार्तयः
संस्कृतिर्विकृतिं हित्वा
यत्र प्रकृतिमागता ॥ ५८ ॥

धेनूनामसिधेनूनां
भयान्मुक्तिर्व्यजायत
अच्छेद्यं धर्मवर्माऽभूत्
शर्मणे सर्व धर्मिणाम् ॥५९ ॥

यद्राज्यरक्षास्थिरदत्तदीक्षा
वीरास्तुरुष्काक्रमणातिरुष्टाः ॥
औदास्यमादौ च ततोऽपि दास्यं
निरस्य राष्ट्रं व्यदधुः स्वतन्त्रम् ॥ ६० ॥

यद्राजधानीविलसद्भवानीहस्तादिवादाय महाकृपाणीम्
स्कन्दायिता वीरवरास्तुरुष्कस्कन्दा निजार्यातिमुदं वितेनुः ॥६१॥

तदेतद्विविधप्रकारप्राकाराकारचमत्कारकारिप्रासादचन्द्रशाला प्रत्युप्तचन्द्राश्मेन्द्रनीलपुष्यरागादिनानामणिमरीचिव्यतिकराविर्भावितेन्द्रचापकान्तिपुञ्जसञ्जनितगन्धर्वलोकभ्रान्तिकान्तमिदं नगरं शारदापीठ इति जिज्ञासुभिः तपोभूमिरिति मुनिभिः लक्ष्मीलास्यमन्दिरमिति वणिग्भिः व्यायामशालेति मल्लैः गुरुकुलमिति छात्रैः सङ्गीत रङ्गभूमिरिति रसिकैः अध्यात्मकेन्द्रम् इति भावुकैः कल्पवृक्षस्थानमिति याचकैः विलासवेदिकेति वेश्याभिः मुक्तिक्षेत्रमिति यतिभिः अदृष्टद्वारम् इति साहसिभिः भूस्वर्गं इति वैदेशिकैः विज्ञानरङ्गगृहमिति स्थपतिभिः

सर्वतोभद्रवज्रकवच इति शरणार्थिभिः अनङ्गरङ्ग इति भुजङ्गैः आस्थानमण्डप इति कविभिः पुण्याश्रम इति महद्भिः समासादितं समासेवितं समाश्रितं च बहुविधैः भिन्नभिन्नरुचिरसैर्विभिन्न प्रकृतिभिर्नरैः नारीभिश्च ।

तपोगरिष्ठैर्महिममहिष्ठैः श्रीविद्यारण्यमहास्वामिभिः वीर वरेण्य दीनशरण्य हुक्क बुक्केति नरवरसहकारेण पम्पापतिपरमानुग्रहभूम्ना च तुङ्गातरङ्गिणीतुङ्गतरङ्गसङ्घरिङ्गणरङ्गस्थलायमाने हम्पीक्षेत्रे सुप्रतिष्ठिते कर्णाटकसाम्राज्ये हुक्कराजादारभ्य श्रीकृष्णदेवराजपर्यंतं सर्वरिपुखर्वेतरगर्वनिर्वापणकर्मालङ्कर्मीणाः समेऽपि राजमहाराजा वात्सल्यमूर्तय औदार्यशेवधयः प्रजारञ्जनैकव्रताः सर्वधर्म प्रोत्साहकाः सकलभाषापोषकाः समस्तजातिमताचारपुरस्कारकारकाः निखिलकला कलापप्रवर्धनदक्षा धर्मपीठसुसंमानदत्तलक्षा वैनतेया इव सत्पक्षपातिनः सुरलोकपाला इव सुधर्मासनमण्डिता वसन्तवासरा इव सर्वजातिविकासा वकाशदायिनः कैलास प्रदेशा इव शैवागमधृतोत्साहाः श्वेतद्वीप नागरिका इव वैष्णवालोकनधन्याः प्रजाराज्यपौराः इव कृतगणपतिमर्यादराः उत्तानपादसन्तानाङ्कुरा इव सुनीतिमार्गानुसरणपरायणाः चतुर्मुख- मनोधर्मा इव आर्यभारतीबद्धप्रेमाणः चित्रपटा इव सकलवर्णरञ्जनभासुराः विमलजलाशया इव सर्वाश्रमोपकारका बभूवुः । अतएव तस्मिन् विजयनगरे शैव वीरशैव वैष्णव श्रीवैष्णव शाक्त कापालिक तान्त्रिक मीमांसक नैयायिकादि विविध जातिमतपथाचार सम्प्रदाय प्रवर्तका- चार्याणां मठपीठादि प्रतिष्ठा प्रारम्भत एवावर्तिष्ट राजाश्रयप्रोत्साह परिकर्मिता ।

।। श्री बृहन्मठस्य प्रागितिहासः ।।

एवं राजाश्रयबलात् कर्णाटकराज्ये राजधान्यां विजयनगरे च सममेव स्थेमानं प्रख्यातिभूमानं गौरवगरिमाणं राजप्रजाप्रेमाणं च सम्यगनुप्राप्तवत्सु महतां महत्सु गुरुपीठेषु समस्तमुनिसंस्तुतागस्त्या भिधकुंभीभुवो देशिकतः प्रपन्नरेवानित्यपरम्पर्यायरेणुक साम्प्रदायि आराध्य वीरशैव मतीयगुरुस्थल बृहन्मठोऽपि अन्यतमः धन्यतमः मूर्धन्यतमश्चासीदिति विदितमेव विदितवेदितव्यानां पुरावृत्तविदुषाम् । अयं च हम्पीविरुपाक्षदेवालयस्य रथवीथ्यां विराजमानः बृहन्मठ दासीकृतसर्वसिद्धिसमृद्धीनां वशीकृतसकलेन्द्रियाणां ईशाङ्घ्रिन्यासीकृत चेतस्कानां राशीकृतपुण्यसञ्चयानां कोशीकृताञ्जलिसुरसिद्धपूजितानां लेशीकृतभक्तजनार्तीनां भर्गानुग्रहसाक्षाद्विग्रहायमाणानांश्रीरेणुकगणाधीश्वराणां शुभसम्प्रदायपरम्पराप्राप्त इति कर्णाटकदेशीयसर्वभक्तजनानां तथा विजयनगरप्राज्यसाम्राज्यसार्वभौमसत्ताधिकारधौरन्धरीमाबिभ्राणानां समेषामपि राजपुरुषाणां श्रद्धाबुद्धिगौरवसातिशयादरप्रेमाभिम पात्रतामतिमात्रमयासीत् ।

शैवपीठेषु प्रकृष्टं वीरशैवपीठेषु ...नं श्रीरेणुकसम्प्रदायमठेषु महत्तरं गणाधीशसंस्थानेषु मुख्यतरं च तं बृहन्मठपीठमारुढेषु विद्वद्राजिशिरो-विराजिकरकुंडलराजिनीराजितचरण...जीवानां साक्षाद्विरूपाक्षकरुणा कटाक्षाभिलक्षितरक्षितानां पीठाधिपतीनां मध्ये अत्यद्भुतेन पांडित्येन अभूतपूर्वेण वैराग्येण लोकोत्तरेण महिम्ना असामान्यया तपःसिद्ध्या अनितरसाधारणेन शास्त्रज्ञानेन अतिविलक्षणया परमेश्वरभक्त्या चिरसाधनसम्पादितेन हरगुरुकरानुग्रहेण निरलसताविहितेन च लोकोद्धारपुण्यकर्मणा सन्ततमन्तरङ्गसमुद्रिच्यमानया च सकलमनुजा क्षेमाकांक्षया परमसान्या अनन्यसामान्याः श्रीबृहन्मठाधीश्वराः बहवो विश्ववंद्यविभूतिपुरुषाः संबभवः । तत्रापि सर्वसुपर्ववर्यं नित्यं मानव्यवहारव्याहारजीवातुभूत... ...णीसाहित्यान्तर्वाणयः कर्नाटक

भाषाशास्त्रसाहित्यलब्धासाधारणपाण्डित्यप्रागल्भ्यप्रशस्याः वैराग्यनिधयः पृथ्वीमण्डलावतीर्णपरमेश्वरप्रतिनिधय इव वर्तमानाः दिव्यज्ञानशेवधयः सदान्तःस्फुरदभगवत्तत्वसन्निधयः निरलसतयानुष्ठितसकलशास्त्रोक्तविधयः पदवाक्यप्रमाणपारावारपारीणाः सत्पुरुषधुरीणाः श्री श्री षडक्षरिशास्त्रिणः श्री महादेवशास्त्रिणः सदाशिवशास्त्रिणश्च सुप्रथिता एव पृथिवीवलये । एतं चान्ये तपोभक्तिज्ञानसम्पादितदिव्याध्यात्मतेजोबलेन सम्पन्ना बृहन्मठाधीश्वराः स्वपुण्यप्रभावानुभावैः विजयनगरसाम्राज्यस्य परमोच्चवैभव समुत्कर्षप्रकर्षे साक्षात्परम्परया च प्रधानकारणतामुपागच्छन् ।

सत्यामप्यत्र वस्तुगत्यां परिस्थित्यां महदेव अवितर्कितमेव समघटिष्ट कालिकं परीवर्तनम् । अहो बलीयस्ता कालस्य दुर्लङ्घ्यता च विधेः । परमोत्कर्षस्य चरमसीम्नि राराजमानं वैभव शिखराग्रे नरीनृत्यच्च सर्वहिन्दूनामभिमानादरस्फूर्तिकेन्द्रायमाण श्री विद्यारण्यप्रभृतिपुण्यतपःपरिपाकसमुदितं विजयनगरसाम्राज्य हा हन्त हन्त सुसङ्घटितैः यवननरपतिभिर्बलाक्रान्तं समूलघातं घातित पातितं धूलिसात्कृतं नामावशेषितं च समभवत् ।

तदा दीनदीना दूनदूना आश्रयहीनाः दुःखाब्धिलीना अलब्धशरणाः परित्यक्तगृहक्षेत्रसुवर्णमुक्ताभरणा अनाथा उद्भ्रान्ताः किङ्कर्तव्यतामूढा लक्षाधिका हिन्दवः देशान्तरं च अगच्छन ।

ईदृशे च दैवदुर्विपाकवशादुपनते दुर्धरप्रसङ्ग यवनाक्रान्त विजयनगरं सन्त्यज्य स्वस्वानुकूलस्थलानि प्रयातेषु सर्वेष्वपि पीठाधिपतिषु श्री वीरशैवगुरुस्थलबृहन्मठाधीश्वरा अपि स्वीयकौटुम्बिकपरिवार परिचारकपरिजनपरिगताः चित्रदुर्गमण्डलान्तर्गतजगळूरविभागवर्ति कट्टिगीहळ्ळीतिग्राममुपाजग्मुः । एवं गच्छन्त्यां कियत्यामपि काल कलाया त्र्यम्बकनेत्रत्रयवत्पावकतेजोभासुराः त्रिमूर्तय इव विबुधगण वन्द्याः त्रयो वेदा इव सर्वलोकप्रमाणभूताः अत्रिकुमारा इव अनसूयान्त रङ्गसल्लालिताः साकारा इव ज्ञानभक्तिवैराग्याः मूर्तिमन्त इव

धर्मार्थकाममोक्षाख्यपुरुषार्थाः मानुष्यमुपगता इव त्रिलोकीपुण्यराशयः महेश मूर्तय इव दूरीकृतकामाः सुमनस इव अपरुषाः शिक्षितगजा इव मदवर्जिताः नागाधिपा इव विमत्सराः श्रीला इव निष्कपटवृत्तिश्लाघिताः शमसीमानः दमधामानः शान्तिनिशान्ताः शीलशालिनः विरक्तिविहारवेश्मानः भक्ति भाण्डारायमानाः श्रीबृहन्मठसर्वस्वायमानाः श्रीषडक्षरि सदाशिव महादेव शास्त्रिणः त्रयोऽपि एकान्त उपविश्य मिथोमैत्रीमधुरेण सौहार्देन मिलित्वा व्यचारयन् श्रीमठस्य परम्पराया अविच्छिन्नोत्कर्षार्थं किमस्माभिः कार्यम् ? "विनाश्रया न शोभन्ते पण्डिता वनिता लताः ।" यद्यस्माभिः त्रिभिरपि अस्यामेव कट्टिगिहळ्ळिग्रामटिकायां तूष्णीमुपविश्यते तदा को वोपयोगः अस्माभिरधीतायाः सर्ववाङ्मातृभूतायाः संस्कृतगिरः कृच्छ्रात्सम्पादितायाः कृच्छ्रशास्त्रवैपश्चित्याश्च । श्रीहरगुरुप्रसाद लब्धोऽयं महानध्यात्मशास्त्रानुभवः एतद्बृहन्मठपीठपरम्पराप्राप्तश्च लोकोत्तरो अनुभावः अयं चास्माभिर्महता साधनानुष्ठानेन सम्पादितः दैवीसम्पत्प्रभावश्च वैयर्थ्यमेव समश्नुवीत । अस्मन्मठे अनादिकालत एव अनूचानतया सम्प्रवृत्ता लोकोद्धार दीनदलितोपकार वहुजनहित ज्ञानदासोहान्नदासोहादिविविधव्यापारा अवकाशाभावात् अस्यां पल्यामवरुद्धा प्रतिबद्धाः कदाचिन्निषिद्धा अपि सम्भवेयुः । अत इदानीमेव अस्माभिरितो निर्गत्य योग्यस्थानान्यन्विष्याध्युष्य स्ववर्चसा राजप्रजामण्डलमनुगृह्य अस्मन्मठपीठस्य लोकशिक्षा जनजागरण दीनजनोद्धरण सदाचरण धर्मप्रसारण धर्माचरणसंस्कृतिसन्देशोपदेशादिविविधानुवंशिककार्यकलापानुष्ठानरूपमहोद्देशसाधनं सर्वथाऽकलनीयमेवेति निरधारयन्।त्रिमूर्तीणामेतद्गुप्तमंत्रालोचननिर्णयानुसारेण वरगुरुहरप्रसादोपलब्धागण्यपुण्यप्रभावपाण्डित्यप्रावीण्यपरशिवभक्तिप्रावण्यव्यवहारवेदान्तनैपुण्यादिसाद्गुण्यासादितनरकुलाग्र-गण्यस्थानमानाः असमानास्ते त्रयोऽपि पण्डावन्मण्डलीमुकुटमण्डनमणयः कट्टगीहळ्ळीग्रामं कथङ्कारमपि परित्यज्य निरगच्छन् स्वभागधेयमन्विष्यन्तः ।

स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते

इति प्राचीनाभाणकमनुसृत्य–

यत्र यत्र गता एते त्रयीतनुसमप्रभाः
त्रयोऽपि पण्डिताः सर्वैस्तत्र तत्र कृतादराः ॥ ६२ ॥

तद्ज्ञानसौरभाकृष्टा हृष्टा जुष्टाश्च मानवाः
भक्त्यादरेण सर्वत्र प्रेम्णा तान् पर्यपूजयन् ॥ ६३ ॥

सीमान्तर्वर्तिसामन्तभूपाला बहवो ह्यमून्
स्वास्थानं प्रार्थयामासुः स्वस्थानं कर्तुमादरात् ॥ ६४ ॥

तत्रापि च महीखण्डे महितो हि महागुणः
महिम्ना च महादेवपण्डितोऽभून्नृपप्रियः ॥ ६५ ॥

तत्पत्नी महिलारत्नं प्रयत्नाराधितेश्वरा
गिरिजा हरजायेव सती चापि न चण्डिका ॥ ६६ ॥

गिरिजाया इव चैतस्या गिरिजायाः सुतावुभौ
श्रीशङ्करविठ्ठलाख्यसुमनामाभिलक्षितौ ॥ ६७ ॥

केळदीभूपतिः श्रीमन्महादेवप्रभावितः
राजवंशगुरुस्थानमलङ्कर्तुं व्यजिज्ञपत् ॥ ६८ ॥

[illegible]सनाथे केळदीधरित्रीनाथस्य विज्ञप्त्यनुनाथने च
[illegible]महादेवगुर्वोर्निषेद्धुं दाक्षिण्यवन्तः खलु दाक्षिणात्याः ॥ ६९ ॥

एवं केळदीमेदिनीनितम्बिनीवल्लभतल्लजश्रीबसप्पनायकसल्ला[illegible]दंमलळते अप्रतिमल्लमनीषिमतल्लिकामानमसमानमुपेयुषि [illegible]महाविदुषि तत्रैव सन्तस्थुषि द्वितीयोप्यद्वितीयः इतरैः सुतरामलभ्य[illegible]बाहलभ्यमभ्युपेतो मेधाविमूर्धमणिः हावनूर देसायिमहोदयस्य

प्रार्थनामनुमत्यादृत्य च तद्गौरवभावमङ्गीचकार । तद्राजवंशीयैः सभक्तिभरोन्मेषं सानन्दं वितीर्णैरन्तःकरणपूर्णैरुपायनैः सम्पादितसमृद्ध ग्रामारामधामधनकेदारः महोदारःकृतदारः सुखसंसारो गुत्तलग्रामे सौवस्ति मकरोत् । तद्वंशीया अद्यापि मिश्रीकोटिग्रामे वसन्ति ।

केळदीकाश्यपीकान्तकुटुम्बप्रजाकल्याणसाधनं कर्तव्यमिति बुद्ध्याऽकलयतो महादेवपण्डितस्य वंशावतंसमाणिक्यमणीयमानस्य श्रीसदाशिव सुधीमणेः प्रपौत्रः सिद्धेश्वरशास्त्री व्यवहारे वेदान्ते च समधिगतपाण्डित्य प्रावीण्यः सव्यसाचिसुधीशेखर इति पृथुतरमेव असमानं बहुमानं समवाप्तवान् तद्देशे ।

शकाब्दीये १६८० तमे वत्सरे केळदीमहाराज्ञी औरससन्तत्यभावाद् वङ्कापूरवासिनः पट्टणशेट्टीत्युपाव्हस्य चन्नवीरस्वामिनः कनिष्ठं कुमारं दत्तपुत्रत्वेन स्वीकृत्य सोमशेखर इति नामकरणं विधाय तस्य केळदीसाम्राज्यसिंहासने पट्टाभिषेकमकरोत् । अस्य च सर्वस्यापि संस्थानराजकारणे संवृत्तस्य महतः परिवर्तनस्य स्थित्यन्तरस्य तथा चेतरविधसकलघटनाचक्रस्य राजकीयव्यवहारस्य सर्वाधारः सूत्रधारः प्रधाननिर्वाहकश्च कर्तुमकर्तुमन्यथाकर्तुं समर्थः अघटितघटनापटीयान् चाणक्यचतुरः विद्यारण्य इव सर्वविद्यावैशारद्यविद्योतितः परार्थैकघटना तत्परःपरोपकारार्थसमर्पितसार्थकशरीरः निस्स्वार्थलेशः अगणितकायक्लेशः सदाराधितोमेशः श्रीसिद्धेश्वरशास्त्री एवेति जानन्त्येव इतिवृत्तविदो विद्वांसः । कट्टिगीहळ्ळिमठाधीश्वराणां श्रीसिद्धेश्वरशास्त्रिणां निस्वार्थ सेवाभावजनित सर्वजनानुरागप्रभावमहिम्ना चिन्नमुळगुंद बंकापूरशिग्गावीत्यादिग्रामेषु अयाचितमेव श्री बसवप्पनायकाभिधभूपालेन ससंतोषं अन्यैश्च भक्तैः श्रीलैः प्रदत्तानि मृदुतरमृदालीसमेधमानसमृद्धधान्यैर्धन्यग्रयताधन्यतामापादयन्ति श्रीनिधिसन्निधिपात्राणीव प्रभूतान्येवासन् क्षेत्राणि । चिरकालं कट्टिगीहळ्ळीग्रामनिवासात् एतन्मठीयोत्तराधिकारिणां मूलतो विजयनगरीय बृहन्मठीयानामपि पूर्वं हंपी आराध्य-

मठीयाः पश्चात् कट्टिगिहळ्ळीमठीया इति संबभूव व्यपदेशव्यवहार-गोचरता । महादेवपण्डितवत्परस्तादेतत्परम्परायां बहव एव कन्नड संस्कृत भाषा पण्डिताः शास्त्रपण्डिताश्च समभूवन् ।

एवं चक्रनेमिक्रमेण कालचक्रभ्रमिभ्राम्यमाणेषु प्राणिषु, संसरति संसारे, व्यतीतेषु वत्सरेषु, गच्छति च महीयसि अनेहसि यवनराजपुरुषः हैदरालिः केळदीसंस्थानमाचक्राम महता बलेन । एवं यवनाभियोगेन ध्वस्ते साम्राज्ये, त्रस्ते प्रजावर्गे, उच्चाटिते राजकुले, अपहृते राजस्वे, पलायितेषु अधिकारिषु, निराश्रयतया स्थानांतरगतेषु कविपण्डित कला-कारादिषु एतन्मठीय परिवारजना अपि ततो निर्गत्य स्वपूर्वजमहामनीषि महादेवशास्त्रि सम्पादितनैकक्षेत्र मठग्रामधामादियुक्तं बंकापूरं केळदीतः पुनरुपासदन्। तेषामेव वंशकेतुभूतस्य द्वितीय श्रीसिद्धेश्वर शास्त्रि महोदयस्य सत्पुत्रः श्रीसदाशिवनामा ब्रह्मतेजस्वी मुनिमर्हर्षिवर्चस्वी महामनस्वी लोकोत्तरतपस्वी समाजार्पित सर्वस्वी अध्यात्मपथक्रमणतरस्वी मिहिर महस्वी ज्ञानविज्ञानवैदग्ध्योर्जस्वी सत्पुरुषो महापुरुष एव एतच्चम्पू प्रबन्धस्य प्रधाननायकः। तदिह—तन्मूलस्थलपितृपारम्परीपरिचयपुरस्सर माबाल्यादेव महत्कुतूहलभरितं दूरीकृतपाठकदुरितं नवरसपरिपूरितं प्रारभ्यते श्री सदाशिवसूरि चेतोहारि चमत्कारकारि चारुतर चरितम्॥

श्री शंभुलिंगेश्वर योगिचित्रचरित्रचेतोहर चारुचम्प्वाम्
समाप्तिमागात्प्रथमस्तरङ्गः रसाप्लुतप्राज्ञहृदन्तरङ्गः ॥

॥ इति प्रथमस्तरङ्गः ॥

अथ द्वितीयस्तरङ्गः

तस्मिंश्च भरतभूललाटे कर्णाटे वरीवर्ति चित्रदुर्गमण्डलं यस्य सरीसर्ति सवत्रापि ख्यातिः कीर्तिश्च दिगन्तराले । यत्र च अविद्यन्त अविद्यापटलविघटनपटीयांसो भूयांस एव विद्वांसः, अनेक एव सङ्गीतगङ्गाधराः, असंख्या एव सङ्ख्यावंतो, बहव एव भौतविज्ञानबृहस्पतयो, विपुला एव वास्तुशिल्पनिपुणा, अगणिता एव ज्योतिगणितरेखागणितबीजगणितादिविद्याविशारदा, अपरिमेया एव विश्वकर्म विस्मापनकर्मालंकर्मीणामूर्तिनिर्माण कर्मठाः कुशलाः कलाविदः, विद्यन्ते विद्योतन्ते च अद्यापि यैः स्वीयवास्तुकलाकलापकौशल्यविज्ञानसाक्ष्याधारभूतदुर्गमदुर्गरचनया चित्रदुर्ग इति महितं नाम लम्भितमभूद्याथार्थ्यं यथौचित्यं च । तस्य च चित्रदुर्ग मण्डलस्य अन्तरङ्ग सुषुमा रङ्गस्थलायमानस्य काश्यपीकरुणा तरङ्गिणी तरङ्गाप्लाबितस्य जगळूरेत्युपमण्डलस्य सीमान्तरे परिशोशुभीति अम्बरचुम्बिजम्बुजम्बीरन्यग्रोधचिञ्चाकदम्बादिनानाविध तरुकदम्बाविर लबहुल विविधवर्णपर्णपटली रुद्धप्रतिबद्धब्रध्न करनिकरान्तः प्रवेश शैत्यागारायितः मञ्जुलताकुञ्ज कञ्जादिनिकुञ्ज मञ्जरी मधुझरीगञ्जा किञ्जल्कानुरञ्जित माद्यच्चञ्चरीक पुञ्जसङ्गीयमान मञ्जुळगीतगुञ्जारव सञ्जरीजृम्भमाणः विविधभर्म्यभासुररम्यहर्म्यावलीसंजनित कौबेरभवन भ्रमः अनेकानेक सुदामसोदरगुणधामदरिद्रधामग्रामाभिरामः वर्षाविहित परिश्रमस्वेदाम्बुसदार्द्रीकृतकलमकेदाराभिवृद्धोदारधान्यधन्यहर्षोत्कर्षकर्षक स्तोमः स्वस्वकर्मरूपदिव्यधर्मानुष्ठानपरितुष्टश्रेष्ठदेवतानुग्रह सम्पादिता क्षामक्षेमः सस्यश्यामः लसदनेकारामः चित्रदुर्ग मण्डल पल्लीललामः कट्टगीहळ्ळी ग्रामः ।

तस्यां च ग्रामसीमारामप्ररूढतरुस्तोमाश्लिष्टपुष्टविविधवल्यांसमन्तात् प्राकृत परिखायमाननिबिडमल्यां सुमसौरभसमाकृष्टमधुकरावल्यां

घोषमतल्यां कट्टगीहळ्ळीपल्यां अनादिकालत एव विलालसीति श्री श्री रेणुकगोत्रीय प्रणवार्थबोधक पद विधिसूत्रीय वीरशैवसाम्प्रदायिक बृहन्मठः।

ज्ञानेन हीनान् पशुभिः समानान्
विद्याजुषो या विदुषो विधातुम् ॥

विशारदा सा तनुते निवासं
विलासमेवापि च यत्र शारदा ॥ ॥ ७१ ॥

अन्नदानं च छात्राणां यत्राहोरात्रमप्यहो
प्रचाचलीति क्षुत्क्षामकुक्षीणां तृप्तये मुदे ॥ ॥ ७२ ॥

छात्राणां सर्वगोत्राणामन्नछत्रायितो मठः
ज्ञानसत्रस्य सुक्षेत्रं शिवेक्षापात्रतामगात् ॥ ७३ ॥

संसारकान्तार पथे भ्रमन्तः संताप सन्तानितान्ततान्ताः
यत्रैत्य शान्ति परमां लभन्ते स्वान्ते जपन्तश्शिवमाप्नुवन्ति ॥ ७४ ॥

उपोषणं न कस्यापि पोषणं यन्मठान्नृणाम्
अशनैर्वसनैश्चैव तोषणं परिवेषणं ॥ ॥ ७५ ॥

संतोषिताः संतत सन्ततान्नसन्तर्पणैर्यत्र समस्तलोकाः
अनुग्रहक्षेमविदोऽप्यजानन्नावग्रहक्षामपदार्थमेव ॥ ॥ ७६ ॥

ईदृशस्य असदृशलोकोपकारककार्यविश्रुतस्य महामठस्य यशसा त्वविनश्वरे माहेश्वरे वंशे सिद्धेश्वरो नाम सुप्रसिद्ध प्राचीन महापुरुष इव पुनरवतीर्णः

एतत्परम्पराप्राप्ते बृहन्मठपथानुगे
वंशे माहेश्वरे जातः श्री सिद्धेश्वर पण्डितः ॥ ७७ ॥

सोऽयं सिद्धेश्वरपण्डितः सुनिर्मल निगमागमाध्ययनसिद्ध प्रचण्ड पाण्डित्तीमण्डितः याथार्थ्यमुपलम्भयामास स्वकीयं शुभनाम । क्रमेण च वयसि प्रौढिमानं मनसि कोमलिमानं विद्यायां गरिमाणं स्वभावे मृदिमानं वपुषि प्रथिमानं व्यवहारे चतुरिमाणं समाजे च बहुमान समुपेयुषः सिद्धेश्वरपण्डितस्य सर्वत्र प्रससार शारदशर्वरीशर्वरी सार्वभौम ज्योत्स्नाजालधवलं सुनिर्मलं यशः ।

तस्य रूपानुरूपा गुणानुगुणा शीलानुकूला स्वभावानुवर्तिनी छायोपजीविनी पदानुगामिनी सञ्चरन्तीव सौदामिनी स्वाकारमुपगतेव राकायामिनी मानुष्यमुपजग्मुषीव कपर्दिकुटुम्बिनी हावेरीपत्तनस्थ हरसूरबृहन्मठीयानां वंशसमुत्पन्ना चन्नमाम्बानाम्नी कन्यामणिः जग्राह पाणिं शास्त्रोक्तविधिना विधिनानुप्रेरिता ।

तस्याश्च चन्नमाम्बायाः कौटिल्यं अलकेषु, वक्रता भ्रुवोः,काठिण्यं कुचयोः, चाञ्चल्यं चक्षुषि, मौखर्यं नूपुरयोः, विलासः पादन्यासे, अलसता गतौ, नैष्ठुर्यं धर्मपालने, कार्ष्ण्यं केशकलापे, बभूव न हृदये । सा खलु रतिरिव रूपिणी, सतीव सती, लक्ष्मीरिव लसल्लक्ष्मीः, शारदेव चतुराननाश्रितानेकविद्याप्रभाविता, किन्नरमयीव स्वरे, ज्योत्स्नामयीव दृष्टिक्षेपे, हंसमयीव चङ्क्रमणे, अमृतमयीव कलालापे, चन्द्रमयीव मुखे, तमोमयीव केशकलापे, कुमुदमयीव अपाङ्गावलोकने, सुवर्णमयीव देहवर्णे, ज्योतिर्मयीव दीप्तौ, विद्युन्मयीव कायकान्तौ, देवतामयीव स्वभावे, कुसुममयीव हृदये, ललनाकुलललामायमाना चन्नमाम्बा अनन्य भक्त्या पर्यचरत् पतिमेव साक्षात् परमेश्वरं मन्यमाना त्रिकरण शुद्धिपूर्वकं परदेवताबुद्धिपूर्वकं च ।

एवं अहमहमिकया अन्नदानं, मिथः स्पर्धयेव शिवपूजनं, अहंपूर्विकयेव परोपकारं, स्वसन्तोषेणेव अतिथिसेवां, स्वयंप्रेरणयैव सद्गुरूपासनां, यदृच्छयैव सर्वस्वदानं च कुर्वाणयोः शिवाचर्यया तिरस्कृतनिर्वाणयोः सिद्धेश्वर

दंपत्योः निरन्तराराधितशिवाशिवजंपत्योः सन्ततविहितचन्द्रचूडचरण परिचरणरूपापरूपनिष्ठुरतपोनुष्ठान परितुष्टसृष्ट्यादिकारणीभूताष्टमूर्ति प्रसादभूम्ना महामहिम्ना च समुदपद्यत तेजःप्रकर्षतुलितकुमारः चिदानन्दस्वरूपस्मारितसनत्कुमारः जन्मप्रभृति जितमारः कश्चन सुकुमारः कुमारः शालिवाहन शकाब्दे १८०९ मिते वर्षे विश्वजित्संव त्सरस्य माघशुद्धद्वादश्यां बुधवासरे मृगशिरो नक्षत्रयुक्ते ऐन्द्रयोगे ईसवीये १८८८ तमे वत्सरे ।

दिशः प्रसेदु पुरतः किशोर एषः शशाङ्काभयशः प्रकाशैः
आपूरयिष्यत्यखिलावकाशमित्याशयाशेत्यभिधां जुषाणाः ॥ ॥ ७९ ॥

सच्छास्त्रसौरभ्यमसौ पुरस्तात्
प्रसारयिष्यत्यखिलेऽपि विश्वे

संसूचयंस्तज्जननप्रसङ्गे
ववौ मरुन्मन्दसुगन्धवाहः ॥ ॥ ८० ॥

जडाशया अप्युपदेशतोऽस्य
भवन्ति पश्चाद्विमलाशया हि

ज्ञात्वैव शास्त्रे डलयोरभेदं
वैशद्यमापुर्नु जलाशया द्राक् ॥ ॥ ८१ ॥

संसूचयन्तः शकुनं शुभं शं
तज्जन्मकाले कलमन्द्रनादैः

सर्वे विहङ्गाः शकुनीति नाम
स्वीयं यथार्थं नितरां प्रचक्रुः ॥ ॥ ८२ ॥

पुञ्जीभूतमिव परमेश्वरानुग्रहं पिण्डीभूतमिव जन्मान्तरसुकृतं राशीभूतमिव स्वीयवंशपुण्यं, अखण्डाकारतामिवोपगतं शिवशिखण्डगत शशिखण्डं मूर्ततामिवापन्नं माणिक्यपुञ्जं शैशवभावमधिगतमिव

सूर्यदेवं सौम्यस्वरूपमिव पावकस्य तदपत्यमधिगत्य धन्यममन्यतात्मानं माता । मन्देतरमेव ब्रह्मानन्दसगन्धमानन्दमन्वविन्दत जनकः मेने च भाग्यवतामग्रेसरमात्मानम् ।

शुभे शोभने च सुमुहूर्ते सदाशिवपरमानुग्रहसमुद्भवस्य स्वस्य सुतस्य सदाशिव इत्येव चकार नाम नामकरणप्रसंगे सम्मिलितसकलबंधु मित्रदायादसंघे पिता सिद्धेश्वर--ः

"सदाशिवो मुदा सदा व्यधाच्छिवंमहीसदाम्
पुराङ्कितं च नाम तत्पुरो बभूव यौगिकम् ।" ॥ ८३ ॥

सदाशिवस्य जननानंतरं जननी चन्नमांबा अजीजनत् त्रीन् पुत्रान् । रामलक्ष्मणभरतशत्रुघ्नैरिव चतुर्विध पुरुषार्थस्वरूपैरिव चतुर्भिः पुत्रै राजा दशरथनन्दन इवामंदानन्दसिन्धावेव निममज्ज सिद्धेश्वरस्तत्पत्नी च ।

सदाशिवस्य सदापि चलनवलनशीलस्य क्रीडालोलस्य स्वबालस्य विचित्रा अङ्गचेष्टानानाविधाश्च बाललीलाः पश्यंती अव्यक्तवर्णरमणीया स्तस्य मुखशुक्तिकाविनिर्मुक्ता मुक्ताफलोपमा उक्तीर्निशम्य नितरां ननंदतुस्तौ पितरौ ॥

यदासौ सदाशिवबालः द्वितीये वर्षे पदमर्पयत् तदा दन्तकुड्मलां–ङ्कुरोद्गमः समलक्ष्यत मुखमुकुरे । कतिपयैरेव मासैः दन्तपङ्क्त्याविर्भाव पीडितोऽसौ बालकः महतीमेवान्वभूद्यातनाम् । क्रमेण च उल्बणतामुपेतया दन्तवेदनया बालस्य दृष्टिमान्द्यं समभूत् । अंते च प्रणष्टमेव दर्शनपाटवम् अन्ध एव संवृत्तः सुकुमारः स कुमारः ।

तदा च अत्यन्त सुन्दरमपि अन्धतामुपयातं तं पुत्रं निरीक्ष्य शोक-द्रेकसंतप्तांतरंगा जननी कुररीव क्रन्दन्ती निन्दती च आत्मनो भागधेयं तं स्वस्तन्धयं सदाशिवं सदापि स्वाङ्के शाययन्ती एवं विललाप ।

किं मया विहितं पापं पापया पुण्यलोपया
यदन्धो मत्सुतो जातो दुःखान्धास्मि ततस्त्वहम् ॥ ८४ ॥

विरूपाक्षकृपाजातो विशालाक्षः सुतो भवेत्
इत्याराध्य हरं प्राप्तः कथमन्धःसुतो मम ॥ ८५ ॥

सूक्ष्मदृग् पारदृश्वा च सर्वदर्शन दर्शनः
ज्ञानदृष्टि सुतो दद्यादज्ञानामित्यचिन्तयम् ॥ ८६ ॥

हा हन्त परमत्यन्तं दृष्टिशून्यः सुतो मम
स्वयं ममज्ज दुःखान्धौ मामन्धे तमसि न्यधात् ॥ ८७ ॥

दशापि च दिशः शून्या जीर्णारण्यमिदं जगत्
इदमंधं तमः कृच्छ्नं पुत्रेत्वन्धत्वमीयुषि ॥ ८८ ॥

किं करोमि क्व यास्यामि को भवेच्छरणं मम
सुतस्यान्ध्यापेक्षयापि वरं वन्ध्यात्वमेव मे ॥ ८९ ॥

त्येवं बहुधालप्य विलप्य च मुहुर्मुहुः
निद्राहारौ परित्यज्य सा शुशोच तपस्विनी ॥ ९० ॥

तदा तदाक्रन्दनमानिशम्य तन्नन्दनान्ध्यत्वमिदं निशाम्य
सामुद्रिक ज्ञान महासमुद्रो चन्नध्यमातामह एव माह ॥ ९१ ॥

वत्से किमुच्छोषयसे शरीरं महच्छुचा स्वात्मजवत्सला त्वम्
पुत्रो द्विनेत्राधिकनेत्रमेकं त्र्यक्षाशिषा प्राप्स्यति ते तृतीयम्
॥ ९२ ॥

तदा तदाधिपीडिता चैवमाह माता

यः सर्वनरसामान्यनेत्रद्वय विवर्जितः
किं तस्याधिकनेत्रेण चक्षुष्मान् भवतात्सुतः ॥ ९३ ॥

अतिमात्रं जगच्चित्रं विचित्रं द्रष्टुमीशितुः
नेत्रमेव तमात्रं हि करणं मरणावधि ॥ ९४ ॥

बोधनं शोधनं कर्तुं यच्चान्यत्सुखसाधनम्
मन्तुं सन्तुं स्वकं चान्यत् चक्षुरेवैक साधनम् ॥ ९५ ॥

जगद्व्यापारसक्ष्यैव साक्षि प्रत्यक्षमीक्षितुम्
दिष्ट्या दृष्टिविहीनो यो नष्ट एव श्वसन्नपि ॥ ९६ ॥

हृद्भावदर्पणं चक्षुर्जगती पारदर्शकम्
आकर्षकं हर्षकं च नास्ति चेज्जीवतो मृतिः ॥ ९७ ॥

वचनादनभिव्यक्तं भावं व्यंजयितुं क्षमं
नयनं बहुधा लोके बह् वर्थोन्नयनं मतम् ॥ ९८ ॥

अमृतासेचनं, हार्दसूचनं यस्य लोचनम्
नास्ति नास्त्येव तस्यार्तेन्यावदार्युविमोचनं ॥ ९९ ॥

दर्शनीयो हि मे बालो यद्दर्शनविवर्जितः
मद्दुर्दशोग्रदुर्दैवद्वयोरेतन्निदर्शनम् ॥ १०० ॥

एवं पुत्रान्ध्यशोकवैक्लव्येन चिन्तावैपुल्येन समाधानवैकल्येन चित्ततारल्येन निश्वासपौष्कल्येन च प्लुष्टायामिव शान्तिसुखभ्रष्टायामिव निरययातनापरिमुष्टायामिव, कालाहिदष्टायामिव, विषादाश्मपिष्टायामिव, प्रळयाग्निजुष्टायामिव, मृत्युदंष्ट्रास्पृष्टायामिव परिदेवमानायां चन्नम्माम्बायां कस्मिश्चन दिवसावसानसमये सदनमुपासीसदत् कोऽपि भासुरमुखमण्डलः वासरमणिरिव गगनपथसंचरणमुपसंहृत्य समुपागतः भूसुरोत्तमब्रह्मवर्चाः अतिथिः । चन्नम्माम्बायाः सादरोपचारमेदुरेण ड्रसमधुरेण पथ्येन चातिथ्येन संप्रीतः स अतिथिः चिन्ताशुशुक्षणि

क्षपितदेहामेणशावकाक्षीं अप्राक्षीत् चिन्ताकारणम् । हृदयविदारणंदारुणं च तस्याः शोककारणं समाकर्ण्य साक्षाद भगवानिव अनुजिघृक्षयागतः सौभाग्योदय इव सदेहः समुपस्थितः, दुरदृष्टप्रत्यादेश इव तद्देशमुपसन्नः. शुभतिथिरिव अशुभयोगनिवारणाय स्वयमुपागतः स अतिथिः तम् अनङ्गमदभङ्गकरमोहकाङ्गाङ्गसौन्दर्यं हृदयंगमं निन्द्यतमान्ध्यवन्ध्यजनुषं सुकुमारवपुषं कुमारमालक्ष्य सकरुणेक्षणं समभिवीक्ष्य एवमाचचक्षे

"मातः प्रतिदिनं पञ्चषेभ्यः क्षुधितेभ्यः अतिथिभ्यः पञ्चगव्यं प्राशय पञ्चामृतं भोजय। मृष्टान्नं परिवेषय। दानदक्षिणादिभिःपरितोषय। सुतदुर्विधिविलासं संशोषय । वंशाङ्कुरं परिपोषय। स्वतनूजनुषो भाग्य भविष्यमुन्मेषय" इति.

स्वतनय भाविभव्यदिव्यभव्यसौभाग्यसन्देशवाहकस्येव तस्य अतिथिदेवस्य अमृतायमानं निशम्य वचनमाबाल्यादेवातिथिसेवापरा सर्वजनभोजनसभाजनतत्परा चन्नमाम्बा तदुक्तप्रकारेण निरलसतया अतिथ्यभ्यागतसंतर्पण संभोजन संतोषणादि विविध सपर्यापर्याय चर्याभिः पर्यपूपुजत् साक्षाद्देवानिव अधिकाधिकानेव अतिथि महाशयान् ।

तथ्येन पथ्येन तस्या आतिथ्येन, हरगुरु समाराधनेन, अन्नदानेन, परोपकरणेन, महनीयसाधुपरितोषणेन च कतिपयेष्वेव दिवसेषु नयन पाटवमधिजगाम सदाशिवः । त्रिलोचनानुग्रहभूम्ना अल्पीयस्येव काले विलोचनः कुमारः समजनि सुलोचनः सदालोचनश्च। किमलभ्यं भगवति प्रसन्न भाललोचने । इति प्राचीनाभियुक्तोक्ताभियुक्ततमोक्तिमुक्तायाथात्म्य मन्वभूतां सिद्धेश्वरदम्पती। लब्धचक्षुःपाटवं स्वं पटुतराङ्गं साक्षादिवानङ्गं सदाशिवमालोक्य ननन्द माता ननर्त पिता मुमोद बन्धुगणः उल्ललास ग्रामगता समस्तजनता ।

बाल्य एव लौल्यं शैशवसहजं च चापल्यमप्यपास्य आहारे वैमल्यं विहारे सौशील्यं व्याहारे सौजन्यं व्यवहारे विनयपौष्कल्यं च अवलम्बमानः अयं डिम्भकः क्रीडायामपि चन्द्रचूडामणिमेव पर्यपूपुजत्पर्यायेण विविधचर्याभिः सपर्याभिः ।

शैशवेऽयं शिवे लोकशिवे सक्तः सदाशिवः
न स्नाने न च वा पाने भोजने वा मनोऽकरोत् ॥ ॥ १०१ ॥

नाहारे वा विहारे वा न हारे च मनोहरे
रेमे तस्य मनः किंतु सर्वपापहरे हरे ॥ ॥ १०२ ॥

हरनैवेद्यमित्येव स्वाद्यं खाद्यं जघास सः
शिवपादोदकं मत्वा तीर्थबुद्ध्याऽपिबज्जलम् ॥ ॥ १०३ ॥

स्वप्ने स्यान्नु विरूपाक्षसाक्षात्कारो ममेत्ययम्
निद्राति स्म च तत्रेशं दृष्ट्वा तृप्तिं च विन्दति ॥ १०४ ॥

एवमन्तरङ्गे सन्ततं परमेश्वरचिन्तनैकतानलीनमानसोऽपि बहिः सर्वसामान्यबालकवत् मूढ इव गूढानुभावः संचरति स्म प्रपञ्चे। न कोऽपि पर्यचिनोत् सुप्तशक्तिं महाव्यक्तिमनभिव्यक्तमाहात्म्यं । परं अतिथिसेवाभावैकदत्तदीक्षादाक्ष्यस्य सिद्धेश्वरपण्डितस्य दाक्षिण्याकृष्टमनसः यदा शरणमुपयान्ति स्म हरचरणैकशरणाः, शिवशरणाः तदाऽरणिमिव गूढवर्चसं बालकं सदाशिवं दृष्ट्वा कालिदासोक्तिमन्वस्मरन् स्वयमेव च समपठन् पद्यमिदम्--

महतस्तेजसो बीजं बालोऽयं प्रतिभाति मे
स्फुलिङ्गावस्थया वन्हिरेधापेक्ष इव स्थितः

वीरशैव शुभसंप्रदाय परंपरागतानूचान कुलाचारविचारानुसरणैकाबद्धव्रतःश्रीसिद्धेश्वर पण्डितः नष्टशैशवभावं प्रकृष्ट बुद्धि प्रभावं स्वतनयं

विनयोपेतं सदाशिवं अष्टवर्षवयस्कमवलोक्य महतोत्साहेन विध्युक्तं तस्य अप्राकृतं शिवसंस्कारमाकलयांचकार । शिवसंस्कारसंपन्नश्च सदाशिवः महीयसा ब्रह्मवर्चसा, गरीयसा मुखतेजसा, वरीयसा चात्मतेजसा, विदिद्युते वैश्वानर इव वैतानिकः ।गुरुमुखेन च कुशलकुशाग्रसर्वंकषशेमुषी विशेष विभूषितः सदाशिवः स्वशाखाभूतं बव्हृचापरपर्यायं ऋग्वेद मध्यगीष्ट विध्युक्त प्रकारेण निरलसप्रयत्नेन । कन्नड प्राथमिक शालेय शिक्षणमपि विलक्षणप्रेक्षासमीक्षावता सिद्धेश्वर कुमारेण लीलयैव समधिगत साकल्येन, विरहितं वैकल्येन, समभिवर्धितं बुद्धिवैपुल्येन दाढ्र्चयमापादितं च प्रयत्न वाहुल्येन ।

एवं चतुर्दशवर्षावधिक एव समये सममेव प्राथमिकशिक्षणं स्वशाखाध्ययनं च द्वयमपि लौकिक वैदिकोभयविद्याप्राथमिकप्रधान घट्टभूतं परिसमाप्य मेधाविनामग्रणीः नवनवविषयविशेषजिज्ञासा कुतूहलकवलीकृतः सदाशिवः विविधज्ञानविज्ञानप्रस्तारविस्तारशस्त प्रशस्तां अन्ताराष्ट्रियभाषागौरवमधिजग्मुषीं आंग्लविद्यामध्येतुं कृतोद्यमो बभूव । परंतु तदानीं अभावात् अध्यपन सौकर्यस्य राहित्याद् विद्यार्थि प्रोत्साहस्य, वैकल्याच्च शिक्षणसौविध्यस्य दवीयस्तया च आंग्लभाषाबोधकशालानां सदाशिवस्य विद्यार्थिनः इंग्लिशशिक्षणाकांक्षाभिलक्षितः मनोरथः नैव फलेग्रहिरभूत् तस्मिन् शैक्षणिकदृष्ट्या सर्वथा प्रतिकूले काले ।

" यदभूत्तदभूद् भाविभव्यायव नृणां भुवि ।" इति कर्णाटक भाषोक्तैकाभाणकभणितिमनुसृत्य सदाशिवस्य इंग्लीशशिक्षासौकर्यालाभः एकया दृष्ट्या उपकारक इव समवर्तत । प्रखर प्रज्ञा प्रतिभाभासुरोऽय मेधाविमूर्धमणिः आंग्लभाषा विद्याध्ययनसौविध्यं यद्यध्यगमिष्यत् तदा एम्, ए., पी. एच् डी., आय्. सी. एस्, इत्यादिपदवीः तन्मूलकं च न्यायाधीशमंडलाधीशप्राध्यापकाद्युच्चाधिकारस्थानमानान्यलप्स्यति

तेन च सर्वविधमेव लौकिक सुखसम्पदनुभोग भाग्यभाजत्वनामप्य न्वभविष्यत् । परं तेन सर्वोऽपि अध्यात्मप्रपञ्चः ईदृश शुद्धबुद्धसिद्ध प्रसिद्ध ब्रह्मापरोक्षिमुनिपुङ्गवस्य अध्यात्मतत्वोपदेशाद् वंचित एव अवर्तिष्यत । सर्वथा करुणालुः खलु कैलासपतिः । सर्वदा प्रसादोन्मुखी च जनोपकारिणी च वीरशैव मठीयानां भवितव्यता ।

सुदैवात् आंग्लविद्यामध्येतुं सौविध्यमनासादयन्नपि सदाशिवः न मनागपि मनसि खिन्नः, नापि विषण्णः, न सामान्यबालकवत् गृहे करौ विस्रस्य तूष्णीं निषण्णः, नवा विघ्नव्यूहक्षुण्णोऽपि निर्विण्णः किन्तु "आंग्लविद्याभ्याससौकर्याभावे भगवती देवगवी अस्मत्पूर्वतनपितृपितामह प्रभृतिभिः सादरं सबद्धश्रद्धं च समधीत समधिगता च मयापि सोत्साहमध्येतव्या । भारतीयैश्च सनातनैः श्री रेणुकाचार्य पञ्चाचार्य प्रमुखैः शास्त्रमुखैः महर्षिभिः प्रवर्तितश्च वीरशैवागमः आचूलमूलम भ्यसनीयः, तदुपयोगितया च न्याय वेदान्त व्याकरणमीमांसासाङ्ख्यवैशे-षिकादि दर्शनानि अधिगन्तव्यानि, तत्प्रवेशाय प्रथमतः काव्य नाटक चम्पू सुभाषितादिपरिभूषितं संस्कृत साहित्यं सम्यगेव अध्येयं, एतदेव च मम जीवनस्य परमं ध्येयम्" इति निरधारयत् मनसा, प्रत्यज्ञासीच्च वचसा, निरगाच्च गृहात् सहसा ।

निर्गच्छन्तं तं पथि निरुध्य माता "मा तात गृहं जहीथाः । नेदं वस्यते गृहादेकाकी बहिर्गन्तुं क्व वा यासि त्वद्गतप्राणान्नः मातापितृ बन्धुजनान् परित्यज्य। अद्याप्यप्रबुद्धोऽसि न जानासि अधुनापि त मुखं सम्यक् मार्जयितुमपि । परस्थले दुग्धमुग्धमुखं त्वां । मुग्धबालं कः स्नपयति का वा भोजयति का वा परिधौति परिधापयति वा वस्त्रं को वा स्वापयति मृदुशय्यायां निद्रामुद्रितलोचनं त्वाम्। हा कष्टं स्व गृहा-न्निर्गमनं विशिष्य बालिशबालावस्था पुरस्तनयौवनदशादेहलीदौस्थ्या-स्वास्थ्यजुषां परिवारजनचिन्तापुषां मूढाप्रौढबालकानाम ।

"प्रसीद पुत्र मा गच्छ निषीद सदनेस्वके
मा विषीद वृथायासैः मावसीद गृहाद् बहिः

अत्रैव वस किं वासः निवासो वा त्वदोप्सितः
यद्यद्वाञ्छसि तत्सर्वं प्रयत्नात् कल्प्यते मया ॥ १०५ ॥

एवं निर्गमनमार्गार्गलायमाना निर्गलदश्रुजलगद्गदायमान गलस्खलदक्षरा साग्रहं न्यरौत्सीत् वात्सल्यमूर्तिः समुच्छलच्छोकरससमुच्छोषिता माता दूरप्रस्थितं स्ववत्सम् । जनकोऽपि स्वहृदयदुःखजनकं सुतं निरुध्य निषेध्य च शोणीभवन्नयनकोणीकः सुरवाणीशिक्षणोत्सुकमभाणीत्स्वतनयम्.

अत्रैव पठ पुत्र त्वं मा हठं शठवत्कुरु
एतद्ग्राममठेऽधीहि किं तवाधिकविद्यया ॥१०६॥

क्व संस्कृतगवी श्लिष्टक्लिष्ट भूयिष्ठवाग्युता
क्वाल्पबुद्धिवया बालस्त्वं कष्ट कुरुषे वृथा ॥१०७॥

कृषिं कुरुष्व वाणिज्यं प्राज्यैश्वर्यप्रदं कुरु
अन्यद्वापि त्वमुद्योगं यदिच्छसि वदाधुना ॥१०८॥

ब्राह्मणा बुद्धिमन्तो ये ब्रह्मविद्यां पठन्ति ते
दक्षिणाधान्यदानादेरादित्सोत्साहतः सदा ॥१०९॥

धनाशा दक्षिणाशा वा दातॄणां नो न विद्यते
किं प्रवासैर्वृथायासै ग्रामे वस सुखं श्वस ॥११०॥

परं सुरभाषा वेदान्तविद्याद्यध्ययनैकबद्धश्रद्धः तद्ध्येयसिद्धिमार्गापतद्विघ्नव्यूहविध्वंसनबद्धकटिः तदब्रह्मविद्याध्ययनकष्टानुभवायापि सन्नद्धः स सिद्धेश्वरतनयः मन्दं हसन् वात्सल्यमयौ पितरौ सांत्वयन्नुवाच-

न ब्राह्मणा एव हि बुद्धिमन्तः नैषास्ति तेषां खलु देवभाषा
सा ब्रह्मविद्या प्रथमं तु वीरशैवेश्च नः पूर्वतनैरधीता ॥१११॥

शर्वपूर्वसुपर्वेड्या स्ववाग् गीर्वाणभाषिता
निर्विवादाधिकारोऽत्र सर्वोर्वीतलवर्तिनाम् ॥११२॥

न बालो बालिशो वाऽहं जानाम्यात्महिताहितम्
मातुर्ममत्वपूर्णं हृत् स शङ्कं सन्ततं सुते ॥११३॥

धनाशा दक्षिणाशा वा नास्त्येव मम सर्वथा
धनं हि निधनं मन्य प्रधानं ज्ञानमेव मे ॥११४॥

ब्रह्मविद्यैव विद्योक्ता 'सा विद्या या विमुक्तये
शतायुर्वा गतायुर्वा साधये तां प्रयत्नतः ॥११५॥

मच्चिन्ता मास्तु वः पूज्याः हन्त चिन्तामणिर्हरः
त्र्यक्षो रक्षति सर्वत्र दक्षो दक्षारिरत्रमाम् ॥११६॥

वत्सलत्वजुषोदर्कश्रीपुषा युष्मदाशिषा
निरवग्रहेण भर्गस्यानुग्रहेण तथान्वितः ॥११७॥

निरवद्यां ब्रह्मविद्यामध्येतुं चोद्यतोऽस्म्यहम्
अनुजानीत जानीत मामध्यात्मरतं सुतम् ॥११८॥

त्रयो मे सोदरा अन्ये लौकिकोद्योग सादराः
युष्मद्र क्षणदक्षा हि तत्क्षमध्वं ममोद्यमम् ॥११९॥

श्री रेणुकाङ्घ्रिप्रिरेणूनां त्रसरेणुर्भवाम्यहम्
चतुःपुत्रेषु मामेकं रेणुकार्याय यच्छत ॥१२०॥

एवं वदन्तं वहुबुद्धिमन्तं स्वमात्मजं तं दृढधैर्यवन्तम्
निर्भर्त्स्य निर्बन्धत एव तातः बलाद् गृहं वालमुपानयत्स्वम्॥१२१॥

एवं गृहमानीतः पित्रा अनुनीतो मात्रा, बोधितोऽपि बन्धुवर्गेण, सदाशिवः संस्कृतशिक्षण दृढ संकल्पात् न विरराम। "क ईप्सितार्थस्थिर निश्चयं मनः पयश्च निम्नाभिमुखं प्रतीपयेत्। इत्यभियुक्तोक्तिमनु सृत्य अवसरं प्रतीक्षमाण एव तस्थौ स्वाभीप्सार्थं साधयितुम्। शारदा पुरमहासम्पद्भरमुल्लुण्ठितुम् अकुण्ठामेवोत्कण्ठामुद्बिभ्राणस्य सदाशिवस्य स्वादिष्ठेष्वपि मातृकल्पितेषु मृष्टान्नेषु मिष्टान्नेष्विष्टतमेष्वपि नेच्छा बभूव।

नवरसे रुचिरामरभारती रुचिरसोत्सुकितेऽस्य सुतेऽम्बया
विहित पार्थिवपाकरसे रुचिः समुदभून्मुदभून्न च भक्षणात् ॥१२२॥

अन्यां स्वर्भारतीकन्यामुद्वोढुं गाढमुत्सुकम्
निद्रास्त्री सोढुमीर्ष्यातोऽशक्ता दूरं गता ततः ॥१२३॥

सिस्नासोर्ज्ञान सत्तीर्थे स्नातुं कूपजलेऽस्य तु
मनागपि मनो नाभूत गृहे चोष्णोदकैरपि ॥१२४॥

शिवेक्षास्नपितस्यास्य ज्ञानाब्धौ च निमंक्षतः
निर्मलस्य कुतः स्नानं मलिनस्य हि मज्जनम् ॥१२५॥

न स्नानं व्यदधात् पानं भोजनं वीजनं कुतः
शतार्धयोजनोल्लंघियोजनालोचनाकृतः ॥१२६॥

विद्याचिन्ता च पुत्रस्य पुत्रचिन्ता च तत्पितुः
मातुः स्वान्तेऽपि चिन्तैव तंतनीति स्म ताण्डवम् ॥१२७॥

॥ इति द्वितीयस्तरङ्गः ॥

अथ तृतीयस्तरङ्गः

कदाचित् कुसुमशरसार्वभौम सामन्ते हेमन्ते प्रशान्तमयः निशान्त समयः । कामपाल इव धृततमोनीलक्षौमः सुरासुर समरकाल इव कौशिक नागाधिपसञ्चारभीमः जलधरजाल इव चंचच्चामीकरचारुचपलास्तोमः धूर्जटिफाल इव संस्फुरद्बालसोमः मर्दितभामिनीभामः वर्धितकामिनीकामः अंतिमो यामिनीयामः । शैत्यातिशयव्रात्यायितवात्याहत्या जगदेव आकम्पते स्म । छिद्रांशुकधारिणी दरिद्रजनता शैत्येन विद्रावितनिद्राकातरा, सुभद्रेव सन्निहितधनंजया, रावणचमूरिव मारुतसन्त्रस्यमाना कमलिनीव उष्णकरांशुकापेक्षिणी दुष्पद्धतिरिव विपुलकण्टकजालकाञ्चिता मन्मथमनः प्रवृत्तिरिव दूरीकृतशम्बरा अकृतसुरतोद्यमापि शतधा क्षताधरपल्लवा सीत्कृतिविकृता चासीत् ।

तस्मिंश्च निशावसानसमये हंसतूल-कल्पित-मृदुल-स्त्रस्तर-कल्पात् स्वस्य तल्पात् शनैःशनैरुत्थाय सदाशिवः परितो न्यक्षिपत् दिक्षु विदिक्षु साशङ्कं चक्षुः तरलतारकम्। निद्रा-मुद्रित-लोचनाप्यालोचनामुखी एव स्वपिति माता । पितापि च निद्राङ्गना-समालिङ्गितः शेते घुर्घुरघोणारवेण निशामौनं तदा तदा विभेदयन् । अन्येऽपि परिवारजनाः निद्रा-नारी सौन्दर्य-मूढा इव तमःकर्दमावगाढा इव अविद्यामायाङ्गनोदूढा इव गाढ निद्रोपगूढा बाह्यप्रज्ञाशून्याः स्वपन्ति स्म ।

"अयमेव उचितः कालो मे गृहान्निर्गन्तुं"

इति निश्चित्य सदाशिवः मन्दं मन्दं मातुरन्तिकमुपेत्य तस्या शय्यासमीपमुपसृत्य साष्टाङ्गं प्रणिपत्य अञ्जली बध्वा अधरान्तरेव व्यजिज्ञिपत् ।

"मातः क्षमस्व, जगन्मातुराज्ञां पालयितुं गुरोराज्ञां च साधयितुं त्वदीयामाज्ञामुल्लङ्घ्य प्रस्थितोऽस्मि। तत्राशीर्वादस्य रक्षाकवचः सर्वत्रापि रक्षतु इमं तव वत्सं। विद्यावैभवसम्पन्न एव द्रक्ष्यामि तव मुखम्"

इति मौनमुद्रयैव सम्प्रार्थ्य पितुरन्तिकमुपसद्य तमप्येवमेवानुनाथ्य गृहात् निरगात्। पञ्चदशपदानि गत्वा पुनरपि मातृस्नेहाकर्षितः रज्वेव कृष्टः पुनः गेहाभ्यन्तरं प्रविष्टः मातुः शय्यान्तिके तूष्णीं स्थित्वा निर्निमेष-नेत्र-निरन्तरनिरीक्षणेन च मातुर्मूर्तिं स्वनयनफलकान्तः प्रति–बिम्बितां चकार।

पुनरपि करावञ्जलीकृत्य "अम्ब, क्षन्तव्योऽयं जन्तुः तस्य मन्तुश्च। क्षमागुणेन क्षमा (भू) सदृशा एव मातृपदमारोढुं क्षमन्ते। अपराधिनमपि मां पुनरागमनानन्तरमपि क्षमिष्यसे त्वमिति विश्वस्य देशान्तरं गमिष्यामि विद्यासम्पादनाय विद्याधिदेवताया आदेशानुसारेणैव। "कुपुत्रो जायेत क्वचिदपि कुमाता न भवति"। तवाज्ञोल्लङ्घनकारिणं महोद्देशसाधनाय त्वां परित्यज्य कतिपयकालं गच्छन्तं देशान्तरममुं तवार्भकं सदयहृदयाऽनुगृहाण। क्षाम्य मम दौरात्म्यं वितर आशीराशिं"। इति पौनःपुन्येन सम्प्रार्थ्य पुनः पुनः मातृमुखं पश्यन्नेव उदश्रु-नीरासाराऽप्लावित-मृदुल–कपोलः गृहे कीलितमिव मातृ-शय्या-परिसरे उत्कीर्णमिव पदं कथञ्चिद् उत्क्षिप्य बहिरागत्य "हा वत्स क्व यासि" इति मातुः शब्दं समश्रौषीत्।

पुनरन्तः प्रविश्य सम्भ्रमेण यावदवालूलुकत् तावन्माता तल्प एव निद्राणा निरैक्षि। "आ मातुरिदं उत्स्वप्नप्रलपितमिति" निश्चित्य पुनर्बहिर्बभूव।

एवं स्वप्ने जागरे च सममेव मामेव आव्हयन्तीं मदेकप्राणां मदेकजीवातुं जननीं कथं त्यक्ष्यामि त्यक्त्वापि कथन्तरां शक्ष्यामि

जीवितुं । यदि वा मातुरङ्के इहैव सुखं स्थास्यामि तदा किं वक्ष्यामि शारदादेव्यै जगज्जनन्यै उत्तरं ? सर्वथा वञ्चित एव भविष्यामि जगदम्बायाः कृपाकटाक्षात् तत्प्रसादोपसादनीय-भावि-भव्य-भोग्य-सौभाग्येभ्यश्च ।

अतः इदानीं बुद्धेनेव मयापि स्नेहपाशमिमं छित्वा दिव्यज्ञान–प्राप्तये सांप्रतमेव प्रस्थातव्यं । त्यक्तव्यं च माता-पितृ-परिवार-गृह–स्वाराम–विरामादिकं। भोक्तव्यं च भविष्यद् दुःखं वा सुखं वा किमपि इति निश्चित्य तत्क्षणे एव इयदवधि स्वभुवनायमानस्य भवनस्य दीर्घतरामन्तत उल्ललङ्घे देहलीम् ।

पञ्चषेष्वेव निमिषेषु स्वग्रामस्य महाद्वारमप्युल्लङ्घ्य भूताविष्ट इव ग्रहग्रस्त इव वातोन्नीत इव, स्वयं चण्डमारुत इव, द्रुतपदं चलन् उत्प्लवन् पटुगतौ सञ्चरन् धावनव्यायामेव गमनं चकार ।

स्वाध्यायात्मक–स्वध्येय-साधनैक- दत्त-चित्तः सदाशिवः ग्रामा-द्बहिरपरिचित एव पथि झञ्झावात इव पुरः सरन् सत्वरश्चरन् नाबिभेत् कराल-कुक्षि-कवलीकृत-जगदण्डमण्डलात् सूचिभेद्यात् सान्द्र नीरन्ध्रात्तमस्तोमात् मात्रयापि ।

प्राणि - देह - यमायमान - हिमानी- समाश्लेष - समापादिताधिक–शैत्यवैपरीत्य-वात्याचक्र-व्रात्याऽकम्पित–विश्व-–विश्वम्भरो निशावसान मातरिश्वापि न चेप्सितार्थस्थिरनिश्चयं सदाशिवं प्राभवत् परावर्तयितुम् ।

नाराचनिर्मुक्तो बाण इव सीतान्वेषणप्रवृत्तो मुख्यप्राण इव अमृताहरणाय उड्डीनो गरुड इव भगवद्दर्शनार्थं वनं प्रस्थितः, ध्रुवकुमार इव अयमपि कुमारः सदाशिवः स्वोद्देशसाधनाय कालरात्रिं गाढान्धकारं वाताघातं च किमप्यगणयन्, अवधीरयन् प्रकृति विरोधं अलक्षयन् निसर्ग वैपरीत्यं, अचिन्तयन्-मार्गापायान्, अन्तरिक्ष-निक्षिप्तनक्षत्र-दीपिका-

विक्षिप्तात्पाल्प-प्रकाश एव पुरोधावन् सरभस-पादक्षेप-ध्वनिना समाकलयदध्वानमपि सध्वानम् ।

गतिवेग-निष्ठुर-पादावघट्टन-प्रपद-कुट्टन-विस्फुटित-भूतट-कुट्टिमोत्थित धूलीपटलं शैत्य-दैत्य-झम्पाकम्पितमेनमनुकम्पितुमिव, वेग-धावन जनित स्वेदबिन्दु-सन्दोह-सङ्क्रान्त्या विलक्षण - पटपटलतामिवाप्तमुच्छ्वासयामास सदाशिवम् ।

रात्रेश्चरम-याम - जात- जडिमापादित - शीतातिशय-दुःसह - वाताघातादपि अभीतं ध्येय-साधनोद्देशाविष्ट-धैर्यार्पितं एतं पोतं लोचन-प्रतिघाति-तिमिर-भर-प्रतिहतं पदे पदे पातं प्रपन्नं भज्यमानञ्चालोक्य सञ्जात-करुणा-स्फुरण इव भगवान् तरणिरपि अस्य मार्गप्रकाशाय शीत-बाधापहरणाय च अरुणारुणान् प्राहिणोत् किरणगणान् ।

निर्जनवनान्तराले चास्य एकाकिता-भीतिमपनोदयितुमिव सदया वनदेवताः तरु-तल्प-प्रबुद्ध-पक्षि-गण-कलकल-रवेण मुखरीकृतान्यकुर्वन् दिङ्मुखानि

अदर्सीय-पादोपक्षेप-क्षुण्ण इव पश्चादपससार प्रदीर्घ एव मार्गः । पवनवेगजित्वरया सत्वरया च गत्या पदानि मुदा उत्क्षिप्य निक्षिप्य च गच्छतोऽस्य सदाशिवस्य लोचनगोचरतामयासीत् प्रातःकाले स्वर्णवर्ण-किरण पीताम्बरं परिधाय सूर्यनारायणस्य स्वागतसन्नद्धः बङ्कापूर ग्रामः ।

चिरधावनजनितायासेन तस्य देहः विशेषतश्च पादौ विश्रान्तिमपेक्षेते स्म । परं "अस्मद्ग्रामात्समीपतरग्रामेषु भूयसा बान्धवा मां परिचिन्वन्ति प्रवर्तन्ते च पुनर्मां प्रत्यावर्तयितुं गृहान् प्रति" इति धिया भिया च सदाशिवः परिचित-मुखदर्शन-परिजिहीर्षया श्रान्तोऽपि नितान्तं क्लान्तोऽपि कुत्रापि विश्रान्तिं विरामं वा नारोचयत । तथैव दृढनिर्धारेण

परिक्रमन् हावेरी दावणगेरे चित्रदुर्ग तुमकूरु प्रभृतिपत्तनानां–मठमन्दिरेषु शालासु च दिवा विश्रम्य देदीप्यमान-मुख - मण्डल-तेजः-प्रकर्ष-हर्षिताकर्षित-जनोपायनीकृतोपहारैः मार्गमध्यगतरुलतोपसृष्ट फलैः कान्तारप्रान्तगकेदारादिषु यदृच्छालब्ध – कन्दमूलैश्च कथञ्चित् सन्तर्पित–जठर–जातवेदाः नद-नदी-झरी-सरांसि समुत्तीर्य घनतर-वनोपवनानि अतिक्रम्य पुर-ग्रामाराम-ग्रामटिका-ग्रामान् अतीत्य घन–गिरि दरी–कन्दर-शिखर-सानूपत्यकाधित्यका उल्लङ्घ्य अन्ते कथङ्कारमपि उपाससाद कर्णाटक-देश-हृदयायमानं मैसूर-राज्य-राजधानीभूतं समग्र भारतदेश भूषणायमानं सागरमिव नैकरत्नागारं सुरपुरमिव वसु-समृद्धि समेधितं नागपट्टणमिव नाना-भोगि-गणैकाश्रयं नन्दनवनमिव मनोहरा प्सरो-राजि-विराजितं ब्रह्मपुरमिव सरस्वती-विहार-केन्द्रायमाणं वैकुण्ठ नगरमिव लक्ष्मी-लास्य-लीला-रङ्गस्थलं बेङ्गळूरनामकं विश्वविश्रुतं नगरम् ।

सुरासुर-सङ्घर्ष-समये दिवस्थलात् प्रच्युतमिव अमरावतीनगरं, स्वप्नलोकमिव साकारतामुपगतं, नागखण्डमिव पातालतलादुत्थितं, गन्धर्वनगरमिव स्थानान्तरमापन्नं, वैकुण्ठमिव लक्ष्मीवेङ्कटेशयो रन्वेषणाय भूतलमनुप्राप्तं, श्वेतद्वीपमिव सत्यसृष्टिम् अवतीर्णं, इन्द्रचापसौन्दर्यमिव संस्थानविशेषमापादितं, कुबेरराजधानीमिव दक्षिण दिशि स्थलान्तरितां, तन्नगरं सदाशिवः विस्मयान्वितो ददर्श । यत्र च बहुलतराट्टालिका-गोपुर-शिखराग्र-चुम्बिताम्बरमणि-चन्द्रबिम्बानि मर्म्य–रम्य-मणि-मुक्तानिर्मितानि हर्म्याणि स्वयं चन्द्रचूडतामवलम्ब्य विडम्बयन्ति भगवन्तं त्र्यम्बकमपि चन्द्रशेखरम् ।

यत्र च नगरमध्यगतानि मल्ली–मालती–मन्दारादि-वल्ली–मतल्ली सम्फुल्ल–कुसुम-सन्दोह – सौगन्धानन्दित – रसिकवृन्दानि उपवनानि उपहसन्ति देवेन्द्रस्यापि नन्दनवनम् ।

यत्र हि सर्वकारीय विशालभवनानि संक्षिप्तभुवनानीव विस्मापयन्ति प्रेक्षकान् । सुविशालाः शश्वत्संमार्जनस्वच्छतराः पयःफेनैरिव

धौता ज्योत्स्नाजालैरिवानुस्यूता दृढतर–दर्पगात्रयवैरिव घटिता ः चूर्णसमाकीर्णा इव कर्पूरपरागचर्चिता इव क्षीरोदपुलिनक्षोदच्छुरिता इव शुभ्रावदाता राजमार्गाः उभय–पार्श्व–प्ररूढ- नबिडावयव-छायाद्रुम कदम्बस्तम्भिताम्बरमणि-किरण निकुरम्बतया शैत्यागारा इव शीतला–न्तराला आल्हादयन्ति पान्थान् विस्मारयन्ति गृहानपि ।

यत्र हि विपणिवीथीषु व्यापार-लीलालास्यैर्लक्ष्मीं ललयन्तः कुबेर–कुमाराः लक्षलाभमप्यलक्षयन्तः कोटि सङ्ख्यायामेव उच्चकोटिक व्यवहारं कुर्वाणा दृश्यन्ते ।

यत्खलु नगरं व्यापारकेन्द्रमिति वैश्यैः, वीरस्थानमिति क्षत्रियैः, ब्रह्मपुरीति ब्राह्मणैः, उपजीवनाधार इति शूद्रैः, सिद्धायतनमिति साधकैः मल्लशालेति मल्लैः, सङ्गीतरङ्गभूमिरिति गायकैः, कलानिकेतनमिति वादकैः, नृत्यमण्डपमिति नर्तकैः, राजकीयसूत्रचालनकेन्द्रमिति शासकैः कल्पवृक्ष ति भिक्षुकैः सङ्केतस्थानमिति वेश्याभिः, शारदापीठ इति पण्डितैः, अदृष्टद्वारमिति वृत्तिकामुकैः, यन्त्रनगरमिति विज्ञानिभिः, मुक्तिमन्दिरमिति सन्यासिभिः, लाभक्षेत्रमिति व्यवसायिभिः, न्यायालय इति वादिभिः, विज्ञानभवनमिति स्थपतिभिः, सौख्यस्थानमिति निश्चिन्त गृहस्थैःआश्रितं च शोभते ।

तच्च विश्व-विशालं, सुविस्तृत-नैक-गृह-जालं, सर्वविध–व्यापारोद्योग-शिक्षणाद्यनुकूलं, सर्व-सम्पन्मूलं कर्णाटक–साम्राज्य–चूलं, भुवन, पद्म-कोशोद्भावन-मूलनालं, विश्व-विजयोद्यत-भौत-विज्ञान-पताका चेलं-सर्व-समृद्धि-विहित-सुर-पुर-वैभवावहेलं, सन्तत-प्रवृत्त-लक्ष्मी-शारदा-लीलं सर्वदापि प्रवृत्त-विविध-विद्या–कला–साहित्य–सङ्गीत-वाद्यातोद्यादिमेलं तोषितानेकभूपालं, पोषितासङ्ख्याविपाल-गोपालं, तद्-बृहद्-बेङ्गळूर नगरं निरीक्ष्य सदाशिवः कौतुकाविष्टो व्यचिन्तयत्।

"महति ब्रह्माण्डवद् बृहति चास्मिन् पत्तने कुत्र वा गन्तव्यं? के वाऽत्र संस्कृतपण्डिताः? को मां निष्किञ्चनं, धृतोद्धृताधरोत्तर-वस्त्र-मात्ररिक्थं रिक्तं बालं विना वेतनं संस्कृतमध्यापयेत्?" इति।

एवं अनन्त-चिन्ता-सन्तान-तान्त-स्वान्तः स्वयोग्य-गुरुं गवेषमाणः समग्रमेव नगरं सञ्चचार। अकस्मादेव श्री बेळ्ळावी-शिवप्प-शास्त्रिणां दर्शनं समवर्तत। तेषां पुरतः सदाशिवः स्वस्य ग्राम-त्याग-कारणं सुर सरस्वती-साहित्य-शास्त्राध्ययन-महोद्देशं तदर्थं च बेङ्गळूर-नगरागमनं निवेद्य "कोऽत्र महापण्डितः? का वा पाठशाला? कीदृशी चात्र छात्राणां अशन-वसनादि-व्यवस्था ? कुत्र वा मयाऽध्येतव्यमित्यादीन्नैकानेवा प्राक्षीत् प्रश्नान्।

सदयहृदया हृदयोद्यद्याः सहृदयशेखराः शिवप्प-शास्त्रिणोऽपि बालस्य सदाशिवस्य संस्कृताध्ययनोत्साहं, मनोदार्ढ्यं, वीरसङ्कल्पं महोद्देशं, कष्ट-सहिष्णुतां, ब्रह्मबुभुत्सां, शास्त्र-जिज्ञासां, साहित्य विविदिषां, च विज्ञाय तन्महोद्देशं मनसाभिनन्द्य, वचसापि संश्लाघ्य तस्य पृष्ठतटं सस्नेहं परामृशन्तः प्रीतिपूर्वकं सकरुणेक्षणमभिवीक्ष्य एवमाच चक्षिरे।

"वत्स सदाशिव, श्लाघनीयोऽयं तव उद्देशः। अभिनन्दनीयश्चायं तव सङ्कल्पः आश्चर्यकारिणी चेयं तवानुन्मुक्त-बाल-भावस्यापि एकाकिनः कट्टगीहळ्ळी-ग्रामान्निर्गत्य बेंगळूर-नगरागमनकथा रोमाञ्चक-कादम्बरी कथावत् कुतूहलजननी च। परं संस्कृताध्ययनाय बेंगळूरनगरादपि मैसूरपत्तनमेव वरम्।

तत्र च सन्ति वसन्ति भूयांस एव पाठ-प्रवचन-पटीयांसो विद्वांसः। सहस्रशश्च भिन्न-भिन्नदेशेभ्यः दूर-दूर-ग्रामेभ्यः समागताः छात्राः शास्त्र-साहित्य-सङ्गीतादिकमधीयाना विद्यन्ते।

तवापि तत्र देवभाषाध्ययनाय सम्पच्छ्येत सकलविधमपि सौविध्यम् । अहमपि तत्रत्येभ्यः मम अत्यन्तं सुपरिचितेभ्यः गुरिकारि-शिवलिंगप्प महोदयेभ्यः एकं दास्यामि पत्रम् । ते खलु तत्र मैसूरनगरे तव संस्कृताध्ययनाय सकलविधमपि सौकर्यं कल्पयिष्यन्ति । गृहाण इदं पत्रं । प्रापयैतत्तान्, इति तत्पत्रं प्रदाय सदाशिवं प्रषयन् पत्रेण सह बेळ्ळावे शास्त्रिणः मैसूरं-प्रति इत्याशास्य

गच्छ गच्छ च सत्पुत्र पन्थानः सन्तु ते शिवाः ।
गैर्वाण्यभ्याससङ्कल्पः सिद्धिं प्राप्स्यतु तेऽचिरात् ॥

एवं बेळ्ळावी-शिवप्प-शास्त्रिणां सूचनां सन्देशं पत्रं च मणित्रयमिव सादरं शिरसा सन्धार्य मनसा अवधार्य धैर्यद्वितीयः सदाशिवः पुनः प्रतस्थे बेङ्गळूर-पुरं परित्यज्य मैसूरगमनाय ।

देहधृतं वस्त्रं, करधृतं जलपात्रं, तत्पत्रं चैतत्त्रयमन्तरा तस्य सविधे त्रुटितैका कपर्दिकापि नासीदेव । अथापि ध्येय-ध्रुव-नक्षत्र-दत्तदृष्टिः धीरधीः स वीरबालः मैसूर-नगरीगामिनं मार्गं पादनिक्षेपैः क्षोदयितुमुपाक्रमत । उपरि आकाशे आदित्याग्निरेकः, अधस्ताच्च आतपतप्तः अग्निपूर्ण इव अग्निचूर्ण इव दहन् वालुक-रेणुकानिकरोऽन्योग्निः कुक्षौ च अशनाभावादुद्दीपितः क्षणे-क्षणे जाज्वल्यमानः जठराग्निः. हृदये चिन्ताग्निः मनसि-माता-पितृ-विरहाग्निः एवं अग्निपञ्चकं दहति स्म ।

एवमत्युग्र-तपोनुष्ठानाङ्ग-पञ्चाग्नि-साधन-क्रममिदानीमेव समभ्यसन्निव तत्पञ्चाग्नि-तापमपि सानन्दं सहमानः अवलम्बितमौनः, मनसि कृत-सदाशिव-ध्यानः आतप-निवारण-साधन-हीनः निरातपत्रः निष्पदत्रः दृढसङ्कल्पैकमित्रः निरनुयात्रः सदाशिवः प्रववृते मैसूरपुरी यात्रार्थम् । केळदि-बिडदि-मण्ड्य मद्दूर प्रभृति ग्राम-ग्रामान् मनोहरतर-धामारामान् समुन्नततर-तरु-स्तोमानतिक्रम्य महीशूर-सीमा-समीप-प्रदेशमुपससाद ।

तत्र च मङ्गल-कावेरी-तरङ्गिणी-त्वङ्गत्तुङ्गोत्तुङ्ग-तरङ्गान्तरङ्ग – रङ्गोत्सङ्गोच्छलद्वीची-माला- दोला–लीला-लोलानिल-वाला-

त्तोलिताऽवकीर्ण–सलिल-शीकर-निकर-कोरकित-तारकित–सैकत – तीरं चिरदूर - परिभ्रमण - परिखिन्न - सूर्य - स्यन्दन - वाहि -तुरग-तृषापनोदनाय कावेरीजलं स्वफल-कमण्डलेष्वादाय जलदानोद्यतैरिव॰ गगनाङ्गण-सार्व भौमैरिव नभो-यात्रोद्यत-सप्तर्षि-मण्डल-स्वागताय पूर्णकुम्भ-साहित्यसन्नद्ध भू-लोक-प्रतिनिधिभिरिव भू–प्रदक्षिणोद्युक्त–सूर्याचन्द्रमसोः गौरवाय चामरसेवामिव तन्वानैः अपरिमित-नारिकेल-पादपैःपरिवृतं कवेर-कन्या-तटिनी-तटस्थल-निर्मापितं, गगन-चुम्बि-गोपुर-शिखर-प्राकार-परिशोभ–मानं सुन्दरतर-श्रीरङ्गनाथ-स्वामि-देवालय-सनाथं विशाल-शालि-वन-शालि-नाना-प्रेक्षणीय-स्थान-लक्षणीयं अनेकैतिहासिक-वस्तु-विस्तारैर्विश्व विस्मापकं भूत-काल-संवृत्त-नैक-निर्णायक-घटना-स्मारकं हिन्दू-यवनोभय जातीय जनानां पवित्र-क्षेत्रायमाणं यवनराजपुरुषेण टिप्पूसुलतान नाम्ना पश्चिमवाहिनीकावेरीनीरस्थदक्षिणदेशगसुप्रसिद्ध श्रीरङ्गं नामक महाक्षेत्रप्रतिस्पर्द्धितया महता प्रयत्नेन तद्वदेव निर्मापितं दूर्निरूप्य-तत्सौरूप्य-सारूप्य-सम्प्राप्य-ताद्रूप्य-प्रशस्यं कावेर्याः पश्चिम-वाहि-प्रवाह-पात्रायमाण-परिसर-प्रतिष्ठितं–निसर्ग-सौन्दर्य-निकेतनं जागृतदैविकचेतनं निरन्तरं नदी-जल-प्रक्षालिततया नित्यनूतनं श्रीरङ्गनाथ-स्वामि-मङ्गलधामायमानं श्रीरङ्गपट्टणं चक्षुषोर्लक्ष्यीचकार ।

तत्र च स्फटिकविमले, अमृतरुचिरे, दुग्धधवले, मीनसमाकुले सुषिरशीतले, चञ्चलवीचिमाले, दृश्यमानावर्तजाले, साश्रितकूले, समीरलोले, अवगाहनानुकूले, कावेर्याः स्वच्छसलिले सदाशिवः निमज्योन्मज्य प्लवित्वा तरित्वा अवगाह्य तरङ्गान् प्रहृत्य चिरं विहृत्य तीरमनुप्राप्तः । तत्र च पूर्वमेव जले अवधूय आतपे शोषणाय प्रवाह-मध्य-द्वीप-प्रस्तर-खण्ड-विस्तारितं वस्त्रं सन्धृत्य नीरतीर सङ्गम-स्थले स्थित्वा शिवार्चनविधिं समाप्य समुपासदत श्रीरङ्ग देवस्थानं ।

तत्र च भव्यदिव्ये अमृतशिलानिर्मित इव धौतावदाते स्थापत्य-पाण्डित्य प्रत्यायके भक्त-जन-चित्त-समाकर्षके गुणज्ञ-प्रेक्षक-मनो-हर्षके गोपुर-प्राकार-गर्भागार-मनोहरे सुन्दरतर-नैक-देवप्रतिमा-प्रतिष्ठानभूयिष्ठे देवालये मसृण-द्रुहिण-शिलामय-शेषभोग-शय्यायां भुजमुपदानीकृत्य शयानं भगवन्तं श्रीरङ्गनाथं मङ्गलमय-विग्रहं विस्मय-विस्फारिताभ्यां नयन सरोजाभ्यामवलोक्य संस्कृत-ज्ञान-सिद्धिं सम्प्रार्थ्य ततो निर्गत्य पुन नदीतीरमाजगाम । तत्र तीरोपान्तगतमहेश्वरदेवस्थान बहिर्वितर्दिकायां न्यवीविशत् ।

तत्रागतैः कैश्चन भक्तैः भक्त्या उपायनीकृतं कदलीफलादिभिश्च प्रसादमप्रार्थितोपनतं भक्षयित्वा अञ्जलिमात्रं त्रिवारं सुधास्वादु कावेर्याः सलिलमातृप्ति पीत्वा पुनः प्रदक्षिणे महीशूरनगराभिमुखं मार्गं कलितुं ।

सन्ध्याकाले दूरादेव अदृश्यत बाल-चन्द्र-जालायमान-सहस्रसहस्र-विद्युद्दीप-माला-दूरीकृत-नैश-तिमिर-स्तोम-व्यापारं इतस्ततः चेतनाञ्चित-चञ्चला-चयवत् सञ्चलच्चञ्चल-चञ्चलाक्षी-सञ्चार-बन्धुरं चतुष्पथ-चत्वर-केन्द्रस्थान-स्थापित-राजप्रमुख प्रतिमा–परितरोपवन- मध्य–जल–कुण्डोच्छलत्सलिल - नलिका - मुखोद्गीर्यमाणोदक-धारासार-सीकरनिरन्त राविर्भवदिन्द्रचाप–सौन्दर्य–मनोहरं समासादित–लक्ष्मी–प्रसाद-सूचक–प्रासाद–पङ्क्ति–परिशोभमानं चतुर–मति –वणिक्-प्रवर-चाणक्य-तन्त्र-बन्दीभूत - चञ्चल-लक्ष्मी - निरन्तर-नव-नाट्य-निकेतनायमान - मुक्तारत्न राजि-विराजि-विपण-वीथी-विराजितं नैक-संस्कृत-वेद-पाठशाला–भवना लिन्दश्रूयमाण-छात्र-वृन्द-गीयमान मञ्जुल-वेद-घोष-ध्वनि-पावित-परिसरं पथिमिलत्शाला-कलाशाला- विद्यार्थि विद्यार्थिनी-दल-चर्च्यमाण-विज्ञाने-तिहास –गणित-भाषा-शास्त्रादि – विषयैः अनाच्छादित-वीथी-विश्व-विद्यालय-सम्पन्नमिव लक्ष्यमाणं, तत्र तत्र परिदृश्यमान-नाना-देवालय द्वार-वातायन-रन्ध्रोद्गच्छदगुरु-गुग्गुळ-धूप-गंध-सन्तर्पितपण्यवीथी-सञ्चा–रिजनं धार्मिक-कार्मिक, दीन धनिक, पण्डित-पामर, स्त्री पुरुष, विद्यार्थि - विद्यार्थिनी नास्तिक - आस्तिकादि - विविध - वर्ग-जाति - जन-

जनाङ्ग-सङ्कीर्णं महीशूरनामकं नगरम् । यत्र च राज-कुल-वैभवा-भिवर्धिनी दुष्ट-दैत्य-धूरीण-ध्वंसने धूर्जटिनेव संस्पर्धिनी निखिल-लोक-पावनता-विजित-स्वर्धुनी शरणागत-भक्त-पाप-तापोन्मर्दिनी शुम्भ-निशुम्भादि-दनुज-स्तम्बेरमार्दिनी महिषासुरमर्दिनी देवी चामुण्डी स्व-नामाङ्कितमेव उत्तुङ्ग-गिरि-श्रङ्गमधिष्ठाय कामधेनुरिव दोग्धि भक्ताभीप्सितानि, उद्धरति भवबद्धानपि भवबद्धश्रद्धान्, उन्नमयति सज्जनान् कृतभक्तिरसमज्जनान्, शोषयति संसारसिन्धुं पातकराश्यन्धु च, अनुगृह्णाति भवतान् भावुकान्, स्तावकांश्च ।

यत्र च पुरा विजयशालि-राजवंशीयाः धर्मवर्माणः कृत-नैक-पुण्य कर्माणः प्रजा-जन-विहित-शर्माणः दान-धर्म-सन्तुलितसुरभूजाः अनुकम्पित दीन-दरिद्र-समाजाः परदेवतायमानप्रजाः लोकोपकार-कार्य-विस्मारित-नल-राम-मान्धातृ-मुखसम्राजाः कृष्णदेवरायसदृशाः लोक-प्रिय-महाराजाः समाकलयन्ति शासनं, प्रोत्साहयन्ति कलाकारान्, पोषयन्ति पण्डितान् तोषयन्ति मुनियोगिनः, स्थापयन्ति संस्कृत-पाठशालाः, सञ्चालयन्ति छात्रालयान्, पालयन्ति पित्रवत् अन्न-वस्त्र-दानादिभिः विद्यार्थिनः, पुरस्कुर्वन्ति सङ्गीत-गङ्गाधरान्, उपकुर्वन्ति वीणा-प्रवीणान्, सभा जयन्ति चित्र-कला-चतुरान्सत्कुर्वन्ति शास्त्रिणः पदवी-प्रशस्ति-वेतन-दानादिभिः, आद्रियन्ते गुण-मणि-गणखजीन्,आश्रयदानेन प्रोन्नमयन्ति स्म आत्म-विकासोत्सुकान् ।

अत एव तन्मही-तल-महितं महीशूर-नगरं नाम चिरादेव कुलभवनं कलानां, उद्गमस्थानं विद्यानां, गङ्गोत्री काव्य-गङ्गाप्रवाहस्य, मन्त्र-गृहं राजतन्त्रस्य, अभिवृद्धिस्थानं संस्कृतभाषायाः, आविष्कारभूमिः नव-नवसं-शोधनानां, निर्गमनमार्गः पाण्डित्यपरम्परायाः, उत्पत्तिक्षेत्रं राजनीतेः, प्रयोगशाला वैज्ञानिकसिद्धान्तानां, प्रसाधनरङ्गः कन्नडसाहित्यस्य परी-क्षावेदिका पाण्डित्यस्य, संस्करणकेन्द्रं कलातपस्विनां, प्रदर्शनप्रकोष्टः स्थापत्यविज्ञानस्य, आश्रयः छात्राणां, कल्पवृक्षः भिक्षुकाणां, आधारः निरुद्योगिनां शाणोल्लेखस्थली आङ्ग्लवाङ्मयस्य, शरणमनाथानां

अभयसदनं निर्गतिकानां, ज्ञानभाण्डारः ज्ञानभिक्षूणां शान्तिदानप्रपा सन्तप्तानां, निवेशः प्रज्ञाकलिकानां, शृङ्गारतीर्थः रसिकानां, कामायतनं वारवनितानां, ऐश्वर्यद्वारं व्यापारिणां, अदृष्टसाधनं गणकानां, सुभद्रकवचः शरणार्थिनां, वज्रपञ्जरः सन्त्रस्तानां, धन्वन्तरिधाम रोगिणां, भोगभूमिका लक्ष्मीपुत्राणां, मुक्तिमन्दिरं सन्यासिनां, सुन्दरमन्दुरा चतुर्दशविद्यावाजिनां, विश्रान्तिवितर्दिका श्रीदेव्याः विहारकुञ्जः सरस्वत्याः इति पुरातनकालादेव समाप्नोति प्रसिद्धिम् ।

तथाविधं च मैसूरपुरमागत्य सदाशिवः बेळ्ळावे शिवप्पशास्त्रि-प्रदत्त-पत्रोपरि-लिखितं नामाऽनुवाच्य गुरिकारि बसवलिङ्गप्प महोदायानां निकेतनमन्विष्य प्रावीविशत् । प्रादाच्च तेभ्यः शिवप्प शास्त्रिणां पत्रम् । पत्रं पठित्वा ते सदाशिवं "कथमागतः बङ्कापुर-पत्तनादेकाकी मैसूर-नगर-पर्यन्त-मिति अन्वयुञ्जन् । सदाशिवस्य मुखतः विद्याध्ययनाय बालकेनापि तेन कृतायाः साहस-यात्रायाः श्रुत्वा समाचारं शिवप्पशास्त्रिणां गद्गदितः कण्ठः, बाष्पायिते लोचने, विद्रुत हृदयं, परिपूरितं च अन्तःकरणं स्नेहरसेन ।

सुर-सरस्वती-सेवार्थं प्रवास-प्रयासं आतप-तापं शीत-वात-यातनां क्षुधा-क्षोभं तृष्णा-सङ्कटं क्रमण-क्लेशं कान्तार-सञ्चरण-कष्टं भ्रमणबाधां एकाकिता-भीतिं च सर्वमपि सोढ्वा कथानायकमिव नाटक-कल्पित पात्रमिव स्वप्नदृष्ट-धीरमिव प्रत्यक्षं गोचरीभूय पुरस्तादवस्थितं चतुर्दश-वर्ष-देशीयं चतुर-मतिं चारु-मुखं चञ्चलाक्षं नियमिताक्षं समाराधित-विरूपाक्षं स्वाध्यायाध्ययन-दत्त-दीक्षं धृत-कार्य-दक्षं तं सुकुमारंकुमारं प्रेमाणमिव क्षरता सहानुभूतिमिव किरता अनुकम्पामिव प्रवाहयता दृष्टिपातेन प्रथमं आपाद-मौलि पर्यन्तमवलोक्य स्नेहातिशयेन स्वयं-प्रसृताभ्यामुभाभ्यां च बाहुभ्यां दृढतरं सम्परिष्वज्य मूर्धाविजिघ्र पार्श्वे एवोपाविश्य शास्त्रिणः प्रीति-विश्वास-पूर्वकमाबभाषिरे "वत्स, अद्भुतमिदं ते साहसं । नेदृशं साहसमयं कर्म केवलं चतुर्दश वर्ष-देशीयः कोऽपि मानवमात्रः प्राणी प्रभवति कर्तुं । कापि दैवी शक्तिरेव

नूनं त्वयि समाविश्य कारितवती सामान्य-जन-दुस्साधं महदीदृशं कर्म। तव साहाय्यकरणं नाम दैवीसङ्कल्पस्य अनुयोगदानमित्येव प्रत्येति मच्चेतः।

अतः मा कुरु चिन्ताम्। अहं तावदत्र मैसूरनगरे तव सुर–भारती–तत्व–रहस्य–बुभुत्सोः सकलविधमपि सौकर्यं सम्पादयित्वा तव विद्याभ्यासः यथा निरातङ्कं प्रवर्तेत तथा व्यवस्थां करिष्यामि। निश्चिन्तो भूत्वाऽध्ययनं कुरु" इति आश्वासयामासुः प्रणयपूर्वकं प्रोत्साह पुरस्सरं च।

एवमाश्वास्य स्ववचनानुसारेण संस्कृताध्ययन सौकर्यं कल्पयामासुः। जपदकट्टेमठे उषित्वा श्री सुब्रह्मण्य शास्त्रिणां सविधे प्रारब्धः काव्य पाठः। सरस-सुन्दर - संस्कृत - सारस्वत - स्वच्छन्द - विहारामन्दानन्द तुन्दिलाः शब्दाब्धि - लब्ध-वैदग्ध्य - विद्योतिताः सिद्ध - प्रसिद्ध - पण्डित–प्रकाण्डाः श्रीसुब्रह्मण्य शास्त्रिणः कुमार सदाशिवस्य असाधारिणीं मेधा-शक्ति ग्रहण-पाटवं प्रयत्न-सातत्यं निरीक्ष्य द्विगुणितेनोत्साहेन उपाक्रमन्त पाठयितुम्। कतिपयेष्वेव दिवसेषु सदाशिवः देव-नागरी–लिपि-परिचयं कृत्वा शब्दरूपावळि, धातुरूपावळि, समासचक्रादिकं मुखोद्गतं विधाय तद्विशेष परिज्ञानाय –

हठादपाठीत् स्वमुखोद्गतां च ग्लौचन्द्रिकां चातक पोतको यथा।
पटुत्वमप्याप च शब्दचन्द्रिकां व्यधाद हृदिस्थामपि धातुचन्द्रिकाम्॥१२८॥

कृपणो हि यथा कोशं स्वाधीनं कुरुते तथा
सदाशिवोऽपि नानार्थकोशं स्वाधीनमातनोत् ॥१२९॥

भूपवन्मेदिनीमाप वैजयन्तीं हरिर्यथा
यथेन्द्रोऽमरकोशं तं लीलया लभते स्म सः ॥१३०॥

लघुं बृहन्तं च सुधातुरुपकोशं पठित्वा पटिमानमाप्य
स धातुराश्याकर एव चाभूत् महान् हिमप्रस्थ इवाचिरेण॥१३१॥

समासव्यासरूपेण सूक्ष्मभेदानवेत्य च
समासप्रक्रियाक्रामि चक्रव्यूह बिभेद सः ॥१३२॥

ततः वृषपर्व-महाराज इव कृत-काव्यादरः, समुद्रयात्रिक इव रसाप्त्युत्सुकः, मारवाडोलोक इव अर्थलुब्धः, धनुष्मानिव शब्दवेधी, स्त्रीजन इव सुवर्णापेक्षी, वर इव शय्याकुतुकी, विवाहसमारम्भ इव भावप्रधानः, नर्तक इव पद-विन्यास-सूक्ष्मज्ञः सदाशिवः क्रमप्रकारेण रघुवंश, कुमारसम्भव, शिशुपालवध, किरातार्जुनीय, नैषधीयचरितादि पञ्चकाव्यानि सुश्राव्यानि कवि-जन-स्तव्यानि नित्य-नव्यानि पापठीति स्म सुब्रह्मण्यशास्त्रिणां सविधे ।

विहित-सहृदय-मनो-विकासं कालिदास कविता-विलासं समीक्ष्य आनन्देन उल्लल्लास सदाशिवस्य सदयं हृदयं ।

माघस्य अमोघ-कृतिं शिशुपाल-वधं आचूल-मूलमभ्यस्य, विमृश्य, तस्य शब्दवैभव परिदृश्य, व्याकरण-चातुरीं प्रयोग-वैचित्र्यं च परामृश्य चकित-चकितश्चमत्कृतश्चासोच्चेतसि चतुरमतिः सचेताः सदाशिवः ।

संस्कृत-साहित्य--सरसिजाकर-विकासक--भा-रवेः भारवेः काव्ये अर्थं-गौरवं शब्द-माधुर्यं भाव-गाम्भीर्यं सम्भाषण-चातुर्यं राज-नीति-चातुर्यं च दृष्ट्वा मुमोद जहास ननर्त सम्पपाठ चुकूज पुपूज बभाज च भक्त्या। प्रीत्या च सदाशिवः तद्गत-पद-पङ्क्तीः, लोकंपृणानेकान्तमनोरमांश्च तद्गतान्नैकानेव श्लोकान् पौनः पुन्येन पठन्नुच्चरन्नुच्चैस्स्वरेण काव्यास्वाद-मद-मत्त इव तच्चारुतातिशय चमत्कृतचित्त इवासीत् ।

नैषधं विद्वदौषधमिति पृथ्वीप्रथितं, नैषधीय – चरितं नाम महामहत्तरं श्री हर्षस्य काव्यमधीत्य हर्षोत्कर्ष एव समभूत् सदाशिवस्य । तत्र च हंसोत्तंसस्य प्रशशंस कार्यं ।

दमयन्त्या आपादमौलिपर्यन्ताकारवर्णनाप्रकारमनुवाच्य विकार–रहितोऽपि सदाशिवः कवेः कान्तादि-कमनीय-वस्तु-कवन-कौशलमसाधारणं लोकोत्तरं चेति समुदगिरत् ।

पुरस्तान्नलदपयन्तो संवादं नलस्य त्यागं दमयन्त्या धर्मसङ्कटं, देवतानां स्वार्थं, अन्ते च दमयन्त्याः पातिव्रत्य-प्रभावमित्येवमादीनन्यांश्च तान् तान् रमणीय-सन्निवेश-विशेषान् प्रौढ बन्धुरया गाढ सुन्दरया नव-रसालङ्कार-सुभगया सुधा-स्वादाऽवधीरिण्या मधु-माधुरी-धारिण्या सहृदय मनो-हारिण्या, सरससुन्दरवैदर्भीसरण्या, गौडीरीत्या द्राक्षापाकेन नारिकेलपाकेन च चारिम-साधिम-स्वादिम मधुरिम-निपुणिम-गरिम-महिमादि सङ्गमसहृदयङ्गम–विलक्षण–नव-रस-पाकेन चित्रयितुः, श्रीहर्षस्य दर्शं दर्शं कविता-वनिता-विलासं पायंपायं पीयूषावधीरिणीं तत्काव्य माधुरीं स्वादं-स्वादं प्रतिपद्य स्फुरद्रस-विशेषं, कारङ्कारं प्रतिसर्ग परामर्शं, स्मारं स्मारं मार्मिक-पद्य-पद-पङ्क्तीः, पाठंपाठं बहुतरश्लोकान् सदाशिवः श्रीहर्ष पूजक एव संवृत्तः ।

51.

एवं सञ्चित-सकल-रस-प्रपञ्चूर्यमाण-पञ्च-काव्य-वाचन-समुदञ्चित रोमाञ्च-कञ्चुकित-कलेवरः सदाशिवः तदाऽस्वादनाग्रह-गृहीत-चित्तः प्राञ्चमेव व्यस्मार्षीत् । किञ्च एवमेव सुधीश्राव्यानि, भावभव्यानि, अर्थ-दिव्यानि, रसोपजीव्यानि, लघु-काव्यानि तथा शृङ्गाटकानि नाटकानि परिहृत–मनोव्यथाः समधिगताधिक-सुप्रथाः संस्कृतकथाः, विश्व-संतर्पक-भावार्थ-सौगन्ध्यान् चम्पूप्रबन्धान् निरवद्यानि नूनं हृद्यानि काममास्वाद्यानि च वासवदत्ता कादम्बरी हर्षचरित दशकुमार चरितादीनि गद्यकाव्यानि, अखंड-रस-च्युन्ति भाव-भास्वन्ति चिदानंद-पुषि समुन्नीतहृन्दि अर्थगांभीर्य भृन्ति शब्द-सौन्दर्यवंति च मेघदूत-सूर्यशतक-सौन्दर्यलहरी-गीतगोविन्द-भामिनीविलास - गाथासप्तशती - गङ्गालहरी- सुभाषितसाहस्री-पादुका-सहस्रादि-सहस्राधिक-खण्ड-काव्यान्यपि गुरुनिरपेक्षमेव स्वयं समुत्पन्न काव्य-व्युत्पत्ति-बलेन अनुवाच्य अमन्दानन्द-सिन्धावेव ममज्ज समपीपदच्च संस्कृत-साहित्य-संसारे प्रकृष्टमेव प्रभुत्वं स्पृहणीयमेवचाधिकारम् ।

ततः श्रीसुब्रह्मण्यशास्त्रिणः अत्यल्पीयस्येव अवधौ साहित्य-साम्राज्य–पाण्डित्य–प्रभुत्व–धौरन्धुरीं सलीलमुद्भिद्यमानमवलोक्य सदाशिवं साहित्य-मौल्य-मापक-महत्व-ज्ञापक–गौरव-प्रापक शास्त्रायमाण

लाक्षणिक–ग्रन्थान् कुवलयानन्द–साहित्यदर्पण–काव्यप्रकाश–ध्वन्यालोकादीन् समपाठयन् सदाशिवं । तेन तनीयसेव अनेहसा सहसा स्वबुद्धि महसा सदाशिवः तानेव ग्रन्थान् पुनः पुनरभ्यस्य आवृत्य परामृश्य बुद्ध्या संशोध्य सूक्ष्म दृष्ट्या सन्तोल्य च ।

नन्दं कुवलयानन्दमनुवाच्यान्वविन्दत
साक्षात्कुवलय प्राप्तेरप्यत्यधिकमुत्तमम् ॥१३३॥

साहित्यदर्पणे तस्य साहित्यस्यान्तरात्मनः
बिम्बापरोक्षः संवृत्तः प्रेक्षावन्मात्रगोचरः ॥१३४॥

काव्यप्रकाशे हृदयावकाशे ज्ञानप्रकाशं किरतीह तस्य
सरस्वतीतत्वरहस्यगौप्यस्फोटो बभूवाशु च मम्मटस्य ॥१३५॥

ध्वन्यध्वन्यध्वनीनस्य बभूवानन्दवर्धनः
आनन्दवर्धनो गुप्तं नावाशिष्यत किञ्चन ॥१३६॥

रसगङ्गाधरे तस्य रसगङ्गोगमागमाः
यतःस्युर्ज्ञानगङ्गोत्र्याः साक्षात्कारोऽभवत्स्वयम् ॥१३७॥

जगन्नाथस्य तत्रत्यं प्रज्ञाताण्डवविक्रमम्
दृष्ट्वा गङ्गाधरस्तस्मिन् प्रसन्नोऽस्तीति बुद्धवान् ॥१३८॥

काव्यादर्शे ददर्शायं विश्वरूपं विविच्य च
काव्यब्रह्मण एवायं यशोदेवात्मजानने ॥१३९॥

एवं लाक्षणिक-ग्रन्थ-परीक्षणायामप्यस्य सदाशिवस्य प्रेक्षावतः तीक्ष्णधियः विलक्षणमेव वैचक्षण्यं दीक्षादाक्ष्यं प्रेक्षावैभवं च निरीक्ष्य सूक्ष्म-ज्ञानिनः श्रीसुब्रह्मण्यशास्त्रिणः व्याकरणग्रन्थानपि अस्य शिक्षयितुं

तत्क्षण एव पाठमुपाक्रमन्त। लघुसिद्धान्तकौमुदी अष्टाध्यायी प्रमुखान् व्याकरण शास्त्रस्य प्राथमिकग्रन्थान् सम्यगध्यापितः सदाशिवः कतिपयेष्वेव मासेषु–

लघुद्धिान्तकौमुद्या अलघु ज्ञानमाप सः
वैयाकरणभाण्डार कवाटोद्घाटकुञ्चिकाम् ॥१४०॥

महीशूरनगरं खलु सर्व-विद्यानां मातृ-मंदिरं उद्गम-स्थानं च सकल-कला-कलापानामिति विदितमेव विश्वेषामपि विदुषाम् ।

साहित्य-व्याकरणादि-शास्त्राणि समधीयानः सदाशिवः एकस्मिन्

सन्ध्या-काले वयस्यैः सह नगरे सञ्चरन् समश्रौषीत् सुमधुरं सङ्गीतम् । विस्तृते च मण्डपे उच्चैस्तरे प्रस्तर-पीठे शुभ्र-वस्त्राच्छादिते गाम्भीर्येण समुपविश्य कश्चन गायकः तार-स्वरेण गायति स्म । मृदु-मृदङ्ग-वल्लकी-स्वर-सङ्गताः भृङ्गी-कुल-सङ्गान–मधुर-सङ्गीत-भङ्गी-नाद-तरङ्गाः श्रोतृणां हृदयान्तरङ्गेषु मोद-तरङ्गानेव उदञ्चयन्ति स्म । शिशुर्वेत्ति पशुर्वेत्ति वेत्ति गान-रसं फणी इति फणितिमनुसृत्य फणिन इव सङ्गीत-लहरीः संश्रुत्य मस्तकान्यान्दोलयन्तः हरिणा इव गान-लुब्धा मन्त्रमुग्धाः सर्वेऽपि जना निश्चला आकर्णयन्ति स्म सुश्राव्य सङ्गीतम् ।

तदाकर्ण्य सदाशिवोऽपि हृत-हृदयः "सङ्गीतविद्यापि मया श्वः-प्रभृति शिक्षणीयैव अत्यवश्यमेवेति प्रतिजज्ञे मनस्येव ।

परेद्युः प्रातः-काल एव तदा मैसूर-मण्डल एव सङ्गीत-गङ्गाधर ति प्रख्यातिं समीयुषां वैणिक-शिखामणि-शेषण्ण-महोदयानां पट्टशिष्यत्व-सौभाग्य-भाजनीभूतानां गानयोगि-श्रीपुट्टस्वामिनां सविधमुपसृत्य स्वकीयां सङ्गीतशिक्षणाकांक्षामाचचक्षे ।

पुट्टस्वामिनश्च सदाशिवस्य तेजःपुञ्जायितं मुखं मञ्जुलतरं स्वरं च निशम्य निशाम्य च काव्य-कुञ्ज-विहार-क्षमतामप्यस्य पश्चा्वत्य सानन्दमेव सङ्गीतपाठं प्रारभन्त ।

"न कश्चिद्धीमतामविषयो नाम"इति कालिदासोक्तिर्न व्यभ्यचरत् सदाशिवविषये। गान-शास्त्र-ज्ञानं दिने दिने तस्य हृदि विकासमभ्युपेयाय। "साहित्यमपि सङ्गीतं सरस्वत्यास्तनद्वय"मिति संस्कृतवचनानुसारेण शारदायाः साहित्याख्यस्य एकस्तनस्य रसास्वादं यथेच्छमेव कृतवतः सदाशिवस्य सङ्गीत-रूप-स्तनान्तर-माधुर्याऽस्वादने नैवाभूत् क्लेशो लेशोऽपि। वीणा-तन्त्री-वाद्य-तुम्बीफलं गृहीत्वा सङ्गीत-सिन्धुं सलीलमेव समतीतरत् सदाशिवः। वेदविद्येव नादविद्यापि साक्षात् परशिवेनैव आविष्कृता,ब्रह्मसरस्वत्यादिभिः पुरस्कृता,नारद-तुम्बुरु-कम्बलादिभिः परिष्कृता,भगवत्प्रसाद-समासादने प्रधान-साधनतया परिगणिता पूर्वाचार्यैः। तामेतां गानसरस्वतीमाराध्य गुरुमनुरुध्य सदाशिवेन संसाधिता सङ्गीत–पारङ्गमता। प्रवीणश्चास्य पाणी वीणादिनिक्वाणने। विकस्वर-पिक-स्वरोदीयमान-तननन-गान-तान-वितानैः सङ्गीत-भङ्गीमङ्गीकुर्वाणे यदाकदाचित् मुदा सदाशिवे न केवलं जना एव मन्त्र-मुग्धाः किन्तु विहङ्गाः प्लवङ्गाः तुरङ्गाः भुजङ्गाः कुरङ्गा अपि भित्ति-लिखिता इव समाधिस्था इव जडा इव निश्चेष्टा इव निश्चला आकर्णयन्ति स्म आनन्देन। कियताचिदनेहसा अनेन हि सदाशिवेन दक्षिणादि-सङ्गीते पारङ्गमता प्रभुता प्रावीण्यं च असाधारण्येनैव अध्यगामि कर्नाटकदेशस्य महता पुण्येन।

एवं साहित्य-सङ्गीततदुभय कला-कौशलमनुपममुपगतवतोऽपि तस्य नासीदेव तृप्तिः नाप्यलम्बुद्धिः।

तस्य ज्ञानक्षुधा दिने दिने समेधमाना नवनव-वेदितव्य-विषयनिकरजानि अन्वेषमाणैव आसीत्। अत्रान्तरे सदाशिवेन कर्णाकर्णिकया समाकर्णि यत् काशीक्षेत्रे प्रतिवादि-वेतण्ड-षण्ड-खण्डन-प्रचण्डपुण्डरीकायमाणाः पण्डित-मण्डली-मुकुट मण्डन-मणीयन्तो विद्यया वरीयांसो गुरुत्वेन गरीयांसो भूयांस एव विद्वांसो विद्यन्ते विद्योतन्ते च। दृष्टव्या चेत् वैदुष्यस्य परा काष्ठा, ज्ञातव्या चेत् ज्ञानस्य इयत्ता, निर्णेया चेत् ज्ञानक्षेत्रस्य सीमा तदा वाराणसी एव अभिगन्तव्या, अतो

मयापि येन केनाप्युपायेन गन्तव्यं काशीक्षेत्रं, अवगन्तव्यं शास्त्रादिकं स्नातव्यं गङ्गाजले ज्ञान-गङ्गाजले च, दृष्टव्यो विश्वनाथः, ध्यातव्यो जगदीश्वरः श्रोतव्यः तत्रत्य-महापण्डित-मुखात् शास्त्रार्थः, अध्येतव्यानि न्यायवेदान्तादि दर्शनानि, सम्पादितव्यं दिव्यं ज्ञानं, इति मनसा निरधारयत् ।

परं उन्निद्रदारिद्र्यस्य रङ्कराजस्य निष्किञ्चनशिरोमणेः सदाशिवस्य काशीं प्रति जिगमिषा तत्र च अधिकाधिकज्ञानस्य सम्पिपादयिषा उद्ग्रन्थविवित्सा तत्वबुभुत्सा च कथमियात्पूर्ति विना भूरि-द्रव्यम् । अथापि नात्यखिद्यत न वा निरवर्तत नापि निरविद्यत च सदाशिवः किन्तु काशीगमनाय निरलसो निरन्तरं प्रारभत प्रयत्नम् ।

साहसे श्रीः प्रतिवसति । न व्यर्थो बभूवास्य यत्नः । मेधाविनः काव्यकुशलस्य नाटक निपुणस्य चम्पूचतुरस्य साहित्यसुधियः व्याकरण-विदुषः सङ्गीतविद्वत्पुङ्गवस्य वीणाप्रवीणस्य वाद्यविदग्धस्य सदाशिवस्य अधिकाधिकज्ञानसञ्जिघृक्षया काशीयियासां ज्ञानपिपासां तत्वजिज्ञासां च सानन्दमभ्यनन्दन् स्नेहशीतलाः हृदयकोमलाः परोपकारशीलाः श्रोत्राः अधिकाधिकविद्याधिगमानुकूलाः तस्य सहृदयाः सुहृदः । काशीयात्रा पर्याप्तं च धनं स्वयं सङ्गृह्य सदाशिवस्य हस्ते समार्पिपन् शुभाशंसन पूर्वकम् ।

एवं बहूनामेव गुणग्राहिणां ज्ञानपक्षपातिनां अव्याजबन्धूनां सद्गुणसिन्धूनां परोपकारिणां सज्जनानां स्नेहपुरस्सरं विहितसहायानुदानौदार्येण स्वकीयं मैसूर-पुरी-वासमुपसंहृत्य पूर्वं स्व-सहकारदान् गुरिकारि बसवलिंगप्प - महोदयानभिभाष्य स्व-साहित्य-पाण्डित्य-कारणीभूतान् श्री सुब्रह्मण्य शास्त्रिणः प्रणम्य विज्ञप्य उपनिमन्त्र्य च अनुज्ञामप्यधिगत्य गानगन्धर्वायितान् श्री पुट्टस्वामिनोऽपि अनुज्ञाप्य चामुण्डेश्वरीं दण्डवत् प्रणिपत्य"काशींप्रतित्वत्पति-दर्शनार्थमनुज्ञायतामयं तव गच्छन् वत्सः"इति सम्प्रार्थ्य प्रार्थनासमकालमेव मौलि-तट-विगलित-सम्फुल्ल-कुसुम-व्याजेन

तस्याः सम्मतिं शुभपुषं चाशिषमप्यधिगत्य धूमशकटीद्वारा प्रस्थितः सदाशिवः काशीप्रयाणार्थम् ।

द्वित्रदिनाभ्यन्तर एव उत्सङ्गाङ्गणप्रवहद्गङ्गोत्तुङ्गतरङ्गाप्लावितं कैलासपति-करुणा-कल्लोलिनी-जल-क्षालितं अनेकानेक देवताधिष्ठितं सहस्राधिक-देव-मन्दिर-देदीप्यमानं परमेश्वर-नित्य-सन्निधान-महितं अविमुक्तक्षेत्रमिति जगत्प्रसिद्धिमाप्तं प्रति-वीथी-विद्योतमान-वेद-शास्त्र-पाठशाला - श्रूयमाण-वेद - घोष -दूरीकृत - पातक-पटलं प्रतिगृह-प्रवर्तमान शास्त्रीय-वाक्यार्थ-कलकल-मुखर-दिङ्मुखं दूरदूर-देश-समागत यात्रिकैः गङ्गास्नान-समयोच्चार्यमाण "हर हर महादेव गङ्गाधर गौरीपते" इति शिव-शुभनाम - ध्वनि - ध्वस्त - समस्त-दुरितं नित्य-सौवस्ति-कृत्कृत्तिवास-शिखण्ड - मण्डन -खण्डेन्दु-ज्योत्स्ना-जाल-पुनरुक्तीकृत-सुधालेप-धवल-धाम स्तोमाभिरामं महोद्दण्ड-पण्डित-पुण्डरीक-खण्ड्यमान - प्रचण्ड-पाखण्ड-मतं प्रध्वस्त-समस्त-नास्तिक्यं आश्रयं श्रुतीनां, आधारं स्मृतीनां, परिष्कार प्रकोष्ठं पुराणानां, संस्करण सदनं संस्काराणां, शोधनभूमिं सम्प्रदायानां, संरक्षणगृहं सनातनधर्मस्य, विहारभूमिं मुक्ति-सीमन्तिन्याः विश्रान्तिवेदिं शान्तिदेवतायाः, सञ्जीविनीशैलं कलिकवलितास्तिक्यस्य कायकल्पकेन्द्रं वीरशैवसम्प्रदायस्य, मृत्युसोपानं कलेः, रुद्रभूमिं निरीश्वरवादस्य, प्रत्यदेशं भौतविज्ञानस्य, सुभद्रकोटिं वैदिकमतस्य, स्वयंव्यक्तिस्थलीं दैविकशक्तेः, अवतारभुवं विभूतिरूपाणां, प्रत्यक्षगोचरस्थानं मन्त्रसिद्धीनां, संक्षिप्तावृत्तिं कैलासस्य, पुनरुक्तिं सत्यलोकस्य, विस्तरणं श्वेतद्वीपस्य, उपनगरं वैकुण्ठस्य, प्रतिद्वन्द्वपत्तनं अमरावत्याः, बीजनिष्पादनक्षेत्रं ज्ञानसंस्थानां, निक्षेपस्थानं अध्यात्मसम्पत्तेः, शिल्पिगृहं पाण्डित्य प्रतीकानां, आलानं पण्डितवेतण्डानां गारुडनीडं सौगतसरीसृपाणां सिंहगुहां स्याद्वादिमत्तमातङ्गानां, विहारवनं तार्किककेसरिणां, अभयारण्यं वैयाकरणशार्दूलानां, सुवर्णपञ्जरं मुक्तिहंसस्य, निर्माणनिलयं धर्मवर्मणां, सत्वापूरणनिधिं तत्वज्ञानस्य, श्रुतिविश्रुतं, स्मृतिसंस्तुतं, पुराणप्रसिद्धं आगमानुवर्णितं, इतिहासप्रथितं, मुक्तिक्षेत्रं, क्षेत्रराजं परम-पुमर्थद-तीर्थ-सार्थ-सार्वभौमं काशीपत्तनं उपासीसदत् सदाशिवः ।

यत्र च निरन्तरं प्रवतमानाग्निहोत्र-दर्शपूर्णमास-चयन-सोमयाग-पौण्डरीकाऽश्वमेधादि - यज्ञकुण्ड - प्रज्वलित -वैश्वानर-ज्वाला-सन्दग्ध इव प्रणश्यति शून्यवादतूलराशिः, अङ्गणप्रवहद्गङ्गाजल-प्रक्षालितेव विलयमायाति नास्तिक-मत - प्रणालिका, नित्य-सन्निहित - शङ्कर - हुङ्कार-भीतेवसुदूरमपैति कामवासना, त्रिकालानुष्ठीयमानसन्ध्याङ्गभूतोच्चाटन मन्त्रोच्चाटितेव पलायते चार्वाक-विचार-लहरी, मन्दाकिनी-जल-प्रवाहोपरि-परिवहद्वात-निर्वापिता इव निर्वाणमृच्छति वेदबाह्य-जैनादि-मत-दीप-कलिका-तीर्थोदकोपशमित इव प्रशाम्यति धर्मद्वेषाग्निः, शास्त्र–विद्यार्थि,वाक्यार्थ-कलकल-कोलाहल-विलीन इव न क्वापि संश्रूयते अधर्म ध्वनिः, स्नानागत-सप्तर्षि-पुण्य-प्रभाव-पराहत इव नोपसर्पति कलिः, शिवसन्दर्शनोपसन्न - यमधर्म - वाहन - महिष - विषाणोत्खात इव नश्यति भक्तानां पापपर्वतः, साधक-जन-तपोऽग्नि-ज्वाला-प्लुष्टा इव शुष्यन्ति नास्तिक्यविचाराङ्कुराः, परमेश्वर - प्रणामागत - काली - कर - कलित - कराल-करवाल-कृत्ता इव न प्ररोहन्ति जडवाद-रक्तासुराः, मणिकर्णिका पितृवनावनि-जाज्वल्यमानात्युज्वल-जातवेदो- ज्वाला - माला-जाल-प्लुष्ट-प्रणष्टमिव जातु नैव प्रसरति कलिसाम्राज्यम् ।

यस्मिश्च साक्षाद्विरूपाक्ष-करुणेक्षण-प्रवर्तमान-धर्म-शासने पत्तने भक्तद्वेषः रोगिषु, असत्यालापः विटेषु, व्यभिचारवार्ता नैयायिकेषु, निर्धर्मिकत्वं परब्रह्मणि, सदागमाक्षमत्वं खञ्जेषु, पशुपति - प्रतिरोधः गोष्ठेषु, लिङ्गभेदः व्याकरणे, विग्रहविरोधः शान्तिकामुकेषु, द्विजपातः वृद्धमुखेषु, जटाच्छेदः वृक्षेषु, रुद्राक्षिद्वेषः मन्मथपरिवारे, भूतिराहित्यं दरिद्रेषु, श्रुतिवैकल्यं बधिरेषु, स्मृतिवैमुख्यं मूर्छितेषु, पुराणानादर तरुणेषु, हारारुचिः विधवासु न जनेषु ।

यत्र च परस्सहस्राण्येव देवतायतनानि, शताधिका एव संस्कृत पाठशालाः, असङ्ख्या एव धर्मसंस्थाः, नैक एव साम्प्रदायिकमठाः अपरिमिता एव शिक्षणसंस्थाः,मदनमालवीयप्रतिष्ठितः हिन्दूविश्वविद्यालय आङ्गलशासनप्रवर्तितसंस्कृतकलाशाला गोयङ्कासंस्कृतकलाशाला काशी

राजशिक्षणसमितिः इत्यादयः नानाविद्याप्रसारकसङ्घसमित्यादयः चिरादेव धार्मिकक्षेत्रमिति सुप्रथितमिदं काशीनगरं परिवर्तयन्ति शैक्षणिक क्षेत्रात्मना ।

विविधाश्च सर्वकारीयाः धनिकसमाज, सङ्घ, संस्थादिसञ्चालिताश्च नैका एव पाठशालाः कलाशाला अपि विद्याध्ययनाय दूरदेशेभ्य उपागतानां सकलसौविध्येन छात्राणां निश्चिन्तविद्याध्ययनसौकर्यमुपकल्पयन्ति ।

तेन परःसहस्रा एव छात्रास्तत्र उषित्वा संस्कृतं पठित्वा विद्यां सम्पादयित्वा पण्डिता भूत्वा विश्वनाथं नत्वा स्वदेशं गत्वा धर्मोपदेशं कृत्वा धर्मजागरणमातन्वते सनातनधर्मसन्देशं शैवागमादेशं च प्रतिनगरं प्रतिपुरुषं प्रापयन्ति ।

एतादृशं च जगती-तल-विख्यातं काशीक्षेत्रमागत्य सदाशिवः वीरशैवछात्राणां संस्कृतविद्याध्ययन-सौकर्य-सम्पादनाय एकमात्रशरणं जङ्गमवाडीमठं प्राप ।

जङ्गमवाडीमठस्य महापीठमलङ्कुर्वन्तः कर-तलाऽमलकीकृत-सकल-शास्त्रार्थाः प्रतिवादि-मूकीकरण-समर्थाः शरीरवद्धा इव प्रथम पुरुषार्थाः दूरीकृतस्वार्थाः समुद्धृत-शिष्य-सार्थाः जगद्गुरु-श्रीहरीश्वर-महास्वामिनः सदाशिवस्य स्वाध्यायध्येयमभिनन्द्य "स्वमठे स्थित्वा शास्त्राध्ययनं कुरु," इति आदिदिशुः । अशन-वसनादि-सकल-विध-सौकर्यमपि प्रदिदिशुः, तर्क-पूर्वमीमांसा-व्याकरण-उत्तरमीमांसादिकमध्येतव्यमिति च सन्दिदिशुः ।

सदाशिवजीवनस्य सदापि सदाशिव-प्रेरणयैव सन्मार्गप्रवृत्तत्वात् दैवस्य आनुकूल्यात् तत्र जङ्गमवाडीमठे सर्व-कार्य-निर्वाहकधूर्वहाः तर्कालङ्कारविरुदभूषिताः शिवमोग्गामण्डलान्तर्गत बारङ्गीग्राममठा–

धीशाः श्रीफालाक्षशास्त्रिणः सदाशिवस्य मातामह्याः सोदरा एव आसन् ।

वङ्कापुरतः काशीनगरीं प्रति संस्कृत-विद्यासम्पादनाय बहु परिश्रम्य अतिकष्टमनुभूय कथञ्चित् समागतं स्वसहोदरी-पौत्रं कृपापात्रं एनं सदाशिवमवलोक्य श्रीफालाक्षशास्त्रिणां हृदये अभिमानः, आनन्दः, वात्सल्यं त्रयमपि समुदपद्यत यौगपद्येनैव ।

महिशूरपुर्यामेव अधिगत - साहित्य - पाण्डित्य- सौहित्य - साहित्य-समुल्लासितं सहृदय-हृदय-शर्मावह-मार्मिक-कविता-निर्माण-कर्मालङ्कर्मीणं परिचित-व्याकरण-परिभाषा-प्रक्रिया-प्रकारं अपरिचित-गर्व-विकारं सदाशिवमवैत्य श्रीफालाक्षशास्त्रिणां उत्साहः दशगुणितो बभूव ।

ततस्ते महतोत्साहेन स्वनिकटसम्बन्धिनममुं छात्रं तर्ककेसरिणां मीमांसामनीषिणां काशीखण्डस्य अनभिषिक्त सम्राजवत् स्थितानां न्याय-वेदान्त-साङ्ख्यादि-शास्त्र-साम्राज्य-सार्वभौमाणां शब्द-शास्त्र-लब्ध जगद्विलक्षणवैदग्ध्योपलब्धविद्वत्प्रपञ्च-प्रतिष्ठा-महिष्ठानां स्वशिष्यायित सहस्रछात्राऽध्यापित - न्यायमीमांसावेदान्तसाङ्ख्यादिशास्त्र - ग्रन्थरत्नानां स्वसिद्धान्तभूताद्वैत - वेदान्त-वेद-स्वारस्य-ग्रहण-चतुर- चकोरायमाण-चेतस्कानां प्रौढ-मनोरमा-प्राप्त-प्रगाढ-पाण्डित्यानां विशिष्य शङ्कर महाभाष्याऽसादिताऽदूष्य - वैदुष्याणां लघु - गुरु - शब्देन्दु - शेखर - लब्ध -प्रखर-पाण्डित्य-मण्डितानां पदमञ्जरी प्रक्रिया-चातुरी-विवरण-धुरीण-वाग्वैखरी परिशोभितानां अभिनवगदाधरायमाणानां नूत्नपाणिनीयमानानां महामहोपाध्ययादिपदवीविभूषितानां श्रीशिवकुमारमिश्रमहोदयानां सविधे उपनीय परिचाययित्वा सिद्धान्तकौमुदीं तर्कसङ्ग्रहं च पाठयितुं व्यजिज्ञिपन् ।

दक्षिणदेशादागतस्य अस्य छात्रस्य मेधाशक्ति ग्रहणपाटवं अनुवाद चातुर्यं वाचोवाल्लभ्यं विषयविमर्शनवैचक्षण्यं च दृष्ट्वा श्रीशिवकुमार-मिश्रा हर्षाश्रुमिश्रा एव समवर्तन्त ।

शास्त्रिणां तर्कपाठे शब्दबोधप्रक्रिया चतुरमतये सदाशिवाय अत्य-रोचत प्रीत्यास्पदी बभूव च, तदनन्तरं दीपिका-दिनकरी-महितमुक्तावली-ग्रन्थाः सम्यगेव अधीता आत्मसात्कृताश्च सदाशिवेन । एवं न्याय-व्याकरणोभय शास्त्रयोः सव्यसाचिवद् गतिं प्रगतिं पाटवं प्रभुत्वं च समध्यगमन् क्रमेण सदाशिवः ।

तर्कसङ्ग्रहनामानमन्नंभट्ट कृतां कृतिम्
पठन् कृती तर्कशास्त्रे चक्रेऽधीतेरुपक्रमम् ॥१४१॥

दीपिका तर्कसुज्ञानप्रापिका प्रापि तद्धिया
मुक्तावल्याख्यवल्याप्तं व्युत्पत्तिकुसुमं सता ॥१४२॥

प्रभा,दिनकरी-व्याख्ये मुख्ये मुक्तावलीकृतेः
आख्याते गुरुणाधीत्य मतिवैशद्यमाप सः ॥१४३॥

तर्क-प्रमेय-रत्नानां मञ्जूषा टिप्पणी ध्रुवन्
सा मञ्जूषायते तस्मादञ्जसाऽधीतवानिमाम् ॥१४४॥

तत्पञ्चलक्षणीग्रन्थे व्याप्तितत्वं प्रपञ्चितम्
एकाक्षरमनुच्चैर्वाऽशिक्षत सदाशिवः ॥१४५॥

सार्वभौम-परिष्कारमाविष्कुर्वन् स्ववाग्गणैः
सदाशिवस्तदा दृष्टो साक्षादिव गदाधरः ॥१४६॥

स चतुर्दशलक्षण्यां चातुर्यं चाप लक्षणे
तत्कूटघटिते कूटाघटिते पाटवं सुधीः ॥१४७॥

स मिश्रलक्षणे मिश्रैः पाठिते पठिते स्वयम्
विलक्षणं विश्रुतं च वैचक्षण्यं धियाऽप्तवान् ॥१४८॥

सिद्धान्तलक्षण–प्रोक्त-व्याप्तिसिद्धान्तमद्भुतं
प्रबुद्धबुद्ध्या सञ्जज्ञे विद्वत्वं चाध्यगात् स्वयं ॥१४९॥

पक्षता शिक्षिता तेन क्षत-पण्डित-धी-मदा
प्रेक्षया रक्षिताख्याता पक्षता प्राणघातिनी ॥१५०॥

व्याप्त्यौपयिकतत्पञ्चावयवानां प्रपञ्चकं
ग्रन्थं चावयवं शास्त्र–ग्रन्थि बुद्ध्या ममन्थ सः ॥१५१॥

शतकोटिमुखानेक कोटिक्रमसमन्वितम्
गुरोः सत्प्रतिपक्षाख्यं ग्रन्थं जग्राह सूक्ष्मधीः ॥१५२॥

यत्सामान्यनिरुक्तेस्सा बच्छाज्ञोक्ता परिष्क्रिया
विद्वत्सामान्यदुर्बोधा ज्ञाताऽधीताऽत्मसात्कृता ॥१५३॥

व्युत्पत्तिवादे शास्त्रीयव्युत्पत्तिं प्राप्तवानसौ
तर्कव्याकरण यत्र शब्दव्युत्पादनेऽन्वितौ ॥१५४॥

शक्तिवादे शब्दशक्तेः स्वरूपं महदद्भुतम्
शक्तः सम्यक्तया ज्ञातुं गुर्वनुग्रहतोऽभवत् ॥१५५॥

नमः प्रामाण्यवादायेत्यादृतं तार्किकैर्बुधैः
ग्रन्थं पपाठ दुस्तर्क्य-वाक्य-क्रम-विसंष्ठुलम् ॥१५६॥

प्रत्यग्रोदर्क-तर्कोच्चकोटिक्रम-पराक्रमं
चक्रे विक्रम्य वक्रोक्ति-प्रक्रियाक्रमविद् बुधैः ॥१५७॥

एवं सिद्धान्त कौमुद्यां वैशारद्यमवाप सः
तर्काध्ययनतो लब्ध-धी-वैशद्य-विजृम्भितः ॥१५८॥

वैय्याकरणमञ्जूषामात्रजस्येनावबुद्धवान्
(पद)मञ्जरी-सञ्जरीजृंभच्चातुरी-वैखरी-युतः ॥१५९॥

शब्देन्दु शेखरे चासौ चन्द्रशेखरजाशिषा
प्रखरां वैदुषीं लब्ध्वा वाक्यार्थे मुखरोऽभवत् ॥१६०॥

महाभाष्यस्य सौरस्यं स्वारस्यं सरहस्यकं
विशिष्यास्वाद्य वदुष्यमदूष्यं समवीपदत् ॥१६१॥

तर्के व्याकरणे चैवं प्रभुत्वं चाप्य पाण्डितीं
सभावाक्यार्थ कौशल्यमतुल्यं समवाप सः ॥ ॥१६२॥

इयतापि महतापि शास्त्राध्ययनेन, तर्कपाण्डित्येन, व्याकरण-वदुष्येण, साहित्यविद्वत्तया च न तृप्तिरभूत्सदाशिवस्य। न मनागप्युपशमिता तस्य ज्ञानपिपासा। काश्यां यच्चयावत् शास्त्रीयज्ञानस्य भाण्डा(गा)रं विद्यते तत्सर्वमपि स्वस्य मेधामञ्जूषायां भरणीयं धारणीयं चेति कृतवानासीत् स सङ्कल्पं निर्विकल्पमनल्पम्।

तदनुसारेण सः साङ्ख्यकारिकां, तन्त्रवार्तिकं साङ्ख्यतत्वकौमुदीम् अन्यांश्च विशिष्टसाङ्ख्य ग्रन्थानधीत्य सदाशिवः अचिरादेव काशीगता-सङ्ख्य-साङ्ख्य-शास्त्र-सङ्ख्यावत्सु प्रामुख्येन परिगणितो वभूव।

एवं पूर्वमीमांसाया अर्थसङ्ग्रह-मीमांसान्यायप्रकाश-आपोदेवी-शाबरभाष्य-जैमिनीयन्यायमालादि नैकामूल्योच्चकोटि-ग्रन्थरत्नानि अधीत्य मीमांसा-ज्ञानमांसलमतिः सदाशिवः मीमांसामनीषी इति वाराणस्यां प्रशंसितः समभूत् पण्डितोत्तंसैः।

अन्ते च अमुना दक्षेण दाक्षिणात्य छात्रेण ब्रह्म-मीमांसा-शास्त्रमपि महता प्रावण्येन शिक्षितं, प्रावीण्यमप्यासादितम्। शङ्कर-रामानुज-मध्व-भाष्याणि टीकाटिप्पणी सहितानि अभ्यस्य, भगवद्गीता उपनिषदः अपि सव्याख्यानाः सम्यग्विज्ञाय, प्रस्थान-त्रय-पाण्डित्यमनितर-साधारण-मेव मेधाविनामग्रेसरेण सम्पादितं सदाशिवेन।

एवमध्यात्म-शास्त्राकृष्ट-चेतसः वेदान्त-तत्वज्ञान-वशीकृतात्मनः तस्य कर्णाटकछात्रस्य निरन्तर-तात्विक-ग्रन्थ-मन्थन-चिन्तनैः शिवतत्व-निदिध्यासनेन श्रीशिवकुमार-पण्डित-सदृश पण्डितपरिषच्चक्रवर्ति-सत्पुरुष सहवास-महिम्ना च उदियाय हृदये वैराग्यभाग्यम्।

"सुखमात्यन्तिकं यत्तद् बुद्धिग्राह्यमतीन्द्रियमिति" गीतोक्तिमेव मनसि ध्यायन् सदाशिवः परंज्योतिः स्वरूपिणः परात्पर तत्वभूतस्य परमात्मसत्वस्य प्राप्तिरेव स्वजीवनस्य परमं ध्येयमिति निश्चिकाय। अत्यन्तं हेयतमस्य, क्षणभङ्गुरस्य, अविद्याकल्पितस्य, परिदृश्यमानस्य, प्रपञ्चस्य, अहङ्कार-ममकार-मय-माया-जाल-मोह-पाशं विच्छिद्य ससारमसारमिति सविद्य ततो निर्विद्य च निरन्तर-निरञ्जन-परञ्ज्योति स्समुपासने भगवत्तत्व-भूत-परमेश्वर-समाराधन एव स्वकीयं संपूर्ण-मायुः व्ययीकर्तव्यं, भगवत्कार्यार्थमेव च स्वस्य समग्रजीवनं समर्पणी-यमिति च निरणैषीत् वैराग्य-भाग्यमासाद्य वीत-सांसारिकमोहः सदाशिवः।

काशीमागत्य सर्वे यात्रिकाः शाक-पाकादिषु किमप्येकं परित्यजन्ति वैराग्यस्य प्राथमिकपाठमभ्यसितुं कृच्छ्रात्प्रयतन्ते च, परं तु सदाशिव भव-भवन-भुवन-गत-भवेतर-सकल-भाग्य-भोग्य-भोज्य-साम्राज्यमेव त्याज्यं मन्यमानः धनं निधनं. निलयं प्रलयं, अशनं व्यसनं, नारी मरिं, बन्धून् अन्धून्, वस्त्रं घोरास्त्रं, हारं प्रहारं, कीर्तिमार्तिं, गौरवं रौरवं, विहारं संहारं, प्रतिष्ठां विष्ठां, विषयान् विषं, भोगान् रोगान् पापं हीनं नूनं भावयन् सर्वसङ्गपरित्यागमेव कर्तुं सङ्कल्पं चकार चन्द्र-शेखर-चरण-चन्द्रिका-चकोरायमाण चेतसा।

एवं कतिपयेष्वेव वर्षेषु शास्त्र-पाण्डित्यस्य परामेव काष्ठामधि-तिष्ठता वैदुष्यवरिष्ठन, गुरुकुलगरिष्ठेन, वैराग्यमहिष्ठेन, संस्कृतसंस्कार साधिष्ठेन, विद्वत्प्रष्ठेन तेन वाराणस्यामध्येतव्यं सकलमप्यधीतं, ज्ञातव्यं समस्तमेव ज्ञातं, ध्यातव्यं मुख्यतया ध्यातं वीतमोहेन चित्तेन पूत-विश्वनाथ-पद-सरोजातम्।

एवं निर्वर्तितकाश्यागमन-सर्व-कृत्यः संस्कृत-ज्ञानभण्डारमेवशिरसा वहन सरस्वतीपूर्ण-प्रेम-पात्र-सत्पुत्रायमाणः सदाशिवः अखण्ड-भरत-खण्ड-

गत-भगवत्सन्निधानोपेत-सकल-पुण्यारण्य-तीर्थ-क्षेत्राणि दृष्ट्वा तत्र-तत्र स्थित-भगद्रूपाणि साक्षात्कर्तुमाचकांक्षे ।

ईशाध्यासित तीरवासिजनतांहोऽराशिसंनाशिनी
काशी यत्र विलालसीति च गयाक्षेत्रं प्रबाभात्यहो
केदारी बदरी पुरी च मधुराऽयोध्या च मायावती–
त्यादिक्षेत्रयुतं च भारतमिदं दृश्यं ह्यवश्यं मया ॥१६३॥

सिन्धुर्ब्रह्मसुता च फल्गुसरयू श्रीशर्मदा नर्मदा
गोदावर्यपि कृष्णवेण्यह हसास्यन्दीति यत्रापगा
गङ्गोत्तुङ्गपतङ्गजामुखतरङ्गिण्यम्भसाँ सङ्गमैः
यत्प्रेक्ष्यं हृदयङ्गमं भरतभू शृङ्गान्तरङ्गाङ्गणम् ॥१६४॥

पुण्यारण्यगणैश्च सुन्दरतरैः श्रीशादिसन्मन्दिरैः
क्षेत्रैरप्यतिमात्रपावनतरं सत्तीर्थसार्थैर्युतम्
निष्यन्दन्मकरन्दरस्यसलिलाभिः सिन्धुभिर्बन्धुरं
श्रीमद्भारतदेशमद्य शनकैः पद्भ्यां चराम्यत्र्जसा ॥१६५॥

इति कृतवान् संकल्पं सदाशिवः ।

इति तृतीयस्तरङ्गः

॥ अथ चतुर्थस्तरङ्गः ॥

अध्यात्मविद्याध्ययनं सन्तत-वेदान्त-ग्रन्थ-ग्रन्थि-मन्थन-चिन्तनादिकं च बाल्यत एव विरक्त-प्रकृतेः सदाशिवस्य पूर्णत एव मनश्चकार– शिवोन्मुखम् । तत्रापि शिवव्रत-शिवोपासन-शिव-निदिध्यासनैक-व्रतानां-ज्ञाननिधीनां तपस्समृद्धानां वयोवृद्धानां पण्डितमण्डलाखण्डलानां श्रीशिव-कुमारसदृशानां शिवयोगिनां सहवासप्रभावेण विशेषतश्च प्रस्थान-त्रय-भाष्याध्ययन-संस्कार-वशात् पूर्व - जन्म - कृत - निष्काम-कर्म -जनित-पुण्य-विशेष-परिपाक-वशाच्च शिवेतरत्सर्वमनाश्वास्यमनाशास्यमप्रशस्यं चेत्य-भात्सदाशिवस्य ।

शिवादेव शिवाकांक्षी वीरशैव इति स्मृतः
अशिवं मन्यते सर्वं त्याज्यं चैव शिवेतरत् ॥१६६॥

ईदृशः शिवैकदृशः शिवयोगिनः केदारादारभ्य कन्याकुमारीपर्यन्तं सुविस्त्रते अखण्डेऽस्मिन् भरतखण्डे साधुसत्पुरुषाः सन्तो महन्तः साक्षात्कृ-तभगवन्तोऽनुभाविनः यत्र यत्र सन्ति यावन्तः सन्ति तत्र तत्र गत्वा तेषा-मशेषाणां शेषाहि-भूषा-मणि-विशेषानुग्रह-जुषां धर्मपुषां अध्यात्म-साधन व्ययीकृतवपुषां विदुषां शिवैकनिष्ठानां साधुप्रेष्ठानां सन्दर्शन-सम्भाषण-सहवासादिभिः आत्मा पावनतां नेय इति समुदभूत्समीहा मनीषिणस्तस्य मनसि ।

पवित्र-क्षेत्र-पात्रात्मा तीर्थसार्थैः सुरार्थितः
भारतोऽगण्य-पुण्यश्री-भारतो भाति भूषितः ॥१६७॥

तीर्थ-कोटि-सहस्राणि पुण्य-क्षेत्र-शतानि च
देशे देशे स्थितान्यत्र प्रत्यादेशेंऽहसां नृणाम् ॥१६८॥

पादौ क्षेत्रोपसादौ यौ सखेदावपि तृप्तिदौ
पुँसः सार्थक्योपपादौ त्रपादौ तौ न चेत्तथा ॥१६९॥

क्षेत्राणि सर्वदेशेषु प्रतिक्षेत्रं शिवालयः
तत्तत्र शिवसान्निध्यं सर्वं शिवमयं जगत् ॥१७०॥

तत्र सर्वत्रगं साक्षात् शम्भुं साक्षात्करोम्यहम्
शवो वा पाशवो वात्मा शिव दर्शन वर्जितः ॥१७१॥

एवं सञ्चिन्त्य निश्चित्य प्रोत्थितः स सदाशिवः
सदा मुदा हृदा चैव सदाशिवमनुस्मरन् ॥१७२॥

विपश्चिदपश्चिमोऽयं एवं निश्चयमणिं मनो-मञ्जूषिकायां निक्षिप्य पुनरप्येकदा क्षराक्षर-गुरुं स्वाधिक्षेप-दत्त-दीक्ष-दक्ष-शिक्षण-दक्षं लालाटिकाक्ष-कुण्ड-सन्धुक्षिताशुशुक्षणि-स्फुलिङ्गाशु-विक्षेप- तत्क्षणोन्मथितमन्मथं त्रिभुवन-रक्षो-शिक्षाऽनुजिधृक्षापेक्षा वह सकरुणेक्षणं मोक्षाद्यपेक्षा-विषय-प्रदान-क्षमं भगवन्तं दाक्षायणी-पतिं काशी-क्षेत्राध्यक्षं त्र्यक्षं प्रत्यक्षमभिवीक्ष्य तत्क्षणादेव सद्यस्फूर्ति-समुत्पद्यदनवद्य-पद्य-पद्धत्यां भक्तिभावोद्रेकेण उपश्लोकयांचकार–

काशीवासि शिरो-विलासि-तुहिनांशूद्भासि भक्तहृदा–
काशोल्लासि च चित्प्रकाशि करुणाल्वाकाश-केशि स्फुरत् ॥
नन्द्यध्यासि जगत्प्रशासि भजतां पापप्रणाशि ज्वलत्–
क्ष्वेलाप्राशि कृपाम्बुराशि हृदयस्याश्वासि भूयान्महः ॥१७३॥

गङ्गोत्तुङ्ग-तरङ्ग-सङ्घ-नटना-रङ्गोत्तमाङ्गोज्ज्वलं
गण्डोच्चण्ड-शिखण्ड-मण्डल-लसत्खण्डेन्दु-भा-मण्डितम्

फूत्कुर्वद्-घटसर्प-वेष्टित-शिरःकण्ठ-प्रकोष्ठोरसं
नन्दिस्यन्दनमन्धकान्तकमहं वन्दे शिवं दैवतम् ॥१७४॥

फालान्तर्नयनात्त्वलोज्वलशिखाङ्गारस्फुलिङ्गौघसं-
दग्धो मुग्धवपुः स्मरोऽभजदनङ्गत्वं च भङ्गान्वितः
यस्याङ्गानि भुजङ्गपुङ्गवगणः शृङ्गारयत्यन्वहम्
तद्गङ्गाधरमङ्गलाङ्घ्रियुगलं ध्यायामि गायामि च ॥१७५॥

श्रुति-स्मृति-मधुव्रत-प्रसृत-वर्णनागुञ्जने
नभोऽङ्गण-तरङ्गिणी-सलिल-साधिताभ्यञ्जने
हरे मदनभञ्जने गिरि-सुता-मनो-रञ्जने
मनो मम निरञ्जने विशतु सत्कृपाव्यञ्जने ॥१७३॥

लक्ष्मी-प्रेम-कटाक्ष-वीक्षण-कृपाऽकांक्षी स चाधोक्षजः
ब्रह्माऽसावपि भारती-रतिरतश्चेन्द्रः शची-लम्पटः
केली-क्रीडनका हि यस्य विबुधाः सर्वेऽपि गर्वोद्धतं
कन्दर्पं गत-दर्पमाकलयते शम्भो नमस्तेऽस्तु ते ॥१७७॥

क्षुब्ध-क्षीरधि-मन्थन-क्षण-भवत्क्षोणी-दिधक्षन्मयुरु-
क्ष्वेलाऽन्वीक्षणतत्क्षण-क्षयभयोद्विग्ने च भग्नोद्यमे
तद्वृन्दारक-वृन्द एव हि भिया सङ्क्रन्दने क्रन्दति
योऽपात् क्ष्वेलमपात्सुरासुरगणं चापायतस्ते नमः ॥१७८॥

तारेशार्भ-सुखासिकायित-जटा-जूटावटं धूर्जटिं
तारार्थं भवतारकं च तरणीन्द्वक्ष्युल्लसत्तारकम्
दृप्यत्तारक-वैरिमारक-गुरुं प्रेमोत्सुकोमा-सती–
तारामैत्रक-नन्दितं ननु नमस्कुर्मोऽद्य नागाजिनम् ॥१७६॥

एवं निगमागम-संस्तुतं खगवाहनेडितं मघवदादि-सुर-गण-वन्दित भगवन्तमघहन्तारमगजाधवं वाराणसीवासिनं विश्वनाथं सद्यः-स्फूर्ति-निबद्ध-नैक-लोकंपृण-श्लोकैः सम्प्रार्थ्य सदाशिवः प्रातिष्ठत तीर्थ यात्रायै । ततः अभिनवगुप्त - मम्मट - कल्हण - क्षेमेन्द्रादि - कवि-तल्लज कुलभवनायमानं निसर्ग-सौन्दर्य-समाकृष्ट-सहस्राधिक--वैदेशिक-यात्रिक सन्दोहं काश्मीरदेशमुपजगाम ।

कस्तूरिका-कुङ्कुम-केसरादि-सद्वस्तु-विस्तारितकीर्तिपूर्तिम्
काश्मीरदेशस्य निसर्गशोभां स विस्मितोऽभूत् निपुणं निरीक्ष्य ।।१८०।।

तत्र च अति प्राचीनानि शिव-सान्निध्य-समीचीनानि स्थापत्य-विज्ञान-कौशल्य-निदर्शन-निकेतनानि देवतायतनानि, विशाल-देश-मध्यावकाशे च समुल्लसन्ति उत्फुल्ल - कल्हार -समुल्हासितानि सौगन्ध-मकरन्द-सान्द्रारविन्दानि हंसोत्तंसावतंसितानि कारण्डव - मण्डली - मण्डितानि यात्रिक-सार्थ-मनोहराणि सरोवराणि, तत्र तत्र परिस्फुरतः समाकृष्ट-मधुकर-पुञ्जान् लताकुञ्जान्, सुरभीकृत-मलय-पवनानि नैकोपवनानि च, दृष्ट्वा भृशं प्रासीसदत् सदाशिवः ।

निरन्तर - पतद्धिमानी - समानीत - शुभ्र - सौदामिनी - तिरस्करिणी-कामनीयक-सुमनोहरस्य काश्मीरदेशस्य सान्द्र-सौगन्ध-श्रीगन्धादिनैक नीरन्ध्र-तरु-वृन्दान्धकारित-दशदिशान्तरालं प्रकृति-सौन्दर्यागरं समुपा--गमत् श्रीनगरम् ।

ततः काश्मीर मण्डलस्य अतिसुन्दराणि पुष्कल-पुष्प-राशि-सौगन्ध-सौन्दर्य-बन्धुराणि, वनकन्दराणि, अन्यान्य-प्रमुख-स्थानानि सञ्चारक्रमेण अन्वीक्ष्य परामर्मश तद्देशस्य स्थितिं गती । अतिप्राचीनकालादारभ्यैव तस्मिन् देशे प्रवृद्धः प्रवृत्तश्चासीद् हिन्दूधर्मः । परिशुद्ध शैवसम्प्रदायस्य अधिष्ठानभूतं उगमस्थानायमानं चासीदयमेव देशः । तस्मिन्नेव हिन्दू धर्मस्य मुख्यकेन्द्रे यवनधर्मस्य अत्यधिकतरवेगेन बोभूयमानं प्रचण्डतरं

प्रसारं प्रभूततमं च प्रचारं दृष्ठ्वा दूरदर्शिनः, सूक्ष्मप्रज्ञस्य विलक्षण प्रेक्षावतः भविष्य-भेदि-बुद्धि-समृद्धि-समेधित-मेधा-महितस्य सदाशिवस्य चुक्षोभ चित्तं, चकम्पे शिरः चेखिद्यते स्म आत्मा। हिन्दूनां हिन्दूधर्मपीठाधिपतीनां लौकिकानां च सामाजिकानां विचारशून्येन औदासीन्येन, गलितौचित्यप्रज्ञया सामूहिकावज्ञया, वस्तुस्थित्यज्ञानान्धैर्नकाव्यवहार्यनिर्बन्धैश्च प्रतिदिनं प्रतिक्षणं च सहस्राधिका एव हिन्दूबन्धवः धूर्त-स्वार्थि-यवन-प्रदर्श्यमान महिळामदिरामिषाद्यामिषमिषात् क्वचित् धन-सदन-सुदती-सुवर्ण-क्षेत्र-पात्रादि – प्रलोभनैः, क्वचित् बलात्कार-धिक्कार-प्राणापहारादिविभीषिकादिभिश्च धृष्टा भ्रष्टा आक्रष्टाश्चभूत्वा यवनधर्मं सङ्घश एव स्वीकुर्वन्ति स्म। अयं धर्मान्तरप्रवाहः हिन्दुभिः काले प्रबुद्धैः यदि नेदानीमेव प्रतिषिद्ध्येत प्रयत्नपुरस्सरं यदि वा न प्रतिबद्ध्येत तदा अचिरादेव पवित्रहिन्दुधर्मस्य केन्द्रभूतमिदं काश्मीरमण्डलं यवनमयं सम्पत्स्येत। भगवान् अगजापतिः हिन्दुषु जागरूकतामादाधातु इति सम्प्रार्थयन् सञ्चचार काश्मीरप्रदेश परिसर भुवि।

यःश्रीखण्ड-शिखण्डाढ्यः शशिखण्डाङ्क-मण्डितः
स काश्मीराख्य-भूखण्डः च्युत-स्वःखण्डवद् बभौ ॥१८१॥

कस्तूरी-केसर-क्षौम-कुङ्कुमाद्युद्गमस्थले
सौगन्धं सङ्गतं दृष्ट्वा सौन्दर्येण ननन्द सः ॥१८२॥

उल्लोलसरितां वीचीकल्लोलेषूल्लसंत्यहो
लसत्पुराणि काश्मीरे दृष्ट्वाऽसौ विस्मितोऽभवत् ॥१८३॥

तच्छ्रीनगर सौन्दर्यश्रियो दिवि दिदृक्षया
नूनं स्वर्णगरी तद्वन्निर्मिता विश्वकर्मणा ॥१८४॥

थलरामण्यकेनात्र जलरामण्यकं सुधीः
मलितं चातुलितं दृष्ट्वाऽमन्दानन्दमविन्दत ॥१८५॥

शैवदर्शनगङ्गोत्रीं काश्मीरावनिमेत्य सः
वीरशैवागमोद्भूति-सद्भूमिं मुमुदे शिवः ॥१८६॥

एवमेव आसेतुशीताचलपर्यन्तमखण्डे भरतखण्डे विद्यमानानि हरिहरादि सुरवरसान्निध्येन परमपवित्राणि सकल-सुरासुर-सिद्ध-मुनि मनुजातिशयित - भक्त्यादर-पात्राणि अगण्य - पुण्य - सस्याभिवर्धन-क्षेत्राणि अतिमात्रपवित्राणि नाना क्षेत्राणि, पावित-पातकि-सार्थाणि प्रसाधित–पुरुषार्थाणि, प्रहापित-नरकाद्यनर्थाणि पुण्यतीर्थाणि, गोपुर-गरुडस्तम्ब विमान - शिखराग्र - स्पष्ट - स्पृष्ट - ग्रहतारा - चन्दिराणि शिल्पसुन्दराणि, नैकानि शिवमन्दिराणि, अन्यान्यानि च प्रेक्षणीयानि देवतायतनानि दर्शनीयस्थलानि, नमनीयपुण्यधामानि, गमनीयपावनस्थानानि च दश दर्शं साधुसज्जनमहापुरुषाणां स्पर्शं स्पर्शं चरणनलिनानि पवित्रीकृत-काय करणः प्रसन्नान्तःकरणः शिवभक्तिस्फुरणः परिसमापित भारत-भर-सञ्चरणः तीर्थयात्रासार्थकीकृत-चरणः सर्वदा सर्वत्रापि समाचीर्ण हरगुरु परिचरणः भगवदैकशरणः नवतरुणः सदाशिवः पादोपान्त-सम्पाति नलिम्प - पति - मुकुटमणि-गुम्फ शम्पाभ-निष्कम्प-रोची-राजि-सम्पादित-नीराजना-विधेःपम्पाध्यक्षस्य विरूपाक्षस्य सकल-सम्पन्निदानेन सन्निधानेन अतिमात्रं पवित्रं पम्पाक्षेत्रमुपागमत् हम्पीपुरीम् ।

पुरारिमण्डिता या पूः कौबेरी-नगरी-श्रियः
प्रहासकरीव स्म जरीजृम्भीति शोभया ॥१८७॥

पम्पेश-मौलि-चन्द्र-त्विट्–
शम्पा-सम्पादित-श्रिया
या नैलिम्प-पुरी-शोभा–
सम्पद्गर्वं विलुम्पति ॥१८८॥

यदुत्सङ्गाङ्गणं तुङ्गा
शृङ्गारयति सर्वदा

श्रीकरैः शीकरैर्वारां
तारङ्गै रङ्गवल्लिभिः ॥१८९॥

कैलासं च निजावासम्
उमां प्रियतमां त्यजन्
आवासं कुरुते यत्र
शिवो लोकशिवः सदा ॥१९०॥

यत्क्षेत्रपाल-शिखि-फाल-विशाल-चेतः-
कूलङ्कषोरु-करुणा-रस-वाहिनीव
तुङ्गाऽम्बु-गाहि-नर-देहि-कृतार्ऽतिभङ्गा
गङ्गाऽपगेव वहतीह ललत्तरङ्गा ॥१९१॥

यत्रास्ति तुङ्गा विलसत्तरङ्गा
पापौघभङ्गा महिमातितुङ्गा
वराहदेवाङ्ग-गिरीन्द्र-शृङ्ग-
सङ्गात्तगङ्गाधिकसौभगाढ्या ॥१९२॥

विद्यारण्य-महारण्याद् जातः शौर्य-दवानलः
निर्दग्धानकरोत्सर्वान् यवनाख्यविषद्रुमान् ॥१९३॥

पम्पेत्येतत् स्वनाम्नो या विपरीतं न मर्षति
पापं तस्मात्क्षणाल्लोपं पम्पा प्रापयति ध्रुवम् ॥१९४॥

त्रेतायुगात्परं यत्र हुक्कबुक्केति भूमिपौ
सम्प्रावर्तयतां पूर्वं रामराज्यं पुनः क्षितौ ॥१९५॥

विद्यारण्यस्य ब्रह्मश्रीः हुक्कराज बलान्विता
हिन्दुत्वस्य परित्राणं व्यधात्क्षीणं रिपोर्बलम् ॥१९६॥

पुरा हरिहरावेकीभूयाऽभिन्तां महासुरम्
तद्वत् हरिहरो ब्रह्म-अत्रशक्त्याऽबधीद्रिपून् ॥१९७॥

विजयानुगतः कृष्णदेवो देवबलान्वितः
प्रावर्तयद्धर्मचक्रं साक्षात्कृष्ण इवापरः ॥१९९॥

कृष्णोऽपि रामराज्यं यः प्रास्थापयदिळातले
न स्वयं तु रिपूनेव वनं प्रास्थापयद्बलात् ॥१९८॥

शुष्कास्तुरुष्का यद्भीत्या यवना वनमाविशन्
हूणाश्च विगतप्राणाः बर्बरा भयनिर्भराः ॥२००॥

श्रीकृष्ण देवरायाख्ये भूपाले शासति क्षितिम्
कृष्णास्याः वैरिणः सर्वे भीता भूताः पलायिताः ॥२०१॥

बुक्के स्वकीर्तिसम्पूर्तदिक्के पृथ्वीं प्रशासति
कां दिशं याम चेत्यायन् रिपवः कान्दिशीकताम् ॥२०२॥

एवं भारत-भू-सीमन्तिनी-सीमान्तर-मणिभूषणायमान-सामन्त भूमीकान्त-मौलि-मण्डित-मणि-मुकुट-प्रत्युप्त-नूत्न-प्रत्न-रत्न-राशि-रोचि, वीची-राजिनीराजित-पादपीठानां विजयनगर-पुरी-साम्राज्य-शासन-धुरीणानां धैर्यौदार्य-शौर्य-चातुर्यादि-गुणविशेषैः प्राचीन-मान्धातृनहुषा-म्बरीषादि-भूपालनिर्विशेषाणां सर्वसर्वंसहा-पालन-निर्वहण-धूर्वहानां कर्णाटकोर्वी सार्वभौमाणां हुक्क-बुक्क-नरसिंह-कृष्णदेवराय-रामराय प्रभृतीनां सन्तत-प्रवर्तित-वैरिवनिताविलापेन विहित-स्वप्रजाकोटि दारिद्र्य-दैन्यदुःखलोपेन सत्रजनित-वैरिकुलोपतापेन [illegible] प्रतापेन निर्जितो तर्जितश्च गुर्जर देशः ।

अङ्गाश्च रणरङ्गासादित-भङ्गाः, कलिङ्गाः विच्छिन्नाङ्गाः, वंगाः आनमितोत्तमाङ्गाः, चेलाः परिधापित-निचोलाः, भस्मीभूतास्मिता

तृण-भस्म-मृत्कण-घस्मराः काश्मीराः, पञ्चत्वमापादिताः पाञ्चालाः, दुःखसान्द्रा आन्ध्राः, स्फुटित-ललाटाः लाटाः, विगलित-प्रत्युत्थानाशालवा प्रकृतिपेलवाः मालवाः, उत्तप्तचुल्लीमुख-प्लुष्टभ्राष्ट्रा इव महाराष्ट्राः, प्रणष्ट-जिजीविषा-तरळाः मृतावशिष्टाः विरळविरळाः केरळाः, शस्त्राघातैः सन्धि-बन्धशिथिलाः मैथिलाः, छिन्न-पाद-शिरोधरोष्ट्रा इव सौराष्ट्राः अगाध-शोकबाधाः गृहीतवेधाः इव मागधाः ।

किं बहुना अमीभिः विजय-नगर-सम्राजैः निर्जितं समस्तमेव धरातलम् ? तर्जितं वैरिकुलम् । आत्मासात्कृतः सर्वोप्यधिकारः । आक्रान्ता चतुःसागरपर्यन्ता भूकान्ता । राशीकृतमैश्वर्यं । कोशीकृता मणिमुक्तारत्नादि निधयः । दासीकृताः विपक्ष-धरा-रमण-रमणीय-रमण्यः । स्वायत्तीकृतं सर्वंसहागत-सर्वोर्वीपति-सारसर्वस्वं ।

एवं वीर-विक्रम-क्रम-वशीकृत-समस्त-वसुन्धरा-भर-समानीत-प्रशस्त-वस्तुसार्थैः अलङ्कृता विजयनगरी । संवर्धितं साम्राज्यवैभवम् । सुसम्पन्नः कृतः राज्यभाण्डारः । सम्पूरितः राज्यनिधिः । शृङ्गारितानि भर्म्याणि हर्म्याणि । विलुण्ठितः कौबेरोऽक्षयनिधिः । विपणिषु नियन्त्रिता कीलिता, शृङ्खलिता च लक्ष्मीः ।

सर्वं एव विजयनगर प्रदेशः तदानीं हेमकूट इव रत्नसानुरिव मणिमन्दिरम् इव मौक्तिकमेरुरिव प्रत्यभात् । विजयनगरगतानि सर्वाण्यपि आयतनानि नारायणशरीराणि इव लक्ष्मीनिकेतनानि आसन् । प्रतिगृहं मणिमयकुट्टिमाः, सुवर्णस्तम्भाः, वैडूर्यवेदिकाः, चन्द्रकान्तचर्चिताः-चन्द्रशालाः, गोमेधिकालङ्कृता गवाक्षाः, मरकतघटितानि सोपानानि, मुक्ताजालयुक्तानि मणिमण्टपानि, सूर्यकान्तसुसम्पन्नाः पाकशालाः, रत्नसाराणि अन्तःपुराणि सन्दृश्यन्ते स्म ।

एवमपार-सम्पत्पारावार-पोपूर्यमाणं क्व तदानीतनं विजयनगरं क्व वा अद्यतनं छिन्नमूर्तिकं भिन्नगोपुरं भग्नप्रावरणं भुग्नाट्टालिकं

मृण्मयविमानं धूलिसाद्भूतग्रामस्तोमं प्रभ्रष्टमन्दुरं उध्वस्त-सुन्दर मन्दिरं सावसादप्रासादं विपन्नविपणि विकृतचत्वरं प्रणष्टप्राकारं गलित-गवाक्षं विघट्टितकुट्टिमं समास्कन्दितपिच्छन्दकं सिद्धान्तशुद्धान्तं सकण्टक विटङ्कं विमर्दितवितर्दिकं विघटितकवाटं विस्खलिततोरणं विशीर्ण-गजशालं विकृत्तनृत्यमण्डपं वित्रुटितनाटकमञ्चं प्रस्फुटितवेश्यावाटं विदारिताग्रहारं चूर्णीभूतराजभवनं जीर्णारण्यमिव स्मशान स्थलमिव उच्चाटितग्रामवत् शून्यशून्यं हम्पीति कोम्पीति वा सवैलक्ष्यं व्यवह्रिय माणं पम्पानगरं ।

यत्र हरिहर-बुक्क-विरूपाक्ष-मल्लिकार्जुन-राजशेखर-साळुव-नरसिंह-वीरनरसिंह-कृष्णदेवराय-अच्युतराय-प्रभृतयः पार्वण-शर्वरी-शसितयशसः सर्वोर्वीपतिचक्रचूडामणयः सार्वभौमाः सगर्वं सच्छत्रचामर सञ्चरन्ति स्म तस्मिन्नेव भग्नावशेषे विजयनगरे अद्य शिव शिव श्रृगालाः सारमेयाः हन्त आहिण्डन्ते ।

यत्र च तुङ्ग-प्रज्ञाभर-विस्मापिताङ्गिरसाः यतिपुङ्गवाः पण्डितपुण्डरीकाः, गानगन्धर्वाः कलाकलाधराः सङ्गीतगङ्गाधरा शिल्पिसार्वभौमाः ज्योतिर्मार्तण्डाः राजगौरवमासाद्य यक्षेश्वर सदृक्षां-लक्ष्मीं अधिगत्य सोत्साहं इततस्तो वलन्ते स्म तत्रैव करालकाल कवलीकृते शीर्णचूर्णे पम्पापुरे-

काका घूकाश्च भेकाश्च स्वं राज्यं स्थापयन्ति हि
वृश्चिकाः पन्नगाश्चैव शशकाः सञ्चरन्त्यपि ॥२०३॥

यत्र पूर्वं अपूर्व-सौन्दर्य-शालिन्यः सुगन्धपुष्पमालिन्यः रतिरूपिण्यः उर्वीतलोर्वश्यः रम्भारूपिरम्भोरवः मेनकामोहिकाः चित्रलेखा-प्रतिलेखाः अम्बा-प्रतिबिम्बाः कमला-विमलाः शारदा-विशारदाः गौरी-गौर्यः सुरुचि-सुरुचयः अहल्या-तुल्याः हार-हारिण्यः हीर-धारिण्यः कनक-कमनीयाः रत्नरमणीयाः चञ्चत्पाञ्चालिका इव इतस्ततः सञ्चलन्ति स्म सविलासं

सोल्लासं च चञ्चन्त्य इव चञ्चलाः नैकाः चञ्चलाक्ष्यः तत्रैव अद्य आक्रान्तवलभ्यः रासभ्यः गृद्ध्राश्च स्वैरं सञ्चरन्ति ।

पूर्वं यत्र गजाः तत्र अद्य अजाः तदा यत्र अश्वाः अद्य श्वानः, पुरा यत्र राजमहिष्यः तत्र अद्य महिषमहिष्यः, पुरा यत्र गन्धर्वाः तत्र अद्य गोमायवः, पुरा यत्र सङ्गीतं तत्र अद्य गार्दभगीतं, यत्र दम्पतीनां मधुरालापः प्राक् तत्र शिवानां घोरालापः, यत्र वेदमन्त्राणां मञ्जुघोषः तत्राद्य मिथः कलाहायमानानां शुनां भषणध्वनिः शोश्रूयते । हन्त कुटिलता कालस्य वक्रता च विधेः।

तदेतदन्यच्च दैशिकं विपर्यासं कालकृतं वैपरीत्यं च सुष्ठु निध्यायतः सदाशिवस्य मनसि समद्भूत् विचारः ।

अहो बलीयस्ता कुटिलस्य सर्वकलाकलापकालनस्य करालस्य कालस्य। सर्वत्र प्रभविष्णुरयं बलीयान् खलु कालः मरूकरोति नन्दनम्। स्थलीकरोति सागरम् । सर्षपीकरोति मेरुं तदेतदत्र करालकालकरक-वलीकृतं किमपि वस्तुजातं प्रपञ्चे नालम्बते स्थेमानम्। घनाघन मध्य-चमत्कुर्वच्चलाचल-चपला-चयाञ्चल-चञ्चले सकलेऽपि प्राणिकुले वृथैव खलु जीवजुषामेषां प्राणिनां मनुष्यव्यपदेशभाजां धन-कनक-गृह-क्षेत्र-पात्रादि - सम्पिपादयिषा-मनीषा । व्यर्थश्च मानवैः तदर्थं दिवारात्रं अगणितकायक्लेशं अलक्षितात्मप्रयासं अनवरतं क्रियमाणः, करिष्यमाणश्च महाप्रयत्नः । तदेतत्सर्वं त्याज्यमेव नैव भोज्यम् । सर्वोप्ययमसारः संसारः मया हातव्यः नैवादातव्यः विषयलम्पटैः संसारसारतया व्यपदिश्य-मानं वित्त-वनिता-वेश्म-लौकिकविद्या-वाजि-वारण-वाहन-वसुधा-वस्त्र-हेमादिकं सर्वं वर्जनीयमेव विवेकवता न तु कदाचित् समुपार्जनीयम् ।

अतः अहमपि अद्यप्रभृति भवात्पराङ्मुखो भवोन्मुखो भवबन्धात् विमुमुक्षामि । प्रविविक्षामि च तपोयोगम् । अनुबुभुक्षामि च मौक्तिकममन्दानन्दम् । तदर्थं च तमेव भवानीरस शरणमुपैमि । तमुद्दिश्यैव तपश्चरामि । तन्नाम स्मरामि

भवसिन्धुं तरामि । सर्वजनतादुर्वारदुःखराशिं च परिहरामि । पुरस्तात् मया महेश्वरप्रसादाय तपश्चर्याः एव कार्या नान्ये विषयाः अवधार्याः इति निर्धार्य तद्दिनादेवारभ्य भक्तिभराभिनुन्नः सदाशिवः "त्रिसन्ध्याः अवन्ध्याः व्यतानीत् स्नानजपादिभिः । प्रतिदिनं च अरुणोदयकिरण विकिरणापसारिततमस्तोमावरणे सुत्रर्गवर्णाभरणे तुङ्गासिन्नासुसुर–गणावतरणे ब्राह्मे मुहूर्ते एव उत्थाय–

तुङ्गोत्तुङ्गतरङ्गमङ्लतरे श्रीतुङ्गभद्राजले
स्नातः पूततनुः कृतान्हिकविधिर्भस्मावृतः सन् व्रती

ध्यायं ध्यायमुमापतिं ननु जपन् जप्यांश्च गौप्यान् मनून्
पम्पाध्यक्षसमक्षमेव च तपश्चर्यामुपाक्रंस्त सः ॥२०४॥

उग्रमुद्दिश्य चात्युग्रमव्यग्रस्तप आचरत्
व्याहारं व्यवहारं स्माप्याहारं तात्यजीति च ॥२०५॥

अशनं व्यसनं पुंसां तत्त्यागे व्यसनं महत्
रसनां बध्नताऽनेन नाशिताऽशैव नाऽशितम् ॥२०६॥

एवं विषयजालजम्बालाज्जुगुप्समाने धृतमौने मुनिसमाने तप आतिष्ठमाने सदाशिवे कदाचित् वसन्ते प्रशान्तमयः निशान्तसमयः । निशावसान - विकसदरविन्द - कुरुविन्द - माकन्द - पिचुमन्द - मन्दार - कोविदार - बन्धूककुन्द - नन्द्यावर्तादि - तरु - लता - वृन्द - मकरन्द-सौगन्ध - भारादिव मन्दमन्दं स्पन्दमानः गन्धवहः नन्दयति स्म जीवसन्दोहम् ।

विलसत्कञ्जादि-लता-कुञ्ज-निकुञ्ज-सम्फुल्ल-शेवन्तिका-मालती – मल्लिकादि-पुष्पपुञ्ज- स्यन्दमान-मकरन्द-बिन्दु-सन्दोह-पान-मत्त-मिलिन्द - वृन्दाङ्गीक्रियमाण-गीत-गुञ्जारवैः रञ्जित-सर्व-रसिकव्राते एकस्मिन सोमवासर-सुप्रभाते पम्पापति-देवस्थान-बहिर्वेदिकायां प्रस्तर-स्रस्तरे शयानः सदाशिवः स्वप्नशबलां कामपि उत्स्वप्नदशां अवागाहिष्ट

स्वप्नसाम्राज्ये विजरीहरीति स्म स्वच्छन्दं तच्चेतः । किमपि अत्याहितमिव उत्पश्यति स्म स्वात्मनः सदाशिवः । मृत्युग्रस्त इव आत्मनः आत्मा । मृतं च स्वं शरीरं कोऽपि उद्धृत्य रुद्रभूमिं नयति स्म । हा हन्त हतोऽस्मि, मृतोऽस्मि इति चीत्कुर्वन् प्रलपति विलपति स्म च दीनदीनं दुःखितः सदाशिवः स्वप्ने सकरुणोद्भ्रमसम्भ्रमपुरस्सरं

हन्तान्तको नयति मां मृत्युनात्याहितं मयि
अवसन्नो विपन्नोऽस्मि प्रपन्नः परमेश्वरम् ॥२०७॥

रक्ष रक्ष जगद्रक्ष त्र्यक्ष दक्षाध्वरक्षय
मृत्युञ्जयेश मां रक्षैतत्क्षणे मृत्युपाशतः ॥२०८॥

नमामि शङ्करं लोक शङ्करं मे प्रियङ्करम्
चन्द्राङ्कुरलसच्छीर्षं मृत्योरपि भयङ्करम् ॥२०९॥

भवं भवभवार्त्यद्रि दवं सर्वशिवं शिवम्
हरं पापहरं चेतोहरं रिपुहरं भजे ॥२१०॥

एहि त्राहि गुरो शम्भो पाहि मां हा हतं स्वकम्
त्वदन्यः कः शरण्यो मे कारुण्यादव मां शिव ॥२११॥

एवं उच्चैः उच्चार्य आक्रुश्य, विक्रुश्य, शिवशिवेति, हरहरेति साम्रेडं उद्घुष्य तारस्वरेण रुदतः सदाशिवस्य स्वस्यैव सान्द्र-जलद-वृन्द-मन्द्रध्वनिना समभून्निद्राभङ्गः । सममेव समघटिष्ट च भीकरतमः स्वप्नभङ्गः । तस्यां च तन्द्रावस्थायां उदतिष्ठद् उपाविशच्च गर्भागार-गत-विरूपाक्ष-मूर्ति-समक्षम् । अर्धोन्मीलितचक्षुषा पर्यैक्षिष्ट कमपि विलक्षणवर्चसं रुद्राक्ष-माला-परिलक्षित-वक्षसं ब्रह्मश्री-भासुर-तेजस्वि मुखमण्डलं चञ्चच्चारु-चामीकर-पिशङ्ग-जटामण्डलं विशाल-भाल-तट परिदृश्यमान-भस्म-रेखात्रय-भूषितं पावकमपि अनुष्णं, भास्वन्तमपि अतापदं, गुरुमपि सुराऽप्रियं, कविमपि अदेवद्वेषिणं, शङ्करमपि अनुग्रं,

पुण्डरीकाक्षमपि अलक्ष्मीलोलं, शारदापतिमपि अरजोमूर्ति, शान्तिसीमानं दान्तिधामैनं, भक्तिभूमानं महामहिमानं कमपि योगीश्वरम् ।

स च त्यागी विरागी योगीश्वरः स्निग्धेन चक्षुषा कमलमयीमिव वितन्वन् दिशं, ज्योत्स्नामयीमिव कलयन् भुवं, प्रसादमयमिव विरचयन् वातावरणं, प्रीतिमिव वर्षन्, अनुग्रहमिव विकिरन्, स्नेहरसेनेव क्षालयन् वात्सल्यभावेनेव उपस्नेहयन्, अन्तःकरुणवृष्टिमिव कलयन् एव दृक्शरासारलक्ष्यीकृतं सदाशिवं निरीक्षमाणः तत्समीपमुपाससाद ।

तत्क्षण एव तदभिमुखमागच्छतः प्रभापुञ्जपिञ्जरितज्योतिष्पुञ्जस्वरूपस्य स्वस्य सल्ललितपादपल्लवाग्रे निनंसया पिपतिषोः तस्य शिरसि स्निग्धपुण्डरीकोदरसोदरं, वरदकरं सादरं समर्पयन् सम्भृताम्भोभराम्भोधरकदम्बगम्भीरध्वानावधीरणधीरेण ध्वनिना समाश्वासयन् धैर्यमिव आदधानः प्रत्ययमिव उत्पादयन् विस्रम्भमिव समुपजनयन् प्रणष्टमिव जीवसत्वं प्रत्यानयन् उद्गारीत् योगिराजः ।

मा भैषीर्भद्र भद्रं ते न मृतोऽस्यमृतो ह्यसि
वत्स यावच्छतं वर्षान् भूतलेऽस्मिन्निवत्स्यसि ॥२१२॥

न यमोऽपि क्षमः स्प्रष्टुं त्वामाक्रष्टुं च किं पुनः
यमान् सनियमांस्त्वां हि सेवमानं चिरादिह ॥२१३॥

अद्य ते बुद्धिरुद्बुद्धा समृद्धिं सिद्धिरागता
विपुलं सुफलं लब्धं जपसत्तपसोः परम् ॥२१४॥

आत्मा विकासं हृदयं प्रकाशं
मनोऽप्युमेशं च वपुः प्रभावम्
ते प्राप्य धन्यं भगवत्प्रपन्नं
हृदि प्रसन्नं प्रबभूव मान्यम् ॥२१५॥

नाद्यप्रभृत्येव सदाशिवस्त्वं
साक्षात्सशम्भुस्त्वयि च स्वयम्भूः
प्रादुर्भवत्येव सुदुर्लभोऽसौ
त्वं शम्भुलिङ्गेश्वरनामवान्स्याः ॥२१६॥

नूनं ह्यनूनं च विमानमेव ज्ञानं समीचीनमथासमानम्
हरप्रसादात्प्रतिभाति तेऽद्य शार्वीयसार्वज्ञविकासयित् ॥२१७॥

पुनः पुनः स्पष्टमाचष्ट अप्राकृतानुत्कृष्टतेजोविशिष्टः महिमा–महिष्ठः सः योगिश्रेष्ठः समुच्छलद्वात्सल्यरसपरिप्लुतेन वचसा "वत्स सदाशिव न त्वं मृतः। किन्तु वास्तविकः तव आत्मविकासः अद्यैव सुसम्पन्नः। तव इच्छानुसारेण तावकीने हृदयमुकुरे ज्ञान-भक्ति-वैराग्याणां सम्पत्स्यते सम्पूर्तिः। अद्य प्रभृति न त्वं पूर्वतनः सामान्यः सदाशिवः परन्तु तत्सदाशिवतत्वादभिन्नः परात्पर-परशिवतत्वरूप-साक्षात् शम्भुलिङ्गेश्वर एव त्वमसि। सामान्यसदाशिवः त्वं सुरमान्यत दसामान्य-सदाशिवरूपेण परिवर्तितोऽसि। इतः परं त्वं त्वत्स्वरूपो-द्धारकारितत्शम्भुलिङ्गशिवनाम्ना एव सिद्धि प्रसिद्धि समृद्धि च यास्यसि" इति आशीराशीन् वितीर्य, अनुगृह्य अन्तर्धानं उपागमत् स योगीश्वरः।

चन्द्रचूड-साक्षात्सन्दर्शनजाऽमन्दानन्दसान्द्रायाः तन्द्रास्थितेः उद-तिष्ठत् सदाशिवः। सस्मार च सस्मय-स्मर-घस्मर-लोचन-बहिः शुष्मोष्म-संत्रस्त-विस्मेर-सुरासुर-निकर-कर-कुड्मल-विरचित-चरण-नीराजनविधेः विधिमुख-सर्व-बर्हिर्मुख-प्रमुख-सन्दोह-वन्द्यस्य इन्दुधरस्य तं अनुपदमेव संवृत्तं सन्दर्शन सुप्रसङ्गं स्मारं स्मारं च पुलकित तनुः सम्बभूव।

शीलशुद्धस्य ब्रह्मबुद्धस्य तस्य सिद्धपुरुषस्य स्वप्न-सन्दर्शन-सम्भाषण-सदुपदेश-सन्देश-लाभानुपदमेव उद्बुद्धः सदाशिवः। महा–

पुरुष - सन्दर्शन - जनित - परमानन्द - सान्द्रायाः तस्याः सन्दर्शनावस्थाया संस्कारेणेव तत इतो दिक्षु-विदिक्षु तत्सिद्धदिदृक्षया साकांक्षं चक्षु प्रचिक्षेप सर्वशः। परन्तु नाध्यक्षयामास पुनः त्र्यक्षानुग्रहरक्षितं तादृक्षं असदृशं विलक्षणं स्वानुग्रहक्षमं मुनिपुङ्गवम्। न कोप्यासीत् सविधे। शून्या दशदिशः। तदेव च सूचीभेद्यं तमः। तदेव च शिलामयं आसनम्। तत्र च निशावसानजातजडिम्ना प्राभातिक समीरणेनः कम्पायमानसर्वाङ्गः सदाशिवः स एव।

तदा सः सदाशिवः निरचिनोत् यदेतावन्तं कालं स्वात्मना संदृष्टः स्वप्न एव। नैषा प्रत्यक्षदृष्टेव घटना यथार्थभूता। स च पुनर्महायोगी स्वप्नमुखेनैव मां उदजागरयत् बोबुधीति च मदीयं शम्भुलिङ्गशिवस्वरूपं। अनुशाशास्ति तदुचितं कार्यभारं। आदेदिशीति समुपदर्शयति स्म च मया पुनः पुरस्तात् अनुसर्तव्यं मार्गं कर्तव्यं च कर्म भवतु यथादिष्टं भगवता सिद्धपुरुषेण यथा सङ्कल्पितं च मदिष्टदैवेन महादेवेन तथैव वर्तिष्ये। अनुवर्तिष्ये च प्राचीन श्रीरेणुकादि महापुरुष परिशीलितमेव पन्थानं इति प्रतिज्ञाय उदतिष्ठत्।

प्रातःकालीन शीत-वात-जात-रोमाञ्चकञ्चुकितः तदीयः कलेवरः स्वप्न-संदृष्ट-सिद्धपुरुष-सन्देश स्मरणेन द्विगुणीभूत पुलकजालकजटिल-समभूत्।

तत उत्थाय बहिरागत्य तत इतः सञ्चारयामास तरत्तरल-तारकं कुतूहलभरितं चक्षुः। विजयनगर-वैभवस्य भग्नावशिष्टान् नष्टभ्रष्टान् शैलशिलाखण्डान्, मठ-मन्दिर-मन्दुरा-राजप्रासादाराममण्डपादीन् शकलीकृतान्, पम्पाधीश्वरं तद्विग्रहं देवालयं प्राकारं सभाङ्गणादिकं च, तथाविधेऽपि यवनाक्रमणे अच्छिन्नं अभिन्नं अभग्नं अभुग्नं अक्षतं सुरक्षितं दृष्ट्वा समुदभूत् शम्भुलिङ्गस्य मनसि विचारः

विश्वस्मिन्नपि विश्वे सर्वमप्यशाश्वतमेव। भगवान् पम्पाध्यक्ष ईश्वर एक एव शाश्वतः नित्यसत्यस्वरूपश्च। अत्र मच्चक्षुषोः पुरतः एव दृश्येते द्वावपि दृष्टान्तौ—

भग्नं विजयनगरसाम्राज्यं, पम्पापतिश्च अ विकलसकलवै भवः । सर्वसुपर्वासूयामुत्पादयन्त्यां अपूर्व-सर्वविधसम्पत्समृद्धि सम्भृतायां यस्यां नगर्यां हिन्दूसाम्राज्यं स्वोत्कर्षस्य चरमसीमानम् उपास्प्राक्षीत् तस्यां एव हन्तः हम्पापुर्यां अद्य कालकवलितायां न किमप्यवाशिष्यत वैभव चिन्हं । पूर्वतने विजयनगरे अद्य पम्पापतिरेक एव शिष्यते अत एव विशिष्यते च ।

तत्र तत्र विच्छुरिताः शिलाखण्डाः, जीर्णानि मन्दिराणि, भग्नानि गोपुराणि, च्छिन्नाः मूर्तयः, भिन्नाश्च कलाकृतयः भूतकालस्य औज्वल्यं वर्तमानस्य वैकल्यं च निदर्शयन्ति ।

हम्पीनगरगतान् भग्नावशेषान् कलाकृतिविशेषांश्च दर्शं दर्शं चेखिदीति मच्चेतः । बिभित्सते च मे हृदयं हम्पापुर्याः तद्दयनीय दशावलोकनेन । पम्पानगरस्य पुरातनवैभवोत्कर्षं अद्यतनं च अपकर्षं, तदानीतनं सौभाग्यं इदानीतनं च दौर्भाग्यं सम्यग्विमृशतः मम चेतसि—

नलिनीदलगतजलमतितरलम्
तद्वज्जीवितमतिशयचपलम् ॥२१८॥

इति श्रीशङ्कराचार्याणां वचनं अध्यारोहति स्मरणसरणिम् । मञ्च-काञ्चन - चञ्चलाक्षी - सञ्चितद्रव्य-कञ्चुकाम्बराराम-प्रपञ्चूर्यमाणः सर्वोप्ययं प्रपञ्चः वर्षा-वियच्चञ्चच्चञ्चलाचयचमत्कारवन्नितरां चञ्चलः अस्थिरः विनशिष्णुश्च ।

"सर्वं वस्तु भयान्वितं जगति हा वैराग्यमेवाभयम्" इत्यभियुक्तोक्ता नीतिसुभाषितोक्तिः मुक्ताफलसदृशी युक्तात्युपयुक्तेति च तस्य प्रत्ययगोचराऽभूत् ।

एवं तदेतत्सर्वं जागतिक वस्तुजातं हेयं अनुपादेयं चेति विज्ञाय विचार्य सर्वं विहाय च पम्पापुराध्यक्षं तमेव त्र्यक्षं विरूपाक्षं उपासीसदत् सदाशिवं सदाशिवः ।

जगदुपादानं निरपायमुपायं उपासनालालसः तुष्टाव च हृष्टान्तरः परिपुष्टभक्तिभावोपजुष्टः सर्वोत्कृष्टमष्टवपुषम् ।

आब्रह्मस्तम्बपर्यन्तब्रह्माण्डारम्भशिल्पिने
नमः श्रीशम्भवे विष्णु-स्वयम्भू-शक्ति-शालिने ॥२१९॥

नैर्मल्यं शुचितां च पावनगुणं धावल्यमभ्रापगा
चन्द्रश्चामृतकान्ति-शान्ति-सुषुमाऽऽह्लादोपकृत्यादिकान्
शेषो रोषगुणोऽप्यशेष-वसुधा-धौरन्धरी-धुर्यकान्
यं संश्रित्य गुणानवापुरगजाकान्तं नितान्तं भजे ॥२२०॥

यन्नाम स्मरतस्तपश्च चरतो यत्पाद-धूलीकणान्
शीर्ष्णि स्वे धरतोऽतिभक्तिभरतः पूजारतस्यान्वहम्
रुद्रं व्याहरतस्तवं च पुरतस्सङ्गायतो ध्यायतो
लोके नु नं भवः पुनर्भव उत क्लेशो न लेशो भवेत् ॥२२१॥

पारावार-समुत्थितोग्र-गरळाऽऽहाराय हारायित–
स्वैराम्भः सुरनिम्नगाऽञ्चित-जटा-भाराय ते शम्भवे
तारानाथसमाननाय जनतोद्धारावताराय त–
न्माराराातिविदाहकाय च नमस्कारान् करोम्यन्वहम् ॥२२२॥

हारो रुण्डततिर्विषं च रुचिराऽऽहारो विहारस्तथा
शश्वत्प्रेतवनेषु दानवततेर्विष्णुः प्रहारायुधः
संहारो व्रत एव सङ्कटपरीहारश्च लीला विभोः
यस्याऽसौ हरतु प्रकृष्टदुरितं देवो हरो नः प्रभुः ॥२२३॥

वासो यस्य सदा स्मशानविपिने वासो दिशः सर्वशः
गङ्गा यच्छिरसस्सुमाल्यमपि निर्माल्यं तथाऽबोभवीत्

एवं यच्चरणं सदार्तिहरणं संसारसन्तारणम्
तं गौरीपतिमेमि नौमि च नवीम्यायामियामीतिहम् ॥२२॥

एवं भगवन्तं निशाकान्त-कान्ति-समुद्भासित-जटाजूटं धूर्जटिं कवन-परिपाट्या समुपश्लोक्य प्रश्रयावनतेन मूर्ध्ना प्रणम्य च प्रातिष्ठित श्रीशम्भुलिङ्गशिवयोगी ।

सदाचारी ब्रह्मचारी पादचारीभवन् शिवः
मार्गमाणो मार्गमध्ये भर्गभक्तान् विनिर्गतः ॥२२४॥

अभ्यभ्रोज्ज्वल-नव्य-निर्मित-लसद्‌हर्म्यालि-रम्यां पुरीं
चञ्चच्चम्पक-चूत-चन्दन-लता-चूडाल-लीलावनीम्
पण्यागण्य-सुवर्ण-नाण्य-मणि-मुक्ताली-विपण्यन्वितां
कर्णाट-क्षिति-कर्णविभ्रम-मणिं हुब्बळ्ळिमभ्यागमत् ॥२२५॥

यत्र सिद्धारूढनामा प्रसिद्धः सिद्धपुङ्गवः
येन बद्धा कटिस्सर्व-भव-बद्ध-जनोद्धृतौ ॥२२६॥

भवनानि यत्र पवनाधुताङ्गणोपवनानि देवभुवनोचितान्यपि
भवनेषु हन्त हवनानि चेश्वरस्तवनानि पुण्यमभिवर्धयन्त्यपि ॥२२७॥

मन्दार-माकन्द-सुगन्धि-मल्ली-
वल्लीमतल्ली-परिफुल्ल-पुष्पैः
हूबळ्ळि-नाम प्रतिपद्य हृद्य-
व्यंद्योततोद्यानशतैर्यथार्थम् ॥२२८॥

तत्र च नगरान्नातिदवीयसि वनदेवतासदनायमाने पावितपरिसर प्रदेशे वनोद्देशे वाभ्राजीति चाभ्रंकष-नैकानोकहव्यूहैः अधर्मप्रवेशमुप-रुन्धानैरिवाऽतिनिबिडावयवमुपरूढैर्गाढमुपगूढः हरिरिव वनमालालङ्कृतः हर इव नेदिष्ठ-दुर्गोपसर्ग-लालितः, साङ्ख्यसमय इव कपिलाधिष्ठितः

वर्षाकाल इव शान्तरजस्कः नेदाघदिवस इव क्षपितबहुलदोषः, चतुर्मुख-ह्मेव सत्यलोकाधिष्ठितः, कैलास इव नैकसिद्धपुरुष-संसेवितः कामिनी कण्ठप्रदेश इव अनेक-मुक्तानुबद्धः, महानस इव विविध-भक्तततिस्पृहणीयः, चतुरमन्त्रीव संसाधित-रहस्य-मन्त्रसाधनः, विश्रान्तिस्थानं शान्तेः धाम दान्तेः कुलभवनमध्यात्मविद्यायाः सिद्धारूढस्वामिनां जगत्प्रसिद्धो मठः ।

यत्परिसरप्ररूढाः पादपा अपि जटाधारिणः वल्कलावृताः शीतोष्ण-वातातपसहाः अब्भक्षाः तपस्विव्रतमिव चरन्ति ।

यत्रत्याः पशवोऽपि क्षेत्र-भ्रमण-कृतार्थाः गृहीत-दर्भ-मुष्टयः तृण-प्राय-विषयावलोक-निर्वृताः वैराग्यमार्गमिवानुसरन्ति ।

कुसुमान्यपि मधुमुञ्चन्ति ।

जलाशया अपि प्रसादातिशयमधिगच्छन्ति ।

महिषा अपि मृत्तिकास्नानमाचरन्ति ।

यत्र च लता अपि सुमनसः शिरसा मानयन्ति ।

लोहहला अपि वृषानुसरणमाकलयन्ति ।

चुल्योऽपि भस्म धारयन्ति किम्पुनर्मानवाः ।

यत्र च अधोगतिः वृक्षमूलानां, चाञ्चल्यं वृक्षाग्राणां, काठिण्यं वृक्षस्कन्धस्य, रागोल्लासः वृक्षपल्लवेषु, भूम्याक्रमणं वृक्षसमूहस्य पातित्यं जीर्णपर्णेषु न जनेषु ।

ईदृशस्य भुवनप्रसिद्धस्य सिद्धारूढमठस्य तदध्याक्षाणां नियमित सकलाक्षाणां समुपासितत्र्यक्षाणां दलितोद्धारैक-लक्ष्याणां धर्मप्रसार-धृत-दीक्षाणां सूक्ष्मप्रेक्षाणां त्यक्त-वैषयिकापेक्षाणां महातपः स्साधित-

परमेश्वर-प्रत्यक्षाणां श्रीसिद्धारूढस्वामिनां तदास्थानजुषां पाण्डित्यपुषां ज्ञानत्विषां मौढ्यमुषां महाविदुषां च सन्दिदृक्षया शम्भुलिङ्गशिवाचार्यः तत्राजगाम ।

तदा तत्र सिद्धाश्रमे आस्थानमण्डपे श्रीश्रीसिद्धारूढस्वामिनामाध्यक्ष्ये प्रावर्तत अद्वैतवेदान्तगोष्टी। तत्र समागत्य शम्भुलिङ्गेश्वरः दूरादेवावालूलुकत् अध्यक्षपीठं सनाथयन्तं मूर्तिमन्तमिव तपोराशिं, शरीरबद्धमिव वैराग्यं, अङ्गरङ्गप्रविष्टमिव अध्यात्मरहस्यं प्रदर्शनशालामिव दैवीसम्पदः नूतनपरिष्कारमिव शान्तितत्वस्य, सौम्याविष्कारमिव ब्रह्मतेजसः हिमगिरिप्रदेशमिवपरमेश्वरपादपांसुपूतशिरस्कं गङ्गाप्रवाहमिव सर्वज्ञमौलिलालितं नारायणमिव दूरीकृतनरकभयं अश्वत्थाममिव सर्वदा कृपानुगतं भवानीशरीरमिव रुद्राक्षमनोहरं प्रातःकालमिव उदयरविकान्तिकमनीयं गगनमण्डलमिव आश्रितसर्वतारकं प्रकाशपुञ्जमिव सकलपदार्थप्रकाशकं शारदोत्सवमिव व्यतीतबहुवर्षं शन्तनुराजमिव आदृतसत्यव्रतं सिद्धिं तपसः समृद्धिं वैराग्यस्य महापूरं दयास्रोतसः प्रासादं प्रसादस्य स्थानं मानस्य तीर्थं तथ्यस्य स्वार्थं सत्यस्य परमार्थमध्यात्मविद्यायाः क्षेत्रं क्षमायाः पात्रं पावित्र्यस्य खनित्रं आशाङ्कुरस्य अविषयीकृतं विषयैः अनालोकितं कामेन अपरिस्पृष्टं क्रोधेन अनाघ्रातं लोभेन उत्सारितं मात्सर्येण दूरीकृतं दोषदानवैः ऊरीकृतं आर्षगुणैः अहङ्कारमोङ्कारस्य भाग्यनिधिं भक्तिसीमन्तिन्याः आहोपुरुषिकां आत्मानुभवस्य सीमारेखामिव शान्तिसाम्राज्यस्य विजयवैजयन्तीमिव ब्रह्मज्ञानस्य वन्द्यत्वस्यापि वन्दनीयं पूज्यत्वस्यापि पूजनीयं धर्मस्यापि आराधनीयं धाम धाम्नां मन्दिरं महिम्नां क्षत्रं शुचितायाः निकेतनं कौतुकस्य सौम्यमूर्तिं भगवन्तं श्रीसिद्धारूढयोगीश्वरम् ।

तस्यैव च पुरस्तादास्तीर्णेषु कुशास्तरणेषु समुपासिता आसन् समस्त-शास्त्र-पारदृश्वानः भूयांस एव विद्वांसः, भावुकाः श्रावकाः, हृदयोत्तरङ्गित-भक्ति-रस-पूराः नैक एव च पौराः ।

श्री सिद्धारूढ-स्वामि-समधिष्ठिता परिनिष्ठित-पण्डित-प्रेष्ठ-परि-मण्डिता कवि-श्रेष्ठ-समलङ्कृता विमर्शक-वरिष्ठाभिजुष्टा वावदूक-गरिष्ठ-प्रतिष्ठिता प्रकृष्ट-धर्मश्रद्ध-श्रावक-भूयिष्ठा सर्वोत्कृष्ट-साधिष्ठ-विशिष्ट-गुरु-महिष्ठा सा सभा विडम्बयति स्म सुरकदम्बसम्बाधां कवि-गुरु-वृषानुवर्ति-विबुध-निकुरम्ब-समुज्जृम्भितां देवलोकस्य सुधर्मसभाम् ।

शम्भुलिङ्गेश्वरोऽपि तत्र गत्वा मौनी मुनिर्भूत्वा, श्रवणमेव वरं मत्वा, श्रोत्र-समाज-मध्यमध्यासीनः अन्वैक्षिष्ट प्रचलन्तं कार्यक्रमम् ।

कबीरदासनामा विपश्चिदपश्चिमः कश्चन सुनिश्चलेन ध्वनिना वेदान्तप्रवचनं कलयन् शाङ्करभाष्यं विवरीषुः 'माया मिथ्या' इति प्रत्यपीपदत् ।

तत्क्षण एव शास्त्रार्थकृतक्षणः सर्वागमविचक्षणः मेधा-विलक्षणः महामनीषिलक्षणः शम्भुलिङ्गयोगीश्वरः तदसहमानः निरभिमानः समुत्थितः श्रावणाम्बरविजृम्भमाणाम्भोभर-सम्भृत-नवाम्भोद-कदम्ब रव-विडम्बिना गम्भीरेण ध्वनिना तमाक्षिपन्नाचचक्षे धीरधीः ।

"अयि पण्डितप्रवरा न युक्तमुक्तं भवद्भिः । मायामिथ्येति न युक्तिसहं वचः । वस्तुतस्तु माया सत्यभूतैव न मिथ्याभूता । मिथ्या-भूतैव मायेत्यत्र किं प्रमाणम् ? अद्वैतवेदान्तस्य मुख्य-प्रवर्तकाः श्रीशङ्कराचार्याः स्वकीये शारीरिकभाष्ये –

"स्यादीश्वरस्यापि इच्छावशान्मायामयं शरीरं साधकानुग्रहार्थम्" इति स्पष्टमेव उदघोषयन् । तथा

"तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्ता प्रसृता पुराणी"

"मायान्तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्"

"मयाध्यक्षेण प्रकृतिः सूयते सचराचरं"

"दैवी ह्येषा गुणमयी मम माया दुरत्यया"

"मन्माया शक्तिसङ्क्लप्तं जगदेतच्चराचरम्"

"मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते"

इत्यादि-परःशत-श्रुति-स्मृति-गीतोपनिषत्पुराणसूतसंहिता-भाष्यादि वचनैः प्रमाणोक्तिभिश्च सत्यभूतैव माया न मिथ्या ति सिद्ध्यति इति ।

श्रीशम्भुलिङ्गास्य-पुटी-सुशुक्ति-मुक्ताच्छमुक्तोपममुक्तिजातम्
सद्युक्तियुक्तं ह्यभियुक्तमान्यं श्रुत्वा कबीरः कुपितो बभूव ॥२२९॥

शेषं स्व रोषेण हि पूरयेदित्याभाणकाऽलक्षित एष विद्वान्
कबीरदासोऽपि च कोपदासः प्रत्युत्तराशक्तमतिर्जगाद ॥२३०॥

वादप्रसङ्गे मुखभङ्गमादौ ततोऽभिषङ्गं च कबीरदासः
श्रीशम्भुलिङ्गात्समवाप्य दृग्भ्यां रोषस्फुलिङ्गान् भृशमुद्ववाम ॥२३१॥

स शम्भुलिङ्गोदितपूर्वपक्षान्न चक्षमीति स्म समुत्तरीतुम्
ततोऽपमानोद्भवदुःखवार्धेरप्युत्तरीतुं न शशाक मुग्धः ॥२३२॥

न मे प्रवचनं जातु प्रतिवाचःसहं भुवि
त्यक्तोऽपवादवद्वादो विवादोऽपि मयतरः । ॥२३३॥

नाहं वाद-रणं चान्यैर्गिरां वऽादरणं तथा
मद्वाग्विवरणं वापि न कुर्वे च विचारणं ॥२३४॥

वक्तृप्रष्ठाः सुधीप्रेष्ठा न प्रष्टव्या हि मादृशाः
तूष्णीं मदुक्तं श्रोतव्यं न चेद गन्तव्यमाश्वितः ॥२३५॥

अज्ञानगोपनं कोपाटोपजं तत्प्रलापनम्
श्रुत्वा शम्भुः स जिज्ञासुर्निर्यियासुस्ततोऽभवत् ॥२३६॥

तदा तदास्थान-सभापतित्व-
स्थानं सुमानं समलङ्करिष्णुः
भ्राजिष्णुरुष्णांशुरिवाऽस्मतूष्णीं-
भावं विहायात्र जगाद (सिद्धारूढ) योगी ॥२३७

अये प्रकाण्डपाण्डित्यमण्डितः पण्डितोऽह्यसि
शम्भुलिङ्ग सुधीवर्य सत्यं तथ्यं त्वयोदितम् ॥२३८॥

सूक्ष्मात्सूक्ष्मतरं शास्त्ररहस्यं तत्वमुत्तमम्
श्रोतुं स्थूलधियो नार्हाः किं पुनर्ज्ञातुमीदृशाः ॥२३९॥

भवानत्रभवानेतत् श्रुत्वा तत्त्वाऽविदां वचः
न मनागपि मेधाविन् सुमना विमनायताम् ॥२४०॥

अवश्यं पुनरागत्य रहस्यं शास्त्रनिर्णयं
प्रवक्तुमवकाशोऽत्र दीयते भवतेऽचिरात् ॥२४१॥

ममापि मायासिद्धान्ते महदेव कुतूहलम्
निर्माय शास्त्रमर्मज्ञैर्विमिमृक्षामि तत्वतः ॥२४२॥

विद्वांसः सन्ति भूयांसः पल्लवग्राहिदुर्धियः
विरलाः सरलास्त्वादृक्तलस्पर्शिविमर्शिनः ॥२४३॥

विशिष्य भाष्यादि-विमर्श-पुष्यद्वैदुष्य-वैदुष्य-विशेष-विज्ञाः
निर्मथ्य निर्मायममेयमायातत्वप्रमेयं भुवि निर्णयन्तु ॥२४४॥

तदस्मदीयैः श्रुति-शास्त्र-तद्ज्ञानाचार्यवर्यान् कृतवाक्सपर्यान्
आकार्य कार्याऽस्ति मनीषिगोष्ठी त्वां दक्षमध्यक्षपदेऽभियोक्ष्ये ॥२४५॥

एवं मुनि-मनुज-वृन्द-वन्दनीय-पादारविन्द-द्वन्द्वेन मन्दहास-सुन्दर-वदन-निन्दितेन्दुना इन्दुशेखर-चरणाब्ज-निष्यन्ददमन्द-मकरन्द-बिन्दु-सन्दोह-मिलिन्दायमान-मानसेन कर्मन्दि-वृन्द पुरन्दरेण सिद्धारूढयोगीश्वरेण परिगान्वितः शम्भुलिङ्गयोगीश्वरः समाहितमनस्कः सभिकैः सकलैरपि अदसीयासाधारण-मेधा-पाटव-परिज्ञान-विस्मय-स्तिमितैः सानन्दमभिनन्दितः अन्यैश्च कश्चन गुरुभक्तिधन्यैः सौजन्यागरैः गुणसङ्ग्रहणसागरैः नागरैश्च सोल्लासमभिवन्दित स्तत्रैवावात्सीत् कञ्चन ज्ञान-दानादानोपदेश विचार-विनिमय-मयं कञ्चित्समयम् । तत्रैव च हुब्बळ्ळीनगरे विद्यमान मूरुसाविरमठेति सुप्रसिद्धे लिङ्गायतमठेऽपि प्रचलति काचन संस्कृत पाठशालेति ज्ञात्वा तत्रागमौ शम्भुलिङ्गयोगीश्वरः ।

तत्र च पाठशालायां गौरवास्पदमध्यापकपदमलङ्कुर्वाणैः वाक्यार्थ प्रतियोगिता-पराजितनैक-विबुध-धरणीगीर्वाणैः व्याकरणपारावार-पारीणैः पण्डितधुरीणैः श्रीबेनकनहळ्ळीवैयाकरणि गुरुमूर्तिशास्त्रिभिः सह सम-भाषत सस्नेहं शम्भुलिङ्गमुनीश्वरः विविधानधिकृत्य विषयान् ।

तत्र च आनुषङ्गिकतया नरपादोदकेन शिवलिङ्गस्नपनविषय प्रस्तावितः । तदा शम्भुलिङ्गशिवयोगीश्वरः पाप्रच्छीति स्म गुरुतर वदग्ध्य-कीर्तिशालिनं गुरुमूर्तिशास्त्रिणम् ।

"चरपादप्रक्षालनपाथसा पशुपतिशिरोभिषेकस्य कर्तव्यत्वविषय किं प्रमाणवचनान्युपलभ्यन्ते?"

शास्त्रिणः–"चरपादोदकेनैव लिङ्गमज्जनमुत्तमम्" इति पद्यमेव तत्र परमप्रमाणम् ।

शम्भुलिङ्गेश्वरः— किमयं श्लोकः श्रुतिगतः स्मृतिगतः अथवाः पुराणगतो वा?

शास्त्रिणः– नाऽयं श्रुतिस्मृतिगतः किन्तु आगमोक्तो भवेदिति भावयामः ।

शम्भुलिङ्गेश्वरः– श्रौतागमेषु कुत्राप्ययं श्लोको न परिदृश्यते?

शास्त्रिणः– भवेत्तर्हि अश्रौतागमगत एव कश्चिदयं श्लोकः ।

शम्भुलिङ्गेश्वरः– प्रामाण्यं चाऽस्माभिः सर्वैरपि वीरशैवै श्रौतस्मार्तागमानामेव अभ्युपेयते । अप्रमाणभूताश्रौतागम-गतोऽयं श्लोक चरपादोदकेन शिवलिङ्गाभिषेकविषयं कथं प्रमाणं भवेत् । प्रमाणा भावे कुतो वा चरपादाम्बुना स्नाप्यते परशिवः ?

शम्भुलिङ्गेश्वरस्य निरुत्तरमिमं पूर्वपक्षं निशम्य तूष्णीं भवत्सु गुरुमूर्तिषु जगद्गुरुगङ्गाधरस्वामिनो मध्ये प्रविश्य–

"आगमवत् शिष्टाचारोऽपि परमप्रमाणत्वेन अनुमन्यते मान्यते च सदाचारविदग्धैः शास्त्रसीमामर्मज्ञैः प्राज्ञपुङ्गवैः । सदाचार-परम्परा-प्राप्तत्वेन तन्न निषेधप्रतियोगितां प्रापद्यताऽद्ययावत् विद्वत्सम्प्रदाये । सम्प्रदायशरणा एव मादृशाः सर्वेऽपि वीरशैवशरणा" इति स्वाभिप्राय माविरकुर्वन् ।

स्वपूर्वपक्षाक्षेपस्य क्वापि सूक्त समञ्जसं समुचितं च उत्तरमलभमानः अलब्धमनस्समाधानः शम्भुलिङ्गेश्वरः गङ्गाधरस्वामिन एव साक्षाद् आचेक्षिपीति स्म "सम्प्रदायोऽपि शिष्टसंमत एव ग्राह्य कोटिमाटी कत इति अपराञ्चितमेव विदितवेदितव्यानां भवादृशाम् ॥

गङ्गाधरस्वामिनः– के ते शिष्टाः?

शम्भुलिङ्गेश्वरः– निगमागमप्रामाण्यमभ्युपगन्तार एव हन्त शिष्टशब्देन व्यपदिश्यन्ते । श्रुतौ स्मृतौ वा श्रौतागमेषु वा अनुक्तत्वेनः

श्रुतिप्रामाण्यवादिन: न केऽपि शिष्टा नरपादजलेन हरशिरोऽभिषेकं सूक्तं मन्यन्ते । शिष्टाऽपरिगृहीतत्वेन नायं सम्प्रदाय: सत्सम्प्रदाय: ॥ असत्सम्प्रदायप्राप्तस्याप्यसदाचारत्वेन, सदागमाननुमतत्वेन, शिष्टाननुष्ठितत्वेन च चरपादोदकेन शिवलिङ्गाभिषेक: न कर्तव्य: किन्तु त्यक्तव्य एवेति सिद्ध्यति

इति सुस्पष्टमेवाऽचष्ट धृष्टधी: परामृष्टसकलशास्त्रार्थ: परिस्पृष्ट निगमागमाब्धितल: प्रमाणप्रमेयपरिनिष्ठित: सत्सम्प्रदायैकनिष्ठ: निष्कृष्टबुद्धि: निर्दुष्टाशय: श्री शम्भुलिङ्गेश्वर:

इति चतुर्थस्तरङ्ग:

॥ अथ पञ्चमस्तरङ्ग : ॥

एवमुभयोरपि शास्त्रिस्वामिनोः समुचितोत्तरदानदरिद्र अवलम्बित मौनमुद्रं वदनछिद्रं स्वयमेव मुद्रितं निशाम्य अधिकतरमवमन्तुमनीहमानः स्वभावतः सुमनःसमानः महामना मनीषिजनमाननीयः श्रीशम्भुलिङ्गेश्वरः ततो निर्गत्य धारवारमार्गतः स्वजन्मभूमिं बङ्कापुरनगरमुपाजगाम । तत्र च –

"जननीं जन्मभूमिं च स्वर्गादपि गरीयसीम्"
दृष्ट्वाऽपवर्गसौख्यादप्यधिकां स मुदं ययौ ॥२४६॥

चिरात्पुरान्निर्गत आत्मपुत्रः किं स्वर्गतो दुर्गत इत्यनन्तैः
चिन्तानलैरुत्क्वथितान्तरङ्गा सन्तातपीति स्म जनन्यमुष्य ॥२४७॥

हा पुत्र सत्पुत्र गतोऽसि कुत्र
त्वत्प्रीतिपात्रं जननीं त्वमत्र
विहाय हा यासि कथं विहायः–
पथेन पत्रीव निजां जनित्रीं ॥२४८॥

क्रुद्धोऽपविद्धो नु मया कदाचित् –
खिन्नो विषण्णो नु पितुर्हितोक्तैः
प्रेम्णो गरिम्णा विहितं हितं ते
सा मन्यथा मातरमन्यथा त्वम् ॥२४९॥

सुतो गतो नावधृतो मृतो वा
स्थितःक्वचित्प्रस्थित एति नो वा

वार्तापि नो तस्य कथं नु वाऽर्ता
जीवामि देवेति विलालपीति ॥२५०॥

देशान्तरे वा नु वनान्तरे वा
स चोषितः किं क्षुधुपोषितोऽस्ति?
कः स्नापयदभ्यवहारयेत्तं
कः पाययेन्निश्यपि शाययेद्वा ॥२५१॥

कदा मदीयोदरसिन्धुचन्द्रिरः
स मन्दहासार्ध कसुन्दराननः
सदाशिवो मेऽक्षिचकोरपारणां
विधाय मां नन्दयतीह नन्दनः ॥२५२॥

एवं नक्तन्दिवं विलप्य मुक्तकण्ठं, स्मारं स्मारं स्मेरमुखं सौन्दर्य-विस्मारितस्मरं सौशील्यविस्मापितसनत्कुमारं निजकुमारं, कुररीमिव क्रन्दन्तीं आत्मनो दुर्भाग्यं निन्दन्तीं, अन्तरान्तरा च सुतसदाशिवस्य सौशील्य-सौजन्य-सदाचारादि-सद्गुणाननुवर्ण्य स्वयमानन्दन्तीं, वत्सस्य चिर-विरह-वैक्लव्य-जनितं तनौ तनिमानं वाचि अतिमौनं वैराग्ये बहुमानं शवतौ लघिमानं आकारे अणिमानं चावहन्तीं, ग्रस्तामिव ग्रहेण आचान्तामिव चिन्तया जग्धामिव जूर्त्या कवलीकृतामिव क्लेशराशिभिः आघ्रातामिव विषादव्याघ्रेण दष्टामिव दुःखश्वापदंष्ट्राभिः स्पृष्टामिव कालाहिना कृष्टामिव वैक्लव्येन भ्रष्टामिव सुतसुखस्वर्गात् जुष्टामिव जरया परिमृष्टामिव कष्टकोटिभिः लङ्कापुरीमिव परि-दृश्यमान-कीकस-सन्तानां मुनिचर्यामिव निरामिषवृत्तिक्षीणां, तपस्य-दपर्णामिव विरक्तां बार्हद्रथप्रकृतिमिव जराघटितदेहां हैडिम्बेयतनुमिव शक्तिपातविदीर्णां कृष्णपक्षचन्द्रलेखामिव तनुतरतनुं सुतविरहकातरां पुत्रमुखदर्शनातुरामतितरामुत्कण्ठितां मातरमद्राक्षीत्।

दृष्टमात्रायामेव अतिमात्रवत्सलायां मातृदेव्यां शम्भुलिङ्गेश्वरः सत्वरं ससम्भ्रमं सस्नेहं सातिशयादरं सभक्त्युद्रेकं च सरभसमुपेत्य जग्राह कमलविमले प्रसूपादयुगले ।

माताऽपि "अये वत्स सदाशिव जीवसि? किमयं स्वप्नः माया वा? प्रियं मे । हर्षो मे । अहो भाग्यं! सार्थकमद्य मम जीवनम् । एहि वत्स! दृढतरमालिङ्ग मां त्वद्विरहदावप्लुष्टां चिरविरहकातरां त्वन्मातर"मिति उक्त्वा पादप्रगतं स्वसुतं प्रणयातिरेकेण बाहुभ्यामुत्थाप्य, आलिङ्ग्य, पृष्ठतटं हस्ताग्रेण परिमृश्य, चिबुकमुन्नमय्य, कपोलयोः परिचुम्ब्य, शिरस्याघ्राय, हस्तावान्दोल्य, मुखं निर्वर्ण्य, आकारमभिलक्ष्य "अयि महानेव पुरुषः संवृत्तः मम बालः वत्सः सदाशिवः । मन्मथसम आकारः चन्द्रसदृशं मुखं सुवर्णसमानो वर्णः यौवनोद्भासिनी चाङ्गाङ्ग-श्रीरिति ममैव दृष्टिदोषो लगेन्मम सुकुमारस्येति विस्फुटं परिलपन्ती प्रेमातिशय-प्रस्नुत-पयोधरा सालकजालकं सविभूतितिलकं मातृ-स्पर्शो-द्भूतपुलक-कलिकं प्रियसुतस्य अलिकफलकं हस्ताग्रेण उपस्पृश्य स्व-कपोलपालिकयोः स्वदशाङ्गुलिभङ्गमाकलय्य दृष्टिदोषपरिहारं व्यरीर-चत् ।

तदनु तत्रैव स्थितः सिद्धेश्वरः पुनर्जन्म प्रपन्नमिव कायकल्पमा-पन्नमिव शम्भु-करुणा-किरण-स्फुरण-छाया-प्रसूतमिव पितृपुण्यविशेषा-त्सम्प्राप्तमिव गुर्वनुग्रहातिशयोपलब्धमिव चिरादागतं अनिरीक्षितोपगतं स्वसुतमभिलक्ष्य हर्षप्रकर्षपरवशः स्तब्ध इव विस्मित इव जड इव मूक इव निष्पन्दमन्दारविन्दसगन्धाभ्यां चक्षुर्भ्यां तदैकलक्ष्यतया निरीक्षमाणः पादोपान्तप्रणतमपि नाज्ञासीत् कुमारं

तात वन्दे इति च तस्यैव कुमारस्य उच्चैरुच्चारेण उच्चेतित इव उद्बुद्ध इव पिता सिद्धेश्वरः वात्सल्यरसपूरप्लावितया गिरा "वत्स कदा वा आगतोऽसि? कुत्र वाऽवात्सीरियद्दिनानि? किमकरोः? कुतो नाऽवेदयः पत्रमुखेन तव स्थितिगती? कुतो वा इयच्चिरायितोऽसि? किं कुत्र वाऽ

वात्सीः तं इयन्तं महान्तं द्राघीयांसं समयं ? किं किमन्वष्ठायि? काऽवा अध्यगायि विद्या? इति कृष्यमाण इव कौतुकेन लुण्ठ्यमान इव औत्कण्ठ्येन, तरलीक्रियमाण इव आतुरतया त्वर्यमाण इव जिज्ञासया अप्राक्षीत् अधिगतसकलनयमप्यविकलविनयं स्वतनयं सदशिवम् ।

तदा चातिमुदा सदाचारधनः उदारधीः सदापर्युपासितसदाशिवः स सदाशिवः स्वस्मिन्निरवधिकप्रेमकत्रोः पित्रोः पुरस्तात् प्रस्तरमय-भुवस्तल-समास्तीर्णे नातिविस्तृते तन्निकट-कट-कटके समुपविश्य स्वस्य गृहनिर्गमनात् प्रभृति ईशावासोल्लासिकाशीवास, स्वाध्यायप्रयास, शास्त्राभ्यास, ज्ञानविकास, दूरदूरक्षेत्रप्रवास पुनः पम्पाक्षेत्राधिवास, परशिवनिदिध्यास, परतत्वोपासन, स्वप्नविलास, स्वस्वरूपावभास, पम्पाध्यक्षानुग्रहोल्लास, शम्भुलिङ्गेति स्वनामव्यत्यासादिपितृपुनर्दर्शन-पर्यन्तं कविकृतबृहत्कथानकवत् आन्तं कौतुकमयघटनाक्रान्तं नितान्त-माश्चर्यमुत्पादयन्तं बृहन्तं मुदन्तमुदन्तं संश्रावयामास प्रसन्नेन मनसा, प्रवाहिना वचसा गम्भीरेण स्वरेण साहित्य संस्कारवशादप्रयत्नेनोपगतेन च वाचो- वीचीविलासेन ।

तमिमाद्यन्तं कादम्बरीकथानकवदद्भुतरम्यं महाभारतमिव भीम-साहसप्रधानं, पुण्यतीर्थमिव विपुलरसोत्कटं, पाण्डवचरितमिव धर्मानु-प्राणितं, शीतदिवसमिव रोमाञ्चकारकं, निदाघकालमिव पुष्कलबाष्पनि-ष्पादकं, ब्रह्ममानसमिव शारदाप्रसादनसफलं, सर्वश्रवणीयं रसरमणीयं सत्यसुन्दरं चित्तविद्रावकं स्वपुत्रस्य दूरदेशयात्रेतिहासं तन्मुखेनैवोपश्रुत्य पितुः पल्लवितमुल्लासेन, अभ्युदितमाशाङ्कुरेण, संतृप्तमन्तरङ्गेण, उन्नर्तितं चित्तेन, आश्वस्तं हृदयेन, फलितं मनोरथेन, आनन्दितं चान्त रात्मना ।

शम्भुलिङ्गेति नूतननाम समासाद्य पम्पापतेरकम्पया अनुकम्पया शम्पाशतदीप्तिभासुरां कान्तिसम्पदं, अतुल्यं काव्यकौशल्यं, समुत्तेजित शेमुषीं शास्त्रवैदुषीं अनुपमानं व्यवहारज्ञानं अनन्यं सौजन्यं विगतवैकल्यं

सौशील्यं, सुस्नेहवैपुल्यं, हृदयवैशाल्यं, स्वभावनैर्मल्यं, परोपकार-प्रावण्यं करुणापौष्कल्यं, सद्गुणसाकल्यं, जन्मसाफल्यं चानुविन्दन्तं विद्वद्वृन्दपुरन्दरं तं निजनन्दनं ज्ञात्वा दृष्ट्वा च आनन्दत् पिता अतृप्यन्माता, अभ्यनन्दद् बन्धुवर्गः, अभ्यवन्दत च ग्राम-ग-ग्रामणी-ग्रामः साभिमानोत्साहभरं श्री शम्भुलिङ्गेश्वरम् ।

तारुण्य-लावण्य-विलास-लक्ष्मी-
केलीवनं यौवनमाप्य शम्भुः
कन्दर्प-दर्पापह-रूप-कान्ति
भेजे विरेजे सुहृदां समाजे ॥२५३॥

अयं कुमारो ननु किं स मार-
स्सनत्कुमारोऽथवैष तस्मिन्
कैश्चित् कुमारोऽसुरसङ्घमार
इत्याशशङ्के सति यौवनाङ्के ॥२५४॥

मुग्धे प्रदग्धे भवभालवन्हौ
कामे तु तज्जीवसखो वसन्तः
प्रसादयिष्यन् परमेश्वरं किं
शम्भ्वात्मना सम्भवतीत्यतर्कि ॥२५५॥

शम्भोःशिरोमन्दिरचन्दिरस्तत्
शीर्षाधिरोहात्यघमर्षणाय
सिषेविषुः शम्भुवपुर्धरः स्यात्
सन्दिह्यते कैरपि सुन्दरःस्म ॥२५६

भास्वान् स्वतेजसा दिव्ययशसा च कलाधरः
धिया मन्दो गुरुर्वाचा कविर्गोष्ठ्यां सदो बुधः ॥२५७॥

धर्मकेतुः सदालोकमङ्गलोऽयं सदाशिवः
ग्रह-ग्रामाभिरामश्रीविग्रहः प्रबभौ गृहे ॥२५८॥

गङ्गाभिधोच्छलत्तरङ्गसरस्वती सा
शम्भोर्हि शीर्ष्णि पतितेति च तत्स्नुषापि
वेधोवधूर्विबुधवन्द्यसरस्वतीयं
प्राविविशच्छिरसि किं पुनरस्य शम्भोः ॥२५९॥

सकलाऽविकला ह्यस्मिन् कला ईर्ष्याकुला इव
तस्मात् कलाधरोऽयं नु नकलङ्काङ्कपङ्किलः ॥२६०॥

जन्मना सुमना विद्याभ्यासाद्विद्याधरो बभौ
लेखवृन्दारको लेखैः बहुधा विबुधो धिया ॥२६१॥

एवमम्भोजसम्भव-कुटुम्बिनी-करुणा-कादम्बिनी-निरन्तर-वृष्टि-पोपूर्यमाण-ज्ञानाम्बुवाहिनी-रस-कदम्ब-सम्बाध-सारस्वत-महाम्भोधि-गाम्भीर्य-समुज्जृम्भमाणं कुम्भिगीसम्भूतमिव जम्भभेदिगुरुं, जङ्गममिव ज्ञानकोशं, वाचालमिव वाङ्मयराशिं, शम्भुलिङ्गंश्वरं यथाबुद्धिबलोदयं सम्भावयति, तत्प्रतिभाप्रकर्षोत्कर्षहर्षिताकर्षिते त्रिद्वन्निकुरम्बे तज्जनकः अपि प्राप्तप्रभूतकनक इव परमानन्दतुन्दिल एवं मनस्यकरोत् ।

प्राप्तवयस्कः विशालोरस्कः शम्भुलिङ्गःतारुण्यश्रीकान्तिकान्तोयं मम–

तनयो विनयोपेतस्सतामनुनये रतः
पटुः सर्वनयेष्वद्य नूनं परिणयोचितः ॥२६२॥

इति विचिन्त्य एकान्त एकान्तमनोहरं तं सुकुमारं स्वकुमारमाहूय वात्सल्य-रस-परिपूरितया सदिच्छाप्रेरितया तदुत्कर्षभावनाकारितया मोचा-मधु-माधुरीमुचा वाचा प्रावीवचत् सिद्धेश्वरः ।

गृहस्थाश्रमिण स्तै स्तैः स्वोचितैर्धर्मकर्मभिः
नाकभूलोकसौभाग्यमिहस्था एव भुञ्जते ॥२६३॥

सद्ब्रह्मचर्यचर्यायां वानप्रस्थे च तस्थुषाम्
सन्यासिनां गृहस्थाच्च नान्यत्स्याच्छरणं क्षितौ ॥२६४॥

तस्मान्न गर्हितं शास्त्रे गार्हस्थ्यं कर्हिचित् बुधैः
सर्वाश्रमोपकारित्वादर्हणार्हा हि गेहिनः ॥२६५॥

वसिष्ठजनकाद्या हि भूयांसो गृहिणः पुरा
योग-भोग-विरागर्धिसंयोगैः शमसाधयन् ॥२६६॥

श्रीपरिष्वक्तवक्षास्त्वं सुदर्शनमनोरमः
विष्णुवत्पुण्डरीकाक्षः विवाहार्होऽसि पुत्रक ॥२६७॥

तस्माद्रूपानुरूपां ते सद्गुणानुगुणां तथा
कन्यां सत्कुलजन्यां त्वं समुद्वह कुलोद्वह ॥२६८॥

सतीव च सती सर्वमङ्गला चेन्दिरेव या
पद्माक्षमोहिनी साक्षाच्छारदेव विशारदा ॥२६९॥

ध्रुवाम्बेव सुनीतीड्या सुमित्रेव सुलक्ष्मणा
कन्या ह्युभयवंश्यानां हर्षोत्कर्षाय कल्पते ॥२७०॥

कन्यासूच्चान्वयाम्बोधिजन्यासु खलु दृश्यते
सौशील्यपतिभक्त्यादिसद्गुणानां समन्वयः ॥२७१॥

तस्मादिह त्वदुद्वाहमहं कर्तुमहं लघु
समुत्सहे समीहे च महाकुलजकन्यया ॥२७२॥

दृष्टोत्कृष्टा मया श्रेष्ठा कुलशीलगुणादिभिः
कन्या सद्वंशजा कान्तिकमना त्वत्कृते शुभा ॥२७३॥

सम्फुल्ल-मल्लिकादि-नैक-वल्ली-मतल्ली-समुल्लसिते पल्लवित-विविध-विद्या-विनय-सम्पल्लसदप्रतिमल्ल-विद्वत्तल्लज-मल्लशालायमाने हानगल्लनामके ग्रामे ज्यष्ठमठोपाभिधाः गेज्जेहळ्ळी नामकग्राम स्वामितां वंशपारम्परीतोऽनुभवन्तस्तत्र भवन्तः गुणतो महान्तः, स्वभावतः सन्तः परोपकारव्रतवन्तः श्री बसवराजनामानः सन्ति गृहस्थाः

वस्तुतस्तु ते समीपतरबन्धव एव ह्यस्माकम्। अस्मत्कुलाग्रसरस्य अग्रजस्य जामातृभावं अबीभरद् बसवराजः। तत्पत्नी च मातृभावं सलक्षणकन्याया वहन्ती आकांक्षते त्वां जामातरं विधातुं। तदर्थमत्यर्थमर्थयते त्वन्मातरं मां च पितरम्।

तद्भवान् सकृदालोकयतु तां कमनीयकान्तिशालिनीं राकायामिनीमिव सुन्दरचन्दिराननां सञ्चरन्तीमिव सौदामिनीं, देहान्तरमापन्नामिव कामकामिनीं, सद्गुणशोभिनीं, कन्यामणीम्।

यदि ते तस्या रुचितं रूपं, संमतं शीलं, अनुमतं चारित्र्यं, अभिमता गुणाः, कांक्षितः संबन्धः, ततस्तर्हि सोत्साहं निर्वर्तस्यामि विवाह-महोत्सवं युवयोरचिरादेव।

इयं च तव सन्ततशुभाशंसिनी सर्वकुटुम्बप्रमोदजननी ते जननी निशान्धकारबन्धनान्धीकृता कुमुदिनीव उषामुखं सोत्कण्ठं दिदृक्षति स्नुषामुखं। अहमपि च उदूढे प्रगाढपाण्डित्यगूढे वयसा प्रौढे त्वयि पुत्रपरिवृढे कुटुम्बभारं, संसारधुरं चोभयमपि विगतभयं समासज्य, इतो विरज्य, अध्यात्मसाम्राज्यमुपव्रज्य सिषाधयिषाम्यात्मोन्नतिमिति।

तदा सदाशिवस्तातं गम्भीरध्वनिनाऽह तम्
वर्षारम्भाम्बरोज्जृम्भद्घनस्वनविडम्बिना ॥२७४॥

नम्यते क्षम्यतां तात समागो लघु चालघु
मेऽघं चापि महाभाग यत्ते मोघीकृतं वचः ॥२७५॥

गीताऽधीता मया तात पीता चोपनिषत्सुधा
चिन्तितं सन्ततं हन्त वेदान्ताद्यःममन्थि च ॥२७६॥

मीमांसिता च मीमांसा पूर्वाऽपूर्वोत्तरोत्तरा
निगमानागमां श्चैवाध्यगमं हृदयङ्गमान् ॥२७७॥

अष्टादश पुराणानि परामृष्टानि कष्टतः
निष्कृष्टार्थो मया दृष्टो निर्दिष्टोऽदुष्ट एव च ॥२७८॥

संसारे यदि रज्येयं प्राज्यमभ्यस्य वाङ्मयम्
प्रसज्येद्वातपुत्रीयं पारिव्राज्यं वृथा भवेत् ॥२७९॥

न कथा हि वृथा प्राचां वाचो नीचोदिता न ताः
न च मोदविनोदार्थं वेदशास्त्रोपदेशनम् ॥२८०॥

वीरशैवागमस्तोमष्टीकाटिप्पण्युपस्कृतः
समस्तोऽपि मयाभ्यस्तस्तत्रापि च विशेषतः ॥२८१॥

अयं यत्संसारो भुवि भृशमसारो हि मनुजं
विपत्कारागारे विगतपरिहारे व्यथयति
तदत्रोर्व्यां घोरा गमयति नरान्नारकशुचः
भवं मुञ्च प्राञ्चो मनुज भवमञ्चेत्यकथयन् ॥२८२॥

के दाराः पापसस्यानां केदारा इति निश्चिनु
नोदासीनो भवातस्त्वं केदारेशं भजानिशम् ॥२८३॥

तेषां महापुरुषाणां निगमागमोपनिषदां च निदेशानुसारेण असार मेतत्संसारं दारागारादिकं च दूरत एव परिहृत्य आजन्मब्रह्मचर्यव्रतेन आरिराधयिषामि तमेव हररूपं परब्रह्म। अचलोऽयं मम निर्णयः- नात्राऽगृण्हन्तु मां भवन्तः। परमनुगृण्हन्तु। उभावपि मातापितरौ मम देवतास्वरूपौ एव।

एवं स्पष्टवादिनं शम्भुसुतमम्बा सोरस्सम्बाधपरिरम्भारम्भसम्भ्रमेण चूर्णयन्तीव तस्य तद्ब्रह्मचर्यनिर्णयं, अपमार्जयन्तीव निश्वासमारुतैः, दहन्तीव शोणाक्षिकोणाऽशुशुक्षणिस्फुलिङ्गैः, प्लावयन्तीव वात्सल्य रसोर्मिषु स्वाङ्गभुवं, सान्त्वयन्ती च मृदलाक्षरैर्मन्दमवादीत् मधुर स्वरेण–

"वत्स शम्भुलिङ्गेश किमेवं निष्ठुरं वदसि? कुतो वाऽयं आजन्म ब्रह्मचर्यव्रतसङ्कल्पः क्रियते। नायं सुलभो मार्गः। यतिभिः व्रति- भिरपि नैव सम्यक् शक्यते तदाऽजन्मब्रह्मचर्यं नाम पालयितुं व्रतम्।

आजन्मब्रह्मचर्यं हि शारदाप्रेमपातिना
ब्रह्मणाऽचरितं नैव कथं नु सुकरं परैः ॥२८४॥

ब्रह्मचर्येति शब्दार्थो नोद्वोहाऽभाव ईरितः
ब्रह्म वेदांश्चरन्-गृण्हन् ब्रह्मचारीति कथ्यते ॥२८५॥

उद्वूढोऽपि च वेदादि-शब्दब्रह्म-सुनिष्ठितः
ब्रह्मचार्युच्यते नाज्ञो ब्रह्मचार्यप्यनुद्वहन् ॥२८६॥

असारे खलु संसारे सारात् सारतरं परम्
सारङ्गाक्ष्योढया साकं सरसालाप इष्यते ॥२८७॥

सन्तप्तपुरुष-स्वान्त-शान्ति-सञ्जीवनौषधिः
कान्तैकान्तसुखाय स्याद् जाया जीवावधि क्षितौ ॥२८८॥

कान्ताविरहितं पुंसां कान्तारं सदनं भवेत्
वनं च वनितायुक्तं भवनं भुवनोत्तमम् ॥२८९॥

वसिष्ठ-गौतमात्र्यादि-वशिष्ठ-मुनिपुङ्गवाः
गृहाश्रमेऽश्रमेणैव श्रेयः प्रेयोऽप्यशिश्रियन् ॥२९०॥

स्नेहप्रेमामृतासारवर्षैर्योषा हि पौरुषम्
हर्षमुत्कर्षयन्त्येताः प्रमदाः प्रमदप्रदाः ॥२९१॥

यौवने जीवनं शुष्कवनं माधवनं वनम्
कलयन्ती सती शीलशालिनी कस्य न प्रिया ॥२९२॥

तारुण्ये रति-रागाब्धि-तरणी तरुणी सती
वार्धक्ये वर्धकीभूय शं-रथं रोपयेन्नरम् ॥२९३॥

'सदा' 'दासाः' हि सेवन्ते विप्रतीपा अपि स्त्रियः
रामाश्च विपरीता अप्यहो मारार्तिशामकाः ॥२९४॥

वामाऽपि दक्षिणा भार्या पुण्यलभ्या गुणोत्तरा
अपूर्वा च सती-पूर्वा पश्चिमा स्वार्थसाधने ॥२९५॥

वत्स, निर्मत्सरबुद्ध्या क्रियमाणे विचारणे संसाररूपे पुष्कल-दुष्कृत-प्रादुष्कृत-दुःखातप-शुष्क-मरुस्थले प्रणयाविष्कार-सुखपुरस्कार-परिष्कृत-सुख-सौभाग्य-सरण्यः पुष्कराक्ष्यो नाम पुष्कल-पुष्करादिपुष्प-मनोहारिण्यः पुष्करिण्य एव ।

संसारे सकलत्रं हि विकलत्रं तथैव च
कलत्रं नाम धात्राऽत्र सुखदात् विनिर्मितम् २१६॥

रोगेऽनुरागप्युपचारिमाता
भोगाऽनुभोगे सुख-दायि-वेश्या ॥२९७॥

कार्येषु दासी करणेषु मंत्री
कृच्छ्रे च मित्रं प्रथितं कलत्रम् ॥२९८।

अन्यच्च जात! यदैव त्वं मम गर्भात् शुभ्रदीधितिरिव निर्मलतरादभ्रादाविर्भूतोऽसि तद्दिनादारभ्यैव "कदा वा पश्येयं स्निग्ध वधूमुखं! कदा वा द्रक्ष्यामि मुग्धं नप्तृमुखं! कदा वा भजेयं श्वश्रूपदम्! कदा वा श्रोष्यामि पितामहीति पौत्रमुखात् संबोधनं! इत्याद्याशाशत-गृहीत-हृदया चिरादौत्सुक्यात्त्वदीय विवाहमहोत्सवं प्रतीक्षमाणैव तिष्ठामि। मा मामिदानीं निराशां कुरु।

मा चूर्णय मदीयं मनोरथमहासौधम्।

माऽवस्कन्द सुन्दरं मम स्वप्न-मन्दिरं।

पूरय मातुः चिरकांक्षितं।

निवारय पितुश्चिन्तां।

विचारय सारासारं।

उत्सारय अनावश्यकभीतिम्।

उत्तारय पितॄन् पुन्नाम्नो निरयात्।

विस्तारय वंशं।

प्रेरय पित्राज्ञापरिपालने तव मनः।

अवतारय मम हृदयभारम्।

एवमम्बया नयनाम्बुज-प्रस्रावित-बाष्प-कदम्बया निषिद्धः, सोरःसम्बाधं च सम्बोधितः शम्भुलिङ्गः पित्रापि सिद्धेश्वरपण्डितेन अभ्यर्णस्थितेन समभ्यधायि।

"वत्स का ते चिन्ता विवाहकरणे? कुटुम्बभरणभारस्तव मास्तु। अहमेव वक्ष्यामि तव कौटुम्बिकं सकलमपि भारं हारमिव लीलयैव—

एकान्त एकान्तमनोज्ञयाऽलं
त्वं कान्तया शान्त-निशान्त-कोणे
निशान्तकाले मधुचन्द्र-भोगान
पुत्रोपभुंक्ष्वाऽत्र न कापि चिन्ता ॥२९९॥

जन्मदातुः शमदातुश्च पितुर्मातुश्च समाशंसितप्रेयांसि निशम्य वचांसि भूयांसि विनयावनतकन्धरः कन्दर्पदर्पापहकाय-सुन्दरः शम्भुलिङ्गः प्रणतेन मूर्ध्ना, बद्धेन अञ्जलिना, गद्गदितेन कण्ठेन, मेघगम्भीरेण स्वरेण च सप्रश्रयमवादीत्।

"अम्ब, जानामि तव मनोरथम्। सहजः स्वाभाविकश्च सीमन्तिनीनां स्नुषा-नप्तृमुख-प्रेमपुत्तलिका-मुखावलोकनाऽकुण्ठोत्कण्ठाभरः। स च तव मनोरथः सेत्स्यत्येव मदितर-पुत्र परिणयेन, अहन्तु स्वार्थापेक्षया परमपुरुषार्थं, भोगापेक्षया योगं भाग्यापेक्षया वैराग्यं भुक्त्यपेक्षया भक्ति अनुरक्त्यपेक्षय विरतमेव सिषाधयिषामि यावज्जन्म।

वस्तुतस्तु 'बहूनां जन्मनामन्ते लब्धेय मानवी तनुः। आहार-विहार-निन्दा-स्तुति-प्रेम-कामादि-विषय-जन्य-सुखानि तिर्यग्योनिगतैरपि अनुभूयन्ते विनायासं। लब्धजन्मना मानवेन तु करचरणपाटववता किमपि साधनीयं यन्न योन्यन्तरे शक्येत साधयितुं, साध्येत वाऽसादायितुम्। परमेश्वरप्रसादासादितमिदं शरीरं तत्परशिवाकम्पाऽनुकम्पासम्पादनायैव निवेदयितुं सङ्कलितवानस्मि। तरुणेन्दुशेखर-करुणा-किरण-स्फुरण-मात्रेण किं किं न साध्येत। प्रियमातः! पूज्य तात! अद्यप्रभृत्येव 'शिवः' केवलोऽहं शिवः केवलोऽहम्।

मेदिन्यां याश्च मानिन्यो जनन्यस्ता मता मम
जाने कर्तुं तत्र भक्तिं नानुरक्तिं कथंचन ॥३००॥

नार्यो गौर्योऽखिला मेऽत्र
कार्या भार्यामतिः कथम्
मदम्बा-प्रतिबिम्बाः स्युः
कामालम्बाः कथन्तराम् ॥३०

अर्थकामोपयुक्तश्चेद् व्यर्थो देहो भवेन्नृणाम्
संसाध्य पुरुषार्थं तं तदर्थं सार्थयाम्यहम् ॥३०२॥

भवबन्धं विनिर्भिद्य शिवसम्बन्ध साधने
प्रबन्धृतैव वामस्तु माऽस्तु मे प्रतिबन्धृता ॥३०३॥

'शिव' तामधिगन्तुं हि 'वशि' ताऽवश्यकी पुरा
तां सिषाधयिषोस्तात निषेधं माऽशिवं कुरु ॥३०४॥

शिवं मे शिवसारूप्यं प्रेप्सोस्त्वमनुकूलयन
शिवतातित्वमप्याप्य शिवतातत्वमाप्नुहि ॥३०५॥

यमस्योपसमीपे यच्चोढूढं यापयत्यतः
प्राज्ञा उपयमेत्येतमुद्वाहं नु गदन्त्यहो ॥३०६॥

अनुदारत्वशब्दार्थः कार्पण्यं स्त्रैणवृत्तिता
द्वावप्यनर्थहेतुत्वात्त्याज्याविति सतां मतम् ॥३०७॥

भोगान् हन्त भुजङ्गमा अपि
जिहीर्षन्ति द्विजिव्हाः स्वय–
माशाः किं च जडात्मका अपि
घना मुञ्चन्ति कृष्णान्तराः

रागस्तापकृताऽपि धर्मदिवसे
नोन्मुच्यते च क्रमात्
प्रज्ञोपज्ञनरैर्विवेकिमतिभि
स्त्याज्या न किं तेऽखिलाः ॥३०८॥

नो मञ्चा न गृहा न चञ्चलदृशो
द्रव्यं श्रमात्सञ्चितम्
चञ्चत्किञ्चन किञ्च
काञ्चनमपि त्वां चानुयान्त्यये ॥३०९॥

सञ्चित्यैवमिदं च मुञ्च
सकलं प्रापञ्चिकं नश्वरं
तं चाहीश्वरभूषमञ्च गिरिशं
त्वं चेत्सुखं वाञ्छसि ॥३१०॥

भोगा रोगसमा गृहाः पुनरिमे पापग्रहोपग्रहाः
कान्ताः कृन्तनकारिकुन्तसदृशः पुत्राश्च शत्रूपमाः
मुक्तादाम सुधाम हेमसुमणिस्तोमो हिमानीसमः
शम्पाकम्पनचञ्चला हि सकला सम्पद्विपद्गुम्फिता ॥३११॥

परिणामे विषं दुःखं विषमा यापयन्त्यहो
तस्मादेते बुधैर्नूनं विषयाः परिकीर्तिताः ॥३१२॥

न जातूपयमं किं तु यमार्तिहमुमेश्वरम्
यमांश्च नियमांस्तस्माद्यमी भूत्वा सिषेविषे ॥३१३॥

पाणिपीडनमेतन्न प्राणपीडनमेव हि
मुक्तपक्ष्युपमो मर्त्यो बध्यते मोहपञ्जरे ॥३१४॥

चञ्चच्चञ्चल-चञ्चला-चय-चमत्कारा‌ऽस्थिरा हि श्रियः
संसारोऽयमपार-दुःख-वडवाऽकूपार-घोरः स्मृतः ॥३१५॥

निश्शेषा विषया विषातिविषमा रोषान्धशेषाशिषो
ह्येतज्जीवितमेव चाम्बुजदलाग्राब्बिन्दुवच्चञ्चलम् ॥३१६॥

सुविमृश्य तदेतदञ्जसा सकलं नश्वरमित्यवेत्य च
मनुजेन विवेकशालिना परिहेया विषयाः समस्तशः ॥३१७॥

तदहं तु विरज्य संसृतेरिह संत्यज्य धनालयादिकम्
हरभक्ति-विरक्ति-भाग् यते तपसा मुक्तिपदोपसत्तये ॥३१८॥

देहे गेहे न मे मोहो न स्नेहो विषयेऽष्वपि
विवाहं बहुदुःखाम्बुग्राहं न करोम्यहं ॥३१९॥

क्षन्तव्यो मेऽपराधोऽयं मन्तव्यो नाहमन्यथा
अवश्यमनुमन्तव्यो ब्रह्मचर्य व्रताप्तये ॥३२०॥

आजन्मब्रह्मचर्येण तपश्चर्याव्रतक्रमैः
आर्यापति-सपर्यादि-पर्यायैर्जन्म सार्थये ३२१॥

आत्मोद्धार-जनोद्धार बद्ध-श्रद्धाकृतोद्यमः
सिद्धेश्वरसुतः कार्यसिद्धये चानुगृह्यताम् ॥३२२॥

नमामि चरणौ पित्रोः न मामिह युवामुभे
नकारादेशतश्चाप्तनिकारं कर्तुमर्हतः ॥३२३॥

प्रसीदतं युवामत्र न कदाचिद्विषीदतम्
उपसीदामि वां पादौ न चेत्सीदामि चिन्तया ॥३२४॥

कोशीकुर्वन्तु वो मय्येवाशीराशीपनुस्थिते
प्रस्थितेऽध्यात्ममार्गे मे भवद्भिर्नार्गलायताम् ॥३२५॥

मुमुक्षुरस्म्यहं मंक्षु न मिमंक्षुर्भवोदधौ
बिभक्षामि भवं नैव बुभुक्षाम्यैन्द्रियं सुखम् ॥३२६॥

मातर्मातर्मेति तात ब्रूतं पोतं निषेधतम्
भवाब्धिपोतभूतं त्वत्पोतं मां कुरुतं मुदा ॥३२७॥

पुनः पुत्रमुखं मातः पिस्पृक्षसि दिदृक्षसि
तदेश्वरोन्मुखं पुत्रं विमुखं तात मा कुरु ॥३२८॥

नमामि पितरौ भूयः न मामितरपुत्रवत्
विवाहोक्तमवेतं तु वृषवाहोद्वहं हृदा ॥३२९॥

इति परःशतैः आत्मनः कुलस्य च हितैः विहितैर्बिनयसहितैः वचनजातैः अनुनीय अनुरुध्य अनुनाथ्य सम्प्रार्थ्य च कथञ्चन मातापित्रोः संमतिं सम्पाद्य तयो स्सानन्दम् आशीर्वृन्दममन्दमनुविन्द्य ब्रह्मानन्द सगन्ध परमानन्द-तुन्दिलः शम्भुलिङ्गः निरर्गलात् सकल-भौम-सुख-स्वर्गात्ससम्भ्रम-सम्भृत-बन्धु-वर्गात् स्वगृहात् निर्गतवानपवर्गमार्गं मार्गयितुकामः ।

॥ इति पञ्चमस्तरङ्गः ॥

॥ अथ षष्ठस्तरङ्गः ॥

एवं क्षेत्रारामाभिरामं स्वग्रामं, समुद्रिच्यमानमातापितृस्नेहं स्वगेहं, हृदयान्तराल-पोपूर्यमाण-प्रेमसिन्धुं, बन्धुवृन्दं दरेतरादरान् सोदरान् निरतिशय-वात्सल्य-रस-भागिनीं भगिनीं, अकृत्रिमप्रणयपात्राणि मित्राणि, इतरत्सर्वमपि एकपद एव बुद्ध इव प्रबुद्धः, वामदेववदेव स्तम्भितकामदेवः शुकाचार्य इव त्यक्तसांसारिकचर्यः अवधूत इव निर्धूत-विषय-व्यामोहः, स्नात इव वीतरागः, सूर्योदय इव निरस्त-समस्त-तमोभरः, शम्भुलिङ्गेश्वरः बङ्कापुरग्रामात् प्रस्थितः ग्रामैकरात्रसञ्चारेण सोगलक्षेत्रं, होसूरु चिदम्बरक्षेत्रं अन्यानि भगवल्लिङ्ग-सज्जन-सङ्घ-सन्निधानपावनानि तीर्थक्षेत्राणि पर्यटन् चोळचगुड्ड नामिकां ग्रामाटिका-मभ्युपाययौ ।

तत्र चिरादन्नदानादि पुण्यकर्म-प्रथितं कोरीमठमागत्य तत्रत्यैः सबहुमानमुपनिमन्त्रितः पञ्चषदिनान्युषित्वा पञ्चसायक-परिपन्थिनं तमेव प्रपञ्च-सर्ग-स्थिति-कारणं कर्तित-वैरिञ्च-पञ्चमशिरसं चञ्चच्चन्द्र-चारु-चूडापीडं देवं मृडं पञ्चरात्राद्यागमोक्तप्रकारेण भक्त्युद्रेकसमुदञ्चित-रोमाञ्च-कञ्चुकित-कलेवरः आनञ्च पञ्चाचार्य – सम्प्रदायानुसारेण पञ्चोपचार-षोडशोपचारादि-पूजा-विधानैः ।

ततश्चैकस्मिन् दिने प्रभात समय-सञ्जनित-माञ्जिष्ट-राग-रञ्जित मञ्जु-वन-वनस्पति-लता-कुञ्ज-मञ्जरी-पुञ्ज-मञ्जुलतरे उषःकाल एव उत्थाय सिस्नासु-जन-पातक-पटल-निवारिणीं नरकवैरिणीं स्फटिक-सप्रभ-सलिल-मनोहारिणीं सुधा-सगन्ध-सुगन्ध-सुस्वादु-सलिल-स्यन्दिनीं-

सकललोकानन्दिनीं मलापहातरङ्गिणीमवगाह्य कृतस्नानः ततो धृत परिधानः कलितभस्मलेपनः अवलम्बितमौनः साधितप्रणिधानः विहित ध्यान आचरितशिवार्चनः परिसमापितजपानुष्ठानः नदीतीरादुदस्थात्।

ततो मलापहानदीतटात् नातिदूर एव नाक-लोकाञ्चल-सञ्चरत्सुर-लोकंपृण-फल-प्रकर-परिगत-नैक-नारिकेळाऽनोकह-निवहं मनोहर नाना-नागवल्ली-वल्ली-मतल्ली-समुद्वेल्लित-पूग-तरु-पूग-परिमण्डितं सौगन्ध-भरानन्दित-पान्थ-सन्दोहं पिचुमन्द-माकन्दादि-तरुवृन्द-निबिड-छाया-सुशीतलं चञ्चत्पल्लवाञ्चल-चारु-चिञ्च-वट-न्यग्रोधादि तरु-सञ्चयोदञ्चित-फल-पर्ण-छायादि-सन्तर्पित-सञ्चारि-सार्थं विकसदरविन्द-सन्दोह-निष्यन्ददमन्द-मरन्द-बिन्दु-पानानन्द-तुन्दिलेन्दिन्दिरवृन्दोद्गीर्यमाण-सङ्गीत-भङ्गी-मधुर-नाद-तरङ्गाऽमोदित-भक्तसङ्घ कैळासाङ्गणमिव नृत्यन्नीलकण्ठं, भारतीयैवाङ्मयमिव नानाऽगमसम्पन्नं, सुरलोकमिव विलसत्सुमनोविराजितं, अष्टग्रहयोगमिव अकालावतारितदुर्दिन सूर्यसंसारमिव छायोपलालितं, ग्रहणसमयमिव अदत्तोष्णकरावकाश अमावास्यादिनमिव तमःप्रचुरं, दमयन्तीसौभाग्यमिव नलसमृद्धिसमुल्लसितं, दुर्योधनचित्तमिव शकुनिपक्षपातोच्छ्वासितं, नन्दगोकुलमिव-वत्सवृषभधेनुकाक्रान्तं, अधोक्षजवक्षस्थलमिव वनमालालालित दृष्टिदोषभयादिव वनदेवतया विपिनान्तर्भागोपगूहितं, शैत्यागारमिव वसन्तलक्ष्म्याः उत्पत्तिस्थानमिव शान्तेः, केन्द्रमिव विविक्ततायाः, निर्वापणसदनमिव आतपतापस्य, उपशमनक्षेत्रमिव श्रान्ति-क्लान्तीनां, उत्पादनगृहमिव निर्वृतेः, सरजस्कमपि अतिपावनं, शिवाधिष्ठितमपि परममङ्गलकरं, कपिकुलाधिष्ठितमपि चित्रशिखण्डजातोद्भासितं, परमरमणीयं बनशङ्करीदेवालय परिसरप्रदेशमुपाससाद ।

तत्र देवस्थानस्य पुरस्थितायां तट-स्फुटन्नव-नलिन-पुटनिष्ठ्यूत-मधुपान-लम्पट-षट्पद-पटली-पापठ्यमानोङ्कार-शङ्कावह-झङ्कार मनोहारिण्यां शैवालबाहुल्यतया हरिद्वर्णपयोधारिण्यां पुष्करिण्यां प्रक्षाल्य पाणिपादं गर्भागारं प्रविश्य ददर्श भगवतीं नगधरतनयां जगदण्ड-मण्डल

नर्माण - शौण्डीर - खण्डपरशु-नयन -पुण्डरीक-भ्रमद्-भ्रमरायमाणचेतस्कां, वनस्थलीमिव सिंहाधिष्ठितां, काव्यपद्धतिमिव । सर्गोपसर्गनिर्माणचतुरां, असुरसाम्राज्यश्रियमिव कविप्रवराभिनन्दितां, कमलिनीमिव वनान्तरोष-शोभितां, महानसस्थलीमिव भक्तसङ्कुलां, रविप्रभामिव साधितोदयां हस्तिनावतीमिव कृपानुगृहीतधृतराष्ट्रां, योगिचित्तप्रवृत्तिमिव गृहीतविष माक्षां,कादम्बिनीमिवनीलकण्ठहृदयाल्हादिनी,प्रभातसन्ध्यामिव कुङ्कुमकान्तिकमनीयां, वनस्थलीमिव द्विजश्रुतिघोषमुखरितोपान्तां, जीवप्रवृत्तिमिव भवानुरागबद्धां, भागवतकथामिव स्कन्दानन्दासन्दयिनीं, सुरासुर-मुकुटी-तटिघटितहारिहीरज्योतिर्नीराजितपादपल्लवां जगज्जन्म-स्थेम-प्रत्यवहार-कारणीभूतां सर्वोद्धारिणीं जगदनिष्टापादकदुष्ट- भ्रष्ट - पापिष्ठ-दनुज-कुल-संहारिणीं संसार-सागर-समुत्तारिणीं खड्गत्रिशूलादिघोरायुधधारिणीं समस्त-क्षमा-क्षेम-करीं रिपु-कुल-भयङ्करीं शिवकिङ्करीं बनशंकरीं ददर्श ववन्दे चामन्दभक्तिसन्दानितमौलिः । उपश्लोकयामास सद्यः-स्फूर्ति-समुत्पद्यदनवद्य-हृद्य-पद्यैः कतिपयैस्तां बनशङ्करीं परवशतया ।

विरूपाक्षाऽपेक्षा-सुविहित-तपः-क्षाम-वपुषा
वितन्वाना सार्थं युवतिकुलतन्वीपदमपि
महापातिव्रत्याद् भुवि वर-सतीशब्दजननी
जगद्रक्षादक्षा भवतु च मुदे दक्षतनया ॥३३०॥

यद्-हुङ्कारमवेत्य मृत्युधनुषष्टङ्कारमुर्वीतला-
तङ्काः नाशमयन्ति देवरिपवोऽहङ्कारमूढाः खलाः
अङ्काऽस्पृष्टशशाङ्कसुन्दरमुखीमङ्कादृतेभानना
मोङ्काराक्षररूपिणीमिह भजे तां कालिकामातरम् ॥३३१॥

भक्तानामभयङ्करीं प्रणमतां क्षेमङ्करीं सर्वदा
शैवानां च शिवङ्करीं सुजनतासौख्याङ्कुराम्भोधराम्
दैत्यानां च भयङ्करीं परशिवप्राणां च तत्किङ्करीं
वन्दे तां बनशङ्करीं सुमनसां पुंसां सदा शङ्करीं ॥३३२॥

नम्र-स्वर्ग-पुरी-विराजदमरी-नारी-शिरश्चामरी–
वालोद्यत्कबरी-समूह-सुरभीकारोपकारोद्धुराः
प्रेयांसो मरुतां तवाम्ब च पटीयांसोऽघविध्वंसने
भूयांसः पदपांसवो विदधतु श्रेयांसि भूयांसि मे ॥३३३॥

दृष्टा तुष्टिकरी पुनः पदयुगे स्पृष्टाच पुष्ट्यावहा
याऽष्टैश्वर्यमभिष्टुता ननु सरीसर्ष्टि प्रसन्नान्तरा
इष्टाकष्टहरार्चिता ननु वरीवृर्ष्टीष्टभाग्यं श्रियं
प्रेष्टामष्टवपुःशिवस्य गिरिजां स्तोतुं क ईष्टे कविः ॥३३४॥

पादाब्ज-प्रणतातिनम्र-जनता-खेदापनोदक्षमां
वादातीत-चरित्र-शील-महितां वेदादि-बोधोदयाम्
श्रीदानाऽभयदान-सौभग-विधानोदार-धीमातरं
बादामीनिकटे भजे स्थितवतीं केदारभागे शिवाम् ॥३३५॥

वन्दार्विन्द्वरविन्द-बान्धव-सदानन्दादि-वृन्दारक–
स्त्रीन्द्राणी-मुख-सुन्दरी-कच-लसन्मन्दार-सन्दोहतः
निष्यन्दन्मकरन्द-बिन्दु-घटिताऽनर्घ्यार्घ्य-पाद्याऽर्हणां
नन्दिस्यन्दन-चन्द्रचूड-दयितां वन्दे बनीशङ्करीम् ॥३३६॥

यत्पाद-द्वय-पङ्कजात-युगलस्याराधनात्साधनात्
भक्तानामिह पङ्कजातमखिलं नश्यत्यवश्यं क्षणात्
यत्पादाङ्गुलि-धूलि-धूसर-तनुः पूतोऽवदातः क्षणात्
शुद्धात्माख्यसुखानुभूतिममलां धत्तेऽम्बिकांतां भजे ॥३३७॥

चूडापीडदृढोडुराज शकलां क्रोडानमर्त्तिसहिकां
क्रीडारूपतयाऽभिरक्ष्य सकलं व्रीडां हरेस्तन्वतीम्
क्ष्वेडार्तेश्च निवारिणीं पतिहरस्यैडान् कवीन् कुर्वती–
मीडेऽहं बनशङ्करीं शिवमनः पक्षीश नीडायिताम् ॥३३८॥

मन्दानामपि दक्षिणापथभुवां मन्दान्यभाग्या शिवः
सन्दातुं वनसंस्थितां करुणया सन्दानितां मातरम्
स्कन्देभाननवच्च पामरनृणां वृन्दे प्रसूवत्सलां
नन्दार्थं बनशङ्करीं भगवतीं वन्देऽरविन्दाननाम् ॥३३९॥

मातस्तेहं सदा पोतो भवामि भवती पुनः
भवाब्धि तरणे मेऽद्य पोतत्वं भजतु क्षणम् ॥३४०॥

सिंहाङ्कां च शशाङ्काङ्कदेहालङ्कारयोषितं
किङ्करीभूय सेवेऽहं शङ्करीं लोकशङ्करीम् ॥३४१॥

स्थाणुं या समुपाश्रिता स्वयमहोऽपर्णा विशाखान्विता
सद्यः पल्लवयत्यथापि भजतां श्रेयोङ्कुरान् श्रीकरान्
या कुर्यात्फलितं मनोरथतरुं सम्पुष्पितं संश्रये
तां खण्डेन्दुशिखण्डखण्डपरशोर्भार्यां वनी चण्डिकाम् ॥३४२॥

शम्पाभामलकान्तिपूरलसिता भक्तानुकम्पान्विता
नैलिम्पावलिमौलिरत्न महसा सम्पन्ननीराजना
लुम्पन्ती दुरितानि सौभगमलं सम्पदायित्री नृणाम्
संपात्वीशकुटुम्बिनी पदनतं मां पामरं शङ्करी ॥३४३॥

दम्भाध्मात-निकुम्भकुम्भिगलसम्भेदोग्रसिंहां भजे
गम्भीरध्वनि निर्जिताम्बुदकदम्बाऽम्भोध्युदाडम्बराम्
जम्भाराति-मुखामरेश्वरशिरःसम्भावितांघ्र्यम्बुजा-
मम्बां तां बनशङ्करीं भगवतीं शम्भोःप्रियंभावुकाम् ॥३४४॥

वने स्थिताऽपि या देवी जनानामवने रता
रक्तं पाति सुरारीणां विरक्तं चापि पाति या ॥३४५॥

भयङ्कर्यपि दैत्यानां सज्जनानां शिवङ्करी
भवनिष्ठापि या देवी भवच्छेत्री नमामि ताम् ॥३४६॥

विषादिना समाश्लिष्ठा स्वयं यद्यपि या सती
प्रसादगुण भूयिष्टा तां वन्दे बनशङ्करीम् ॥४४७॥

नीलकण्ठं नर्तयन्ती सिंहं संलासयन्त्यपि
द्विजघोषश्रुतीड्येयं यथार्थं वनशङ्करी ॥३४८॥

पित्रर्णं हि समर्पयन्ति तनयाः श्राद्धैर्वचःपूरणैः
पुत्रर्णस्य समर्पणं हि भजते पित्रोश्च कर्तव्यतां
भक्तिस्ते विहिताऽनृणोऽस्मि तनयःश्रद्धाभरात्संस्तुवन्
मां नोद्धृत्य कथं सुतं तव शिवे जायेत तेऽपर्णता ॥३४९॥

तत्रैव गर्भागारे स्थितः कश्चन विपश्चिद् अर्चक भूसुरः लोकं-पृणैर्नैकैः श्लोकैरेकान्तमनोरमैरेकान्ते शिवकान्तां, हृदयान्तरुद्रिक्तभक्ति-भावपारवश्येन भावगीतरूपेण उपश्लोकयन्तं अत्यद्भुतप्रतिभाप्रभावितं आदिशङ्काराचार्य-जयदेव-जगन्नाथादि कवीन्द्र सजातीय कमनीय-नमनीय-रमणीय-कविता-वनिता-स्वयंगृह-परिष्वङ्ग-सुमङ्गल-सौभाग्या-लिङ्गितं विलक्षणं पुरूषपुङ्गवमेनं निरीक्ष्य आक्रान्त इव औत्कण्ठ्येन चकित इवाश्चर्येण, मेदुरित इव आदरेण, कवलित इव कौतुकेन, प्रेरित इव जिज्ञासया,वाचालित इव विचिकित्सया, आर्द्रीकृत इव स्नेहेन प्रसादित इव पाण्डित्येन. वशीकृत इव आशुकवित्वेन, प्रचोदित इव विप्रतासहज चापल्येन, विस्मापित इव विलक्षणप्रतिभया, प्रभावित इव ब्रह्मवर्चसा श्री शम्भुलिङ्गशिवाचार्याणां समीपमुपसद्य प्रसन्नमुखमुद्रयाऽप्राक्षीत् "विप्रोत्तम–

" के यूयं कुत आगता अधिगता विद्यानवद्या कुतः
सद्यःस्फूर्ति-निबद्ध-हृद्य-रसवत्पद्यैरवद्योज्झितैः

हृद्यानन्दथुमध्यगामसदृशं चाद्यैव गीर्वाणवाग्-
वैशारद्यमहोऽध्यगामि च कथं विद्वत्त्वमेतादृशम्" ॥३५०॥

तदीयेन च प्रश्नेन अवतारितो भावसमाधेः। काव्यलोकादवरोपितः सत्यसृष्टं, श्री शम्भुलिङ्गयोगीश्वरः अवलम्ब्य गाम्भीर्यं, अनाविश्चिकीर्षुर्नैजं स्वरूपं व्यङ्ग्य, भङ्ग्या एव उदतीतरत्–

"दोषज्ञः कश्चि‌द्विद्वान् दोषं जाने न कस्यचित्
तस्मादहं न विद्वान्मे विद्वत्त्वं च कुतो भवेत् ॥३५१॥
नाहं सुराप्रियो नूनं कथं वा स्यां कविः पुनः
शङ्करी-किङ्करः कश्चिदीषद् ज्ञानाङ्कुरोदयः" ॥३५२॥

एवं प्रीतिविस्फारितेक्षणं पद्यश्रवणानुभूतक्षणं स्वयं कवनरचना विचक्षणं स्फुटपाण्डित्यलक्षणं तमर्चकमभिधाय पुनःशङ्कर्याः प्रदक्षिण नमस्कारादींश्च विधाय पुनरप्येकदा क्षणं निमीलितेक्षणं, बद्धाञ्जलि-पुटं देव्याः पुरस्तादवस्थाय संस्तूय च ततो निरगात्। आगाच्च कोरीमठम् तां निशां तत्रैवानषीत्।

परेद्युः प्रातरेव अरुणारुणकिरणसङ्किरणकारणे। सत्रांबरण धारिण्यामिव धरिण्यां माञ्जिष्ठरागरञ्जितायां, प्रतिभासित-रजनी रमणी-दीर्घश्वासानिल-निर्वापितेष्विव निलीनेषु नक्षत्रदीपेषु, कुमुदिनीशोकाश्रुक्षालितेष्विव विशदीभवत्सु आशामुखेषु, पूषप्रेष्यायामिव उषायोषायां सन्ध्यामयूखजालसंमार्जिन्या तमस्तोमावकरनिकरं दूरात्स-मुत्सारयन्त्यां, तिमिरग्रहणमुक्तवासर-लक्ष्मी-निश्वास इव मन्दंमन्दंवहति पाथोजिनी-पयोज-पटल-पारदृश्वनि प्रभातिके मातरिश्वनि उदयगिरि-गव्हरोपव्हराद् गगनाङ्गणमुत्पतति करनखरविदारिततमस्काण्ड वेतण्ड-मण्डले प्रचण्डोद्दण्डप्रभाकर पुण्डरीके, तत्कर-परामर्शसमुच्छ्वासितायामिव नयनपुण्डरीकानि विकासयान्त्यां सरोजिन्यां, सकल जगच्चक्राक्रमणाय विक्रमिष्णोरर्कचक्रवर्तिनः कलकलव्याजेन जयघोषमिव व्याहरत्सु

पतत्रिषु, श्री शम्भुलिङ्गशिवाचार्य उत्थाय कालेय-मल-कलुषित-मनस्क मानव-कुल-कलित-कश्मल-जालापसारण-पटुतया मलापहेति सार्थाभिधां सुरवर-वराह-कलेबर-समुद्भूतां सरित्प्रवरां गङ्गामिव कृतशिवानुषङ्गां वनशंकरीमिव वनविहितोल्लासां लक्ष्मीमिव फेनबुद्बुद चञ्चलां-हरिकथामिव मत्स्य-कूर्मादि-लीला-मनोहरां. हिरण्याक्षरुधिरधारामिव नरसिंहपीतां, धरणीमिव वराहोद्धृतां, गिरिजाकुचतटीमिव गजाननाऽस्वादितां, पण्डितबुद्धिमिव विविधविषयावगाहिनीं, विष्णुमूर्तिमिव शंख–चक्रसमुद्भासितां, कामधेनुमिव विमलपयोधरां वैष्णवगुरुपरम्परामिव नैकतीर्थोपशोभितां, गौरीमिव पशुपतिगणाप्यायिनीं, देवहूतिमिव सम्भृत सन्ततिं, विद्वद्विचारसरणिमिव कूलंकषां, भीष्मशय्यामिव विस्तीर्णशर-तल्पां, मेघकुलपरम्परामिव पुष्करावर्तप्रधानां, सिस्नासुजनपापापहा–रिणीं, मज्जज्जनसन्तापनिवारिणीं, मलापहारिणीं निर्झरिणीमुपागच्छत् ।

तस्याश्च सज्जनमनसीव सुप्रसन्ने, साधुजनचरित इव निष्कल्मषे सूर्यातप इव पंकहारिणि, सन्तापहारिणि विमलवारिणि कृतावगाहनः श्री शम्भुलिङ्गशिवयोगीश्वरः कृतजपः विहितान्हिकः समापितलिंगपूजा-विधानः धृतविभूतिः ततः प्रातिष्ठदुत्तराभिमुखः ।

क्रमेण ग्रामाद् ग्रामं वनाद्वनं सञ्चरन् बीळगीपर्वतश्रेण्यां कस्यांञ्चिद् वनद्रोण्यां सिद्धेश्वर स्थानमुपासदत् ।

तत्र पञ्चदिनानि प्रपञ्चविस्मयकरं पञ्चाग्निसाधनतपोनुष्ठानं पञ्चाचार्यपरमानुग्रहसमुदञ्चितमनोदार्ढ्यः परिसमाप्य ततो हुलियाळु कानन प्रदेश वासिदिगम्बरसाधुपुरुषस्य तपोभूमिं बिल्वमनमुप.जगाम ।

तत्र च परमरमणीये घन-निबिड-पत्र-पटल-निवारित-रवि कर प्रवेशे शैत्यागार इवातिशीतले, मन्दमन्दसुगन्धगन्धवहस्तनं धयान न्दसन्दायके बिल्ववने चतुर्दशमासान् यावदध्युष्य अतिघोरं मुनिमहर्षि दुष्करं महत्तरमतप्यत तपः ।

बाढोफनामकः चन्नबसप्पनामा शिवभक्तः कन्दमूलफलोपहारोपपादनेन गुरूणां महत्तरतपोनुष्ठान सौविध्यं संपाद्य अगण्यपुण्यभाजनतामनैषीदात्मानं ।

अम्बरचुम्बि-न्यग्रोधौदुम्बर-रम्भा-जम्बीर-निम्ब-पुन्नाग-कदम्बादि-विविध-छायातरु-कदम्बसम्बाधिते घन-वन-निबिड दुर्गकान्तारान्तर्भागस्य गर्भागारायिते तस्मिन् जनसञ्चारशून्ये विविक्ते बिल्ववने ऋक्ष-हर्यक्ष-तरक्षु-द्वीपि-खड्गघृष्टि मुख-दुष्ट-नाना-क्रूर-हिंस्र-पशवः स्वच्छन्द सञ्चरन्ति स्म सर्वदापि तेषां च क्रूरश्वापदानां वाधोपरोधापनोदाय इतः पूर्वमेव तत्रानुष्ठितमहिष्ठतपोज्येष्ठः दिगम्बरसाधुश्रेष्ठः तत्रैव वनान्तराले चतुर्हस्तपरिमितं संस्कृतसुधाचूर्णलेपनदृढतरं शिलाशकलैः दृढिष्टमेकं प्रकोष्ठं स्वतपोनुष्ठानाय निर्मापितवानासीत् ।

तदेवेदानीं स्वस्यापि तपश्चर्यायै योग्यस्थानमिति निश्चित्य तदेवाधिष्ठाय योगिवरिष्ठः तपोगरिष्ठः नैष्ठिकब्रह्मचारी शम्भुलिङ्गेश्वरः अष्टमूर्ति देवश्रेष्ठं शम्भुमुद्दिश्य महिष्ठं तप आतिष्ठत शीतातपवात वर्षादिकष्टकोटिमगणयन्नेव । तच्च खलु दिगम्बराश्रमसनाथं वनान्तरम्—

स्वयं पुष्पर्धिसम्पन्नं बिल्वपत्रवनान्तरम्
नैवान्यपुष्पवत्पादप्रवेशं चक्षमे स्वयम् ॥३५३॥

एकान्तकान्तकान्तारे तत्रैकान्तमनोरमे
प्रशान्ते चाश्रमे तेपे नितान्तश्रान्तिदं तपः ॥३५४॥

क्रूर श्वापदघोरं तद्वनं न वासयोग्यं । नात्र कार्या तपश्चर्येति बहुभिर्विज्ञापितम् ?

परितश्चाश्रमं तत्र क्रूरा घोराश्च भीकराः
विश्वापदः श्वापदा हि सञ्चरन्त्यकुतोभयम् ॥३५५॥

तरक्षवश्चरन्त्यत्र प्राणिमांसबुभुक्षवः
क्षणदेवेक्षितप्राणिक्षयक्षेपक्षमाः क्वचित् ॥३५६॥

खड्गा नाम मृगा मृत्युहस्तखड्गायिता इव
नृमांसैरेव तन्वन्ति पारणापूरणाविधिम् ॥३५७॥

ऋक्षा विहिंसने दक्षा रुक्षा विक्षोभयन्त्यदः
यदीक्षालक्ष्यतां यातो जीवन्नेव न लक्ष्यते ॥३५८॥

शरभा स्सिहसंहाराः सिंहाभावे नरानिह
करभा इव भञ्जन्ति चेक्षुभञ्जं कदाचन ॥३५९॥

सर्पाश्चात्रोपसर्पन्ति श्वासोत्सर्पद्विषोल्बणाः
स्पृष्टो दृष्टोऽपि दष्टो यैर्नरश्चेन्नष्ट एव हि ॥३६०॥

विषमोग्रविषाणाग्राऽविषहा महिषा वने
स्ववाह्यमृत्युसान्निध्यं प्रापयन्तीह जीविनः ॥३६१॥

अजस्रास्रप्राशिनोऽत्र हिंस्रा वन्याः सहस्रशः
तदाश्रमपदं ह्येतत् श्वापदैरापदां पदम् ॥३६२॥

तपश्चर्या नात्र कार्या न सौकर्यं च किञ्चन
प्राणापायो नित्यमेव पुनश्चापि विचार्यताम् ॥३६३॥

इत्थं निवेदितं भक्तैरभियुक्तैश्च सज्जनैः
युक्तियुक्तं वचश्चोक्तं गुरुभिर्नाभिनन्दितम् ॥३६४॥

कृत्तिचर्मधरो देवो नागभूषो वृषध्वजः
गजाननपिता पाति सिंहाङ्कोमा च मां सदा ॥३६५॥

न कोऽपि हिंसितुं शक्तो हिंस्रो मामिह भक्षितुम्
त्र्यक्षेण प्रेमपूर्णेन कटाक्षेणाभिवीक्षितम् ॥३६६॥

विचार्यैतदशेषेण कार्येत्येवावधार्य च
कुर्यामहं तपश्चर्यां नात्र कार्या विचारणा ॥३६७॥

गौर्याः पतिं समुद्दिश्य चर्यते केन वार्यते
सपर्यापरपर्याय तपश्चर्या मयाऽधुना ॥३६८॥

अंहोरंहोनिहंत्री सा सिंहाङ्का सर्वमङ्गला
सिंहादिसर्वहिंस्रेभ्यो विश्वसिम्येव रक्षति ॥३६९॥

गजाजिनधरो नागभूषणो वृषभध्वजः
शिखिवाहगजास्याभ्यां सहितः पाति सर्वतः ॥३७०॥

निधार्यैतन्मनस्येव निर्धार्य च विचार्य च
धैर्येणैतत्प्रेर्यमाणः तप्तुं प्रावर्तिषं तपः ॥३७१॥

एवं स्वभक्तान् सान्त्वयित्वा प्रारेभे योगीश्वरः महत्तपः ।

स धैर्यधारिधुर्यः श्री शिवाचार्यमुनीश्वरः
तस्मिन् विजनकान्तारे घोरे तपसि संस्थितः ॥३७२॥

अव्यग्रेण शिवैकाग्रमनसा चातपत्तपः
उग्राऽनुग्रहकांक्षित्वात्तपसश्चोग्रतोचिता ॥३७३॥

अशनं प्राशनं किंचिन्नाशासानो जितासनः
स-दैत्यनाशनेशानोपासनोपोषणं व्यधात् ॥३७४॥

आश्रमाद् बहिरेवैते चरन्ति प्रचलन्ति च
क्रूराश्च भीकराकारा हिंस्रा नागा मृगाः खगाः ॥४७५॥

श्रीशैलमण्डपाकारप्रकोष्ठात्माश्रमस्य च
न द्वारं न छदिर्भित्तिर्मुक्तद्वारस्य सर्वतः ॥३७६॥

दिगम्बरमहासाधु कृते तत्रोटजे स्थितः
शिवाचार्यस्तपश्चर्यामत्याश्चर्यकरीं व्यधात् ॥३७७॥

किं भीता अभिभूता वा भवतीभूतानु सर्वशः
सर्वभूताश्च सत्वानि नान्तः प्रविविशुः क्वचित् ॥३७८॥

बहिर्गर्जन्ति शार्दूलाः पर्जन्यस्फूर्जितोर्जितैः
निस्वनैर्नान्तिकं यान्ति नमन्तीव च दूरतः ॥३७९॥

सूकरा भीकराकारा. सैरिभा वैरिभीषणाः
दूरतो दारयन्त्येव धरां नाऽयान्त्युपाश्रमम् ॥३८०॥

फूत्कुर्वन्ति च वाशन्ति चीत्कुर्वन्ति च दूरतः
गर्जन्ति विविधाः सत्वा बहिरेव न चान्तिके ॥३८१॥

स्नानार्थं बहिरायाति यदाऽसौ योगिराट् तदा
दूरादेव हि पश्यन्ति निर्निमेषं तपस्विनम् ॥३८२॥

केचित् प्रदक्षिणां केचिन्नमस्कारं चमत्कृताः
तत्तेजसेव कुर्वन्ति भक्त्या भीत्या नु कौतुकात् ॥३८३॥

क्रूराण्यपि च सत्वानि तत्राक्रूराण्यहोऽभवन्
सत्वेतिनामयाथार्थ्यं सात्विकीभूय लेभिरे ॥३८४॥

तपःप्रभावाच्छ्रीशम्भोः पशवः सौम्यतां दधुः
लज्जास्थानेऽभिमानोऽभूत् तदा पशुपतेर्हृदि ॥३८५॥

केकिहर्षासु वर्षासु धाराकाराम्बुवर्षणे
तपसो नापकर्षोऽभूत् प्रावर्धत तपोङ्कुरम् ॥३८६॥

तपतौ तपनात्युग्रोष्मातपे तापयत्यपि
अलोपितधृतिः सोऽयं प्रातप्यत महत्तपः ॥३८७॥

हेमन्ते वर्षभूपालसामन्ते हन्त सोऽतपत्
यमानीकसमानीव हिमानी नाप्यबाधत ॥३८८॥

काल-शासि-महाकाल-करुणाकलयाऽशिषा
निराकुलः सर्वकाले तपः प्रावर्तयत् सुधीः ॥३८९॥

एवमाचतुर्दशमासं तदा तदाऽचान्तक्षीरनीरफलरसः आचरितसमाधि रयमाचार्यवर्यः समाचचार अत्याश्चर्यकरीं तपश्चर्यां निरन्तरं निरन्तरायं च तत्पूर्वकृतसुकृतपरिपाकेन अत्यन्त यशस्वितया सुसम्पन्नं तच्च तपः तत्फलं च निष्कामः कामहराय सोमधराय प्रकामभक्त्या समर्पयामास योगीश्वरः।

ततस्तस्यैव सर्वकर्तुः शर्वस्य सर्वकारणेन प्रेरणेन प्रचोदितः बिल्ववनं परित्यज्य श्री शिवाचार्यः हुणशीकट्टिमार्गतः मुण्डगनूरसमीपे नदीमुत्तीर्य विदरीग्रामे त्वेकदिनमुषित्वा कर्णाटकेऽतिसुप्रसिद्धं चिरकालं पुरा यवनभूपाल अल्लीआदिलशहादिशासितं गोलगुम्मटादिविश्वविस्मापकवास्तुशिल्प वैभव-द्योतक-मन्दिर-समाधि-मसीदादि-शोभितं विजयपुरं नाम नगरं समुपासदत्।

तस्याश्च नगर्या उत्तरस्यां दिशि परिशोभमाने शोभाऽसमाने श्री जयशङ्करदेवस्थाने स्थित्वा त्रीणि मासानि यावत् पुनरप्याचचार परिहृताहारं परिसेवितात्पाल्पक्षीरनीरं अनालोचितविहारं समाकलितसर्वजनोद्धारं दूरीकृतदुःखभारं परित्यक्तलौकिकविचारं अनाकलितप्रचारं प्रसादित-त्रिपुरारिं घोरं तपः ।

विजयपुरवासिषु भूयांस एव विद्वांसः महीयांसो व्यापारिणः गरीयांसो गृहस्थाः, वरीयांसो नागरिकाः, बंहीयांसः भावुकाः वर्षीयांसो विवेकिनः, पटीयांसो विद्यार्थिनः, अतनीयांसः पामराः, दवीयांसः श्रीसामान्याः, नेदीयांसो मान्यमहोदयाः, असङ्ख्या एव भगवत्प्रसादा - कांक्षिण्यः सीमन्तिन्यः, अपरिमिता एव तरुणाः, अगणिता एव भीमा– शङ्करभक्ताः तपस्विवर्याणां योगिधुर्याणां श्रीशिवाचार्याणां अत्यपूर्वतपः प्रभावाकर्षिताः एतादृश-महायोगि सन्दर्शन-लाभाशया प्रहर्षिताः अन्तरङ्गसमुद्रिच्यमानभक्तिभरसमुत्कर्षिताः समुपागच्छन् भीमाशङ्कर देवस्थानम् ।

तपोनुष्ठानस्य परिसमाप्तिदिने तपस्विमहाराजाः सर्वेषामपि भक्तानां स्वीयं सन्दर्शनं समनुगृह्णन्तीति वार्तामुपश्रुत्य दूरदूर, नगर– ग्रामेभ्यः सहस्रश एव पौराः ग्रामण्यश्च अहमहमिकयाऽगत्य श्री भीमा- शङ्करदेवस्थाने स्थितवन्तं उत्तप्त-सुवर्ण-सवर्ण-सु-वर्ण-निर्वर्ण्यं सर्ववर्णी- यविद्वद्वरेण्य समुपवर्णितं विशाल-फाल-तल-विलसित-सितासित-भसितो- द्भासितं कम्बु-कम्र-कण्ठोपकण्ठ-विलोल-रुद्राक्ष-मालाऽभिलक्षित- विशाल- वक्षस्थलं मूर्तिमन्महादेवानुरागकवचेनेव विकचकोकनादोदरकिञ्जल्कपुञ्ज मञ्जिष्ठरागारुणकाषायाम्बरेण संवीतवपुषं, तेजोगोलकाभ्यामिव नयन- पुटाभ्यां समन्तादरविन्दवनानीव वितन्वानं, प्रसर्पता देदीप्यमान-दिव्य- देह-दीधिति-भासा, महीयसा ब्रह्मवर्चसा, गरीयसा तपोमहसा च परितः प्रभापुञ्जपञ्जरमिव निर्मिमाणं, उदयकालमिव रक्ताम्बरोपशोभित आदित्यमिव निरस्तसमस्तदोषं, चन्द्रमसमिव साधितसकलकलोदयं वैश्वानरमिव काष्ठान्तरालविसर्पितेजसं, विष्णुमिव सुदर्शनोद्भासिकरं- शङ्करमिव नीलरुचिरोमाञ्चितं, चतुर्मुखमिव हंसकुलावतंसकेतुं, शरत्का, लमिव तपोवसानरमणीयं, विनायकमिव करप्रवर्तितदानं, कृष्णमिव अर्जुनरुचिरविभूतिं, कुबेरमिव सुवर्णश्रीविराजितं, वसिष्ठमिव परिगृहीता क्षमालं, गोविन्दमिव यशोदयालालितं, मरुत्प्रदेशमिव अपापं, विठ्ठलमिव विकसितहृदयपुण्डरीकान्वितं, प्रदोषसमयमिव प्रस्फुरत्तारकं, पार्वतीतपः

प्रभावमिव वशीकृतविषमाक्षं, शिशिरसूर्यमिव परित्यक्तदक्षिणाशं, सन्ध्याकालमिव काषायकान्तिशोभितं, आदिशेषमिव परित्यक्तभोगं, परमेष्ठिनमिव लब्धपरमहंसप्रतिष्ठं, पर्यायमिव अर्यम्णः, विकल्पमिव कल्पवृक्षस्य, प्रतिबिम्बमिव शम्बरारेः, पुनरुक्तमिव सनत्कुमारस्य, वीप्सामिव कुमारस्य, द्विर्भावमिव नन्दीश्वरस्य, समुदञ्चितैकस्वरूपमिव पञ्चाचार्याणां, अमुष्टं मोहेन अस्पृष्टमसूयया, अदृष्टं कामेन, अनाकृष्टं विषयैः, अनाधृष्टं लोभेन, अनाघ्रातं गर्वेण, अचुम्बितं दम्भेन, अलक्षितं स्वार्थेन, अविडम्बितमहम्भावेन, अविकारितं ममकारेण, अनर्तितं प्रतिष्ठापिशाचिकया, भास्वन्तमपि न दुस्सहकरं, कलानिधिमपि न दोषाकरं पावकमपि अकृष्णवर्त्मानं, वशिष्ठमपि न रामानुरागिणं गिरीशमप्यनुग्र चतुराननमपि नरजोमूर्ति, विनतानन्दनमपि न पक्षपातिनं, विबुधाधिपमपि न गोत्रभेदकं, पुण्डरीकाक्षमपि न लक्ष्मीलोलं, प्रियव्रतमपि न पराक्रमाक्रान्तदिशं, कविमपि न सुराप्रियं, बुधमपि न कलंकिसम्भूति गुरुमपि न काव्यद्वेषिणं, श्रीराममपि न कनकमृगतृष्णाकुलं, धामधाम्नां कुलभवनं कलानां, रहस्यस्थानं सौमनस्यस्य, वेश्म वैराग्यस्य, प्रत्यादेशं नास्तिक्यस्य, सीमानं शान्तेः, निलयं नियमानां, उत्पत्तिक्षेत्रं भक्तिबीजांकुरस्य, संगमतीर्थं सर्वविद्यानां, तपःपरिपूतैः दृष्टिपातैः पावयन्तमिव-जीवलोकं, क्षालयन्तमिव पापराशिं, विस्तारयन्तमिव पुण्यप्ररोहान्, अपनोदयन्तमिव चिन्तासन्तापान्, सान्त्वयन्तमिव दिदृक्षून्, भगवन्तं तं यतिमघवन्तं श्रीशम्भुलिङ्गशिवाचार्ययोगिराजं दृष्ट्वा भक्तिभरोद्रेकेण पुलकिताः हर्षप्रकर्षेण निर्भराः मस्तकविन्यस्तहस्ताः प्रणेमुः आविपालगोपालं आपण्डितपामरं सर्वेऽपि विजयपुरपौराः ।

कमलकुड्मलमालायितकरयुगलं व्यजिज्ञपंश्च प्रार्थनामुद्रया "अयि पूज्याः समादृतप्रव्रज्याः सकलपापकर्शनेन अत्रभवतां भवतां दर्शनेन पूताः कृतार्थाश्च वयम् । श्रीश्रीमतां सदुपदेशश्रवणेन वाक्सुधापानेन च पुनरप्यनुगृण्हन्तु नः विजयपुर प्रजाजनानिति सप्रश्रयं सोत्साह चाभ्यर्थयामहे" इति

सुशिक्षितानां जिज्ञासूनां विजयपुरनागरिकाणां प्रार्थनानुरोधेन श्रीशम्भुलिङ्गशिवाचार्याः मधुमधुरया सुधासुन्दरया भावबन्धुरया वचोवैखर्या वेदान्तप्रवचनं विधाय आनन्दयन् सभिकसन्दोहं। पर्यहरन् सन्देहान्। व्यवृण्वत कठिनविषयान्। न्यरूरुपन् प्रमेय पुञ्जम्। समुपादिशन् नीतिपथं। समुपादर्शयन्त च नैक-लौकिक-पौराणिक-निदर्शनानि। समालोचयन् सर्वदर्शनानि समालोडयन् ज्ञान-विज्ञानानि।

श्रीशिवाचार्याणां हैमगिरि-दरी-सरीसर्पज्झरी-जललहरी-परीभाव-चातुरी-जरीजृम्भमाणोपन्यास-वाचो-वैखरी-माधुरीं समास्वाद्य परमानन्द तुन्दिलानां मन्देतरमतीनां स्वयमान्दोलितानि मूर्धानि, आनन्दितानि हृदयानि, उत्फुल्लानि अन्तःकरणानि, हर्षाश्रुपूर्णानि नयनानि, गद्गदिताः कण्ठाः, पुलकिताश्च तनवः, परवशतया च स्वयमेव निस्सृतानि "अहो पाण्डित्यम्! अहो वाग्वैखरी! अयमेको जङ्गमज्ञानकोश एव भूतलमवतीर्णो बृहस्पतिः। नूनमेते श्रीमत्याः सरस्वत्याः पुरुषावतार एव अपूर्वोऽयं ज्ञानभाण्डारः। अहो भाग्यमस्माकं यदीदृशानां पण्डितप्रकाण्डानां प्रवचनामृतपानसौभाग्यमधिगच्छाम" इत्यादीनि विविधरचनानि बहुवचनानि वदनविवरेभ्यः। ततः पौनःपुन्येन विद्वन्मान्याः सामान्यजना अपि विजापूरवासीयाः सर्व-मान्य-विद्वन्मूर्धन्य-श्रीशम्भुलिङ्गशिवाचार्योपन्यासान् विहितज्ञानविकासान् आगत्य आदृत्य संश्रुत्य च धन्यमेवामन्यन्त आत्मानम्।

एवमुपश्रुत-बहुश्रुत-श्रीशिवाचार्य-विश्रुत वाङ्मुखानां भूवहिर्मुखानां समेषामपि विजयपुरीयपौराणां च श्रीचरणानामगाधं पाण्डित्यं,अत्यद्भुतां, प्रवचनपरिपाटीं, लोकोत्तरं तपःप्रभावं, अदृष्टपूर्वं ब्रह्मवर्चः' अनितर साधारणं विषय-विवेचत-पटीयस्त्वं अन्यान्यांश्च असामान्यान् सर्वमान्यान् सद्गुणान् समवलोक्य अगाधा एव समुदपद्यत श्रद्धा असीमा एव प्रावर्धत भक्तिः।

अयमपरः शारदापतिर्ब्रह्मेति ब्राह्मणाः, भुवनतलं भूषयन् अभिनवः कोऽपि ब्रह्मणस्पतिरिति क्षत्रवैश्याः, साक्षाद् गणाधिपतिरेवेति वीरशैवाः, वाचस्पतिमिश्र इति शंकरमतावलम्बिनः शशंकिरे शंकर-किंकरं तं शिवाचार्यम् ।

तदीयं गाढपाण्डित्यप्रौढिमानं सरसवचोमधुरिमाणं शास्त्र प्रवचनपटिमानं सदुपदेशस्वादिमानं शीलसौहार्दसदाचारादि साधिमानं तपोमहिमानं गुरुत्वगरिमाणं वैदुष्यवरिमाणं च दर्शं दर्शमादर्शजीवनं च आविपालगोपालमाब्राह्मणभृत्यं सर्वेषामपि मनसि अंकुरिताऽसीद् गुरुभक्तिः ।

विजयपुरस्य जोहारपेटनाम्नि विभागे कृतवास्तव्याः समाशंसित-भव्याः केचन शुद्धान्तःकरणास्तरुणाः कतिचन वृद्धाश्च भक्तिसमृद्धाः नातिदूरतरे भीमाशंकरदेवमण्डपे तपस्यन्तं सदापि शंकरं नमस्यन्तं, पार्वतीशप्रसादनाय प्रयस्यन्तं, गुरुवरेण्यमुपेत्य सम्प्रार्थयामासुः बद्धाञ्ज-लिपुटं –

"गुरूत्तमा यतिसत्तमाः! अस्मिन् विजयपुरे पुरातनकालादेव-सुप्रसिद्धः सर्वविद्वज्जनादरणीयः नैकैर्जन्मशुद्धैः तपस्सिद्धैः ज्ञानप्रबुद्धैः योगादिसमृद्धैः जगत्प्रसिद्धैः त्रिकालज्ञानिभिः देवांशसम्भूतैः यम-नियमा-सन-प्राणायाम-प्रत्याहार-ध्यान-धारण-समाध्यष्टांग-योग-प्रयोग-भक्ति-योग-संसाधिताष्ट-सिद्धि-समृद्धि-सन्तुष्टाष्टमूर्तिभिः अष्टदिगन्तराल-विततशारदशशिसप्रभ-कीर्तिभिः काचकाञ्चन-काष्ठाष्टापद-समबुद्धिभिः अपरोक्षीकृत-परोक्षवाहनैः विचक्षण-विलक्षण-परोक्ष-पुरुषैरधिष्ठितः रेणुकगोत्रीयो बृहन्मठो नाम महान् गुरुपीठो वरीवर्ति ।

तं चास्मद्देशे वीरशैवमतप्रसारकेन्द्रायमाणं लक्षाधिक-भक्त-शिष्य समूह-गुरुस्थानीयं गणाधीशांशमहितैरेव महानुभावैः पुराऽरूढं तमेतं गुरुपीठं साम्प्रतं अत्रभवन्तो महान्तः परावरज्ञानवन्तः सन्तो दान्ताः शान्ताः महामहिमवन्तो भवन्त एव अधिरोढुमर्हन्ति ।

तदस्माकं समेषामपि विजयपुरप्रान्तवासिनां भक्तानां शिष्याणां च प्रार्थनामनुरुध्य, महापीठस्य महीयस्त्वमनुलक्ष्य च तमेत बृहन्मठ महासंस्थानं कृपयाऽलङ्कुर्वन्तु धीमन्तो वैराग्यभाग्यवन्तः श्रीमन्तो भवन्त इति भूयोभूयः सम्प्रार्थयामहे ।

श्री श्रीमतां अनियत्तां विद्वत्तां, दर्शितानुभावं तपःप्रभावं, अनन्यं सौजन्यं योग्यैकयोग्यं वैराग्यं, सर्वश्लाघ्यमाध्यात्मिकसौभाग्यं, निराकृतस-कलानुपपत्ति शमदमादिसम्पत्ति, इतराननुकार्यं महौदार्यं अम्भःसम्भृत-सागरावधीरणधुर्यं गाम्भीर्यं, प्रतिक्षिप्तद्राक्षेक्षुमाक्षिकमाधुरीं वाग्वैखरीं, निर्जित-निर्जर-झरीमुपन्यासचातुरीं, परोपकारप्रावण्यं, व्यवहारविद्या-नैपुण्यं, सर्वनिर्वाहकौशल्यं, समयोचितबुद्धिपौष्कल्यं, कार्यदाक्ष्य विचारसौक्ष्म्य, अन्यांश्च अनन्यसामान्यान् मान्यान् गुणान् निशमयन्तो, निशामयन्तश्च प्रत्यक्षमेव साक्षात् श्रीरेणुकाचार्यपरम्पराप्राप्तस्य परम पवित्रस्य अस्य विजयपुरीयस्य महतो बृहन्मठस्य श्रीश्रीमन्तोऽत्र भवन्तो भवन्त एव अर्हत्तमा यतिसत्तमा इति निश्चित्य, आलोच्य, मिथो विचार्य, सभायामैकमत्येन निर्धार्य, श्रीचरण-चरण-समीपमुपासीदाम, सम्प्रार्थ-यामश्च सश्रद्धं विज्ञापयामश्च साग्रहं पीठमेनमलङ्कर्तुम् । अस्माक मिमां प्रार्थनामनुयाचनां च सदयमनुमान्य सादरमङ्गीकृत्य सोत्साहं पीठमारुह्य च अनुगृण्हन्तु नः विजयपुरभक्तजनान् । अस्मद्वचने विश्वस्य विश्वस्याऽपि विश्वस्य विदधतु परमोपकारमिति" ।

तेषां च गणनापथातिगानां शिष्यजनानां प्रार्थनामङ्गीकृत्य, अनुनयमादृत्य याचनामनुमान्य, अपेक्षामनुमोद्य, आग्रहं प्रतिपद्य स्वभावत एव दाक्षिण्यप्रकृतयः, जात्या एव कारुण्यशीलाः, प्रकृत्या एव च मृदुहृदयाः श्रीशम्भु-लिङ्गयोगिनः ॐ इत्युक्तवन्तः ।

तेषां सम्मति सूचक ओङ्काराक्षर-श्रवणाव्यवहितोत्तरक्षण एव-आनन्दसिन्धाविव निमग्नाः मेरुशिखरमिव समारूढाः, तृप्तेः पराकाष्ठा-मिव प्रपन्नाः सहस्राधिकाः वीरशैवमतीयाः युवकाः हर्षोद्रिक्ता अनृत्यन्

वर्जीयांसोऽपि भूयां त एव विद्वांसः गृहस्थाश्च ससम्भ्रमसमारम्भं श्रीशम्भु, लिङ्गशिवाचार्यान् बृहन्मठं प्रतित्समागन्तव्यमिति नारीकेलफलं पुरतो निधाय उपनिमंत्रयांचक्रुः।

सर्वेऽपि जनाः संभूय वाद्यवैभव पुरस्सरं शोभायात्रया नृत्यन्तो गायन्तः लवन्तः–

"श्री शम्भुलिङ्गयोगीश्वरमहाराजकी जय"

"श्रीबृहन्मठकी जय"

इत्यादिप्राकृतभाषामयैः।

"विजयन्तां पञ्चाचार्याः, विजयन्तां श्रीशम्भुलिङ्गशिवाचार्याः वर्धतां वीरशैवमत समृद्ध्यतां बृहन्मठः, जेगीयतां शिवयोगीश्वरः" इत्यादि सुरभाषामयैश्च जयघोषैः साम्रेडैः सोत्साहमहापूरैः सोच्चस्व-मुच्चारितैः जयशब्दकलकलकोलाहलैश्च मुखरीकुर्वन्तो दिङ्मुखानि, बधिरीकुर्वन्तो दम्भोलिपाणि-कुम्भीन्द्रस्यापि कर्णकुम्भाम्बरविवरं, भाविस्वमठाधिपतीन् श्रीशिवाचार्यान् आन्दोलिकायामुपवेश्य अहमहमिकया पर्यायेण सोत्साहं वहन्तः विजयपुरस्य प्रमुखवीथीषु घण्टापथं च सञ्चारयन्तः वीजापुरस्य जोरापूर विभागस्थितं बृहन्मठं समुपाजग्मुः सादरप्रमोदभरमेदरितमानसाः।

तत्र च विद्वदुपाध्याय-पुराणिक-वाणिज्यव्यापारि-महाधिकारि-उद्योगपति-कर्मकारि-सर्वकारीयविविधाधिकारि-व्यवसायिशिक्षक-द्रात्कर-प्राडिववाक-न्यायाधीश-विभागाध्यक्ष-मण्डलाधिकारि-प्रभृतयः अशेष-लौकिक-वैदिकाः वीरशैवमतधुरीणाः महाद्वारे एव पूर्णकुम्भवेदघोष जयघोषपुरस्सरं श्री शम्भुङ्गशिवाचार्यान् प्रत्युद्गम्य प्रणम्य च व्याजव्हुः सुस्वागतम्। तत्रैव च मठप्राङ्गणे नूतनमठाधिपतीनां सुस्वागतसमा-

रम्भार्थमेव विनिर्मिते दिव्यभव्ये रंभास्तंभचूतमञ्जरी-नारिकेल-क्रमुक-पूग-पल्लव-तल्लज-समुद्वेल्लित-रमणीये सभामण्डपे अत्युच्चतरे आसने समुपवेश्य कमल-कोशीकृत-कर-कुशेशयाः तद्बृहन्मठीयशिष्य भक्ताश्च अशेषजना भक्तिविशेषपुरस्सरं प्रार्थयन्त–

"भगवन्तः भवन्तस्तपोधनाः विरक्ताश्च । निस्पृहा निस्वार्थाश्च । भवतां कस्यापि आशा वा अपेक्षा वा नास्त्येवेति जानीमो वयम् ।

अथापि अयमास्माकीनो बृहन्मठः भवादृशां आधिपत्ये, समर्थे च नेतृत्वे पुनरुन्नमेत, अधिकाधिकञ्चानुविन्देत समुत्कर्षमिति भावयित्वा भवत आगृण्हीमः । यूयं तु निरपेक्षा विरक्ता यतिपुङ्गवाः ।

अथापि अस्मदनुजिघृक्षया अति पुरातनस्य महामठस्य समुत्कर्ष–सिषाधयिषया च अस्मत्प्रार्थनामनुलक्ष्य अलङ्कुर्वन्तु एतत्पीठं । अङ्गीकुर्वन्तु एतद् बृहन्मठाधिपत्यम् । स्वीकुर्वन्तु एतत्संस्थानाधिकारम् । उपकुर्वन्तु विजयपुरभक्तान् । संस्कुर्वन्तु जीर्णोद्धारादिभिः श्रीमठम् । परिष्कुर्वन्तु पाठप्रवचनादिभिरत्रत्यज्ञानदानादिकम् । निराकुर्वन्तु एतत् स्थलीयजनजाड्यम् । अपकुर्बन्तु नास्तिक्यम् । आविष्कुर्वन्तु धर्म-जागृतये नवीनमार्गान् । प्रादुष्कुर्वन्तु श्रीमत्कीमसाधारणीं कर्तृत्वशक्तिम् । प्रोन्नमयन्तु अस्मद् बृहन्मठम् इति ।

सभामण्डपे मिलितानां महाजनानां आदृत्य प्रार्थनामङ्गीकृत्य याचनामनुरुध्य विज्ञापनां अनुमान्य चाग्रहं श्रीशिवाचार्यास्तान् प्रति भक्तशिरोमणीन् समन्दस्मितपरिस्पन्दं मन्दमवोचन् ।

नाहं कमपि पीठं वा मठं वा कामये परम्
धूर्जटेः पादपीठं हि पर्याप्तं सेवनाय मे ॥३९०॥

कीर्तिमार्ति प्रतिष्ठां च विष्ठां कष्टमभिष्टवम्
प्रशंसामपि मे हिंसां मन्ये नान्यत् प्रियं मम ॥३९१॥

नाकांक्षेऽहं मठाध्यक्ष्यं नाऽपेक्षे पीठगौरवम्
किंतु त्र्यक्षकटाक्षेक्षालक्ष्यतां यातुमुत्सहे ॥३९२॥

अधिका अरा हि यत्र स्युः सोऽधिकार इति स्मृतः
दोषाधिक्याच्च नाऽशासे चाधिकारमहं क्वचित ॥३९३॥

अधिकारो ह्यधिकारः पीठः स्फोटः शुचां मतः
याजमान्यं न मे मान्यं तस्मात्किञ्चिन्न वांछितम् ॥३९४॥

मठेषु च शठाः कूपकमठा इव संत्यहो
हठात्तत्स्वामिनो दुःखावटेष्वापातयन्ति ते ॥३९५॥

यस्य कस्यापि पीठस्य पतितालाभतो नराः
पतिताः सम्भवन्त्येतच्छ्रियो दुर्व्यसनव्ययैः ॥३९६॥

तस्मादस्माकमेतस्मिन्नकस्मात् समुपस्थिते
बृहन्मठस्याधिपत्ये नाऽस्था नैवातुरस्पृहा ॥३९७॥

अथापि महतां भक्तिमतां मतिमतां च वः
नाकाक्षेऽभीक्ष्णशोऽपेक्षां विहितां समुपेक्षितुम् ॥३९८॥

वयं शिष्यपराधीनाः वो मतं मम संमतम्
मदिच्छा तु यथाप्यस्तु साधयामि भवद्धितम् ॥३९९॥

सामान्यजनसम्भाव्या दोषाः पूर्वं मयोदिताः
न तेभ्यो मम भोरीशाऽनतेभ्यो न भयं क्वचित् ॥४००॥

भक्तानां युक्तियुक्तां तां सामुदायिकयाचनाम्
मोघां कर्तुं न चेच्छामि यच्छाम्यात्मानमेव वः ॥४०१॥

यथेच्छन्ति भवन्तोऽत्र तथा कुर्वन्तु सज्जनाः
शिष्यकल्याणमेवाद्यं कर्तव्यं सद्गुरोरिह ॥४०२॥

भारो वा शीर्ष्णि हारो वा प्रहारो वा निधीयताम्
शिष्योपहार इत्येव तत्सर्वं स्वीकरोम्यहम् ॥४०३॥

हितं च विहितं यद्यत्सहितं धर्मनीतिभिः
रहितं दुरितै स्तत्तत्साधयिष्यामि वःशिवम् ॥४०४॥

एवं विनयबन्धुरया सत्यार्थसुन्दरया मधुमधुरया कापट्यविधुरया समुपदर्शितपीठाधिपत्यदुरुपयोगसम्भाव्यमानानर्थया स्पष्टीकृतसदुपयोगसंभवत्पुरुषार्थया प्रत्यक्षर-क्षरच्छिष्यवात्सल्यया रसभावातुल्यया प्रद्योतित-निजपरम-विरक्तभावनया अभिव्यञ्जित-लोकोद्दिधीर्षा-पावनया आविष्कृतलोकोत्तरौदार्यया अवधीरितधाराधरगांभीर्यया श्रोत्रजनमनोहारिण्या सुधास्वादिमपरिष्करिण्या वचस्सरण्या उपन्यस्यति सन्यासिकुलमूर्धन्ये स्वनामधन्ये योगिमान्ये श्री शम्भुलिङ्गशिवाचार्ययोगीश्वरे प्रचण्डकरतालिकावादनपुरस्सरं स्वानन्दमाविष्कृत्य सर्वेऽपि सहस्रसहस्राः विजयपुरीयप्रातगताः शिष्यप्रशिष्याः "श्री शम्भुलिङ्गशिवाचार्यगुरवे ते नमोनमः' इत्युच्चैरुच्चार्य सामूहिकनमस्कारं साष्टाङ्गप्रणिपातपूर्वकं व्यदधुः ।

साञ्जलिबन्धं सकृतज्ञतानुबन्धं सच्छन्दोबन्धं च भावबन्धुरं काव्यसुन्दरं समुपाहरन् विज्ञप्तिपत्रम् –

धन्याश्च कृतकृत्याश्च भाग्यवन्तो भवाम यत्
अद्यप्रभृति चाऽस्माकं गुरवः शम्भुयोगिनः ॥४०५॥

शम्भुलिङ्गशिवाचार्य साक्षाच्छिष्यत्वसौभगम्
प्राप्य पुण्यवतां मूर्धस्थानमारोपिता वयम् ॥४०६॥

गुरूत्तमानिमान् लब्ध्वा सौभाग्यं वृद्धमद्य नः
अगण्यानि च पुण्यानि पापौघो लोपमापितः ॥४०७॥

अहो कृपापारवश्यं वश्येन्द्रियगुरोर्महत्
निस्पृहोऽपि मठाध्यक्ष्यं शिष्यार्थे चान्वमोदत ॥४०८॥

अहो वैराग्यमेतेषां भोग्यभाग्यश्रिया युतम्
बृहन्मठाधिपत्यं तु नैच्छन्निष्टमपीतरः ॥४०९॥

अर्थसम्पन्नतासार्थबृहन्मठयतीशताम्
कांक्षन्ति बह्वस्सिद्धाः प्रयतन्ते च तत्कृते ॥४१०॥

सम्पन्नशिष्यबाहुल्यसम्पन्नं तादृशं मठम्
अनिच्छन् शिष्यवात्सल्यादग्रहीद्यद् गुरुर्महान् ॥४११॥

वयं शिष्याश्च भक्ताश्च भवन्तो गुरवश्च नः
शिष्यन्तां च विशिष्याद्य शिष्यैः किं क्रियतामिति ॥४१२॥

अस्मिन् परम्पराप्राप्ते गुरुपीठे बृहन्मठे
पट्टाभिषेकं भवतां विधित्सामोऽद्य सोत्सवम् ॥४१३॥

अनुज्ञा दीयतां सर्वसम्भाराहरणाय नः
आज्ञाय च ततः प्राज्ञैर्ज्ञायतां शिष्ययोग्यता ॥४१४॥

एवं महता उत्साहेन, बृहता च श्रद्धाजाड्येन, स्वानन्दमाविष्कुर्वतः, बृहन्मठस्य महत्पीठे स्वं समभिषेक्तुं, पट्टाभिषेकमहोत्सवं च सवैभव समुज्जृम्भयितुं समुत्सुकितान् तान् गुरुभक्तान् विजयपुरवासिमहाजनान प्रति श्री शम्भुलिङ्गशिवाचार्या मन्दस्मितविकसितवदनारविन्दाः सानन्दमवोचन् ।

"हरस्यैवेच्छया जातं तदेतत्सर्वमप्यहो
तद्भक्त्यात्र प्रवर्तंतां निवर्तंतां तथोत्सवाः ॥४१५॥

एवं गुरुवरेण्यानां समभिव्यज्यमान-शिष्यकारुण्यानां साक्षान्मुखन
त्व पट्टाभिषेकसिद्धतासम्पादनाय आज्ञामधिगत्य सोत्साहमुत्सवकार्य
पशस्वितायै भूयांस एत्र श्रीलाः सुशीलाः प्रयत्नशीलाः कटिबद्धवेलाः
प्रारेभिरे प्रयत्नान् ।

'सर्वारम्भास्तण्डुलप्रस्थमूला' इति वचनमनुसृत्य शताधिका एव
ोहिद्रोण्यः गोधूमद्रोण्यश्च सङ्गृहीताः । मधुरमधुरस्य गुडस्य राशिरेव
कत्र शेखरितः । कृष्णातीरात् हैयङ्गवीननवनीतपूरितान् सहस्रा-
धक घटानानाय्य घृतसङ्ग्रहोऽपि अपरिमित एव व्यधायि ।

करन्दीकरनाम्ना च कर्तृत्वशालिना मण्डपकारेण दशसहस्राधिक-
नोपवेशनपर्याप्तं दिव्यं भव्यं विशालं सवितानं सकलविधसुखासिको-
पपन्नं च सभामण्डपं निर्मापितम् ।

पट्टाभिषेकमहोत्सवाव्हानपत्रिका च मुद्रयित्वा सर्वत्रापि आपल्ली-
दिल्लीपर्यन्तमनुप्रेषिता दशदिक्षु ।

एवं स्वस्वकार्योन्मुखेषु सर्वेष्वपि जनेषु, सम्भ्रियमाणेषु, संभारेषु
निर्मीयमाणे राजसूययागार्थनिर्मितमयसभाजित्वरे विशाले सभामण्डपे,उत्त
म्भितेषु तत्र तत्र समच्छ्रित रम्भास्तम्भेषु, विरचितेषु दूरादागमिष्यमाणदि
क्षुवासार्थं कटनिष्कुरेषु संस्क्रियमाणेषु सुधादिवर्णलेपनैः सर्वभक्तभवनेषु
ङ्गारिते समग्रेऽपि विजयपत्तने दूरदूरदेशेभ्यः समागतेषु वीरशैवधुरीणेषु
र्वभावितयैव नागरिकैः सभादेवालयमठमन्दिरेषु सत्क्रियमाणेषु भावपी-
ठाधीश श्री शम्भुङ्गिशिवाचार्येषु, समर्प्यमाणेषु मानपत्रेषु, निवर्त्यमानासु
तिभक्तगृहं भाविबृहन्मठाधीशानां पादपूजादिगौरवसम्भावनासु,
प्रकटीक्रियमाणेषु प्रतिदिनं देशभाषामयवृत्तपत्रेषु सचित्रश्रीशिवाचार्य

जीवनोज्वलचरितेषु, संमृज्यमानासु पुरवीथीषु, रङ्गवल्यादिभिः श्रृङ्गारितेषु सर्वपौराणां गृहाङ्गणेषु, आबध्यमानेषु चूतपत्रादितोरणेषु, कार्यप्रवृत्तायां स्वागतसमितौ, सोत्कण्ठं निरीक्षमाणेषु पट्टाभिषेकदिनं सर्वजातीयेषु सहृदयेषु, सर्वथा सुसम्पन्नायां श्री शिवाचार्याणां बृहन्मठस्य आचार्यपीठारोहणमहोत्सवसिद्धतायां कोऽपि कुपन्थीयः वाममार्गानुयायी शिवपूजायां भल्लूकमिव समुपस्थापयामास महान्तमेव महोत्सवस्य विघ्नम् । चरितार्थयामास च श्रेयांसि बहुविघ्नानि इति वचनम् ।

प्रकृत्यैव विघ्नसन्तोषिणः खलु खलाः । परोत्कर्षासहिष्णुता च स्वभाव एव दुर्जनानाम् ।

घूका इव निर्विवेका लोकबन्धुमहदुदयं न सहन्ते ।

सर्वजनानन्दनस्यापि कलाधरस्याभिवृद्धिं न क्षमन्ते तमःप्रकृतयः।

लोकत्रहर्षकरवर्षकरमपि पयोधरं निंदंत्येव दर्दुराः ।

पङ्क्लजीवनाभिरुचयो निन्दन्त्येव बकाः विमलाशयं सन्मानसम् ।

ईदृशाश्च रोगिष्ठबालका इव बहुलालापाः पापाः केवलं जननी–रागहेतवो हि भवन्ति ।

श्री शम्भुलिङ्गशिवाचार्याणामीदृशमभूतपूर्वगौरवं जनानुराग लोकसङ्ग्रहं समुत्कर्षप्रकर्षं च दर्शं दर्शं सर्वैरपि सजातिभिर्विजातिभिश्च पण्डितपामरैर्जेगीयमानं तद्गुणगाथाकथागानं च श्रावं श्रावं, क्वथित–हृदयः सञ्जातावमानः समुद्दीपितदुरभिमानः कश्चन अनामधेयः धूर्तः मन्थरेव श्रीरामचन्द्रपट्टाभिषेकस्य श्री शम्भुलिङ्गशिवाचार्यपीठारोहण-महामहस्य महान्तमेव प्रत्यूहमुत्पादयितुं कांश्चन स्वसजातीयान् गृहीत-हठान् वाचाटान् शठान् मेलयित्वा आरचयामास कमपि व्यूहम् ।

विविध-प्रकृति-स्वभाव-मानुष भरितायामस्यां वसुन्धरायां न कदाचिदपि सम्बोभवीति मूर्खाणां न्यूनता नाम ।

सर्वजनादरभाजनस्यापि सर्वसद्गुणशालिनोऽपि धर्मराजवदजातशत्रोरपि सर्वदाऽपि परोपकारैकनिरतस्यापि श्री शम्भुलिङ्गशिवयोगीश्वरस्य पीठाधिरोहणमहोत्सवं निरुरुत्सोस्तस्यापि सिषाधयिषतास्वार्थस्य अनामधेयधूर्तस्य केचन बृहन्मठीयशिष्या एव अन्तरङ्गद्वेषिणः हितशत्रवः दुर्दैववशादावहन्नानुकूल्यम् ।

महाधूर्तः स अनामधेयः तानेव अन्तःशत्रून् स्वहस्तकान् विधाय प्रारभत न्यायालये कमपि अभियोगम् ।

"श्री बृहन्मठस्य केवलं विजापूरनगरगत जोहारपेटवासिनो वीरशैवा एव न शिष्याः । किंतु अस्मत्सदृशाः बहव एव हि श्रीमठस्य शिष्यप्रशिष्यास्तत्र तत्र विद्यन्ते विद्योतन्ते च ।

ताननाकार्य अनापृच्छ्य अनालोच्य च केवलं जोहारपेटमात्रगताः मुष्टिमेयाः सङ्कुचितदृष्टयः भक्ताः मिथोमिलित्वा यत् श्री शम्भुलिङ्ग योगीश्वरान् बृहन्मठपीठमारोपयितुमिच्छन्ति प्रयतन्ते च नात्रास्माकं संमतिः ।

सर्वसम्मतेनैव भाव्यं बृहन्मठाधिपतिना । तदेतदेकपक्षीयं शिवाचार्यपट्टाभिषेकविधानं नानुमन्यामहे वयम् । तदत्रैव निरोद्धव्यमिति"

न्यायालये प्राड्विवाकमुखान्तरं प्राचाल्यत अभियोगःकश्चन कैश्चन विघ्नसन्तोषिभिः अन्तरङ्गवैरिभिः ।

सोमवासरे पीठपट्टारोहणोत्सवः समाचरणीय इति निर्णीतमासीत् महाजनसभायाम् । विरोधिवर्गः तत्समारम्भस्य प्रतिबन्धकाज्ञां न्यायालयतः प्रार्थयन्त पट्टाभिषेकमहोत्सवनिरोधाकांक्षया ।

न्यायाधीशाः उभयपक्षयोरपि वादं प्रशान्तेन चेतसा निष्पक्षपातिन्या च बुद्ध्या संश्रुत्य योग्यायोग्ये विचार्य न्यायान्याये विमृश्य सत्यासत्ये परीक्ष्य च वादिवर्गविहितां विज्ञापनां पट्टाभिषेकनिषेधाग्रहं च तिरस्कृतवन्तः ।

शनिवासरे सायङ्काले पत्रवादन समये श्री शम्भुलिङ्गशिवाचार्याणां बृहन्मठाधिरोहणमहोत्सवाचरणं निरातङ्कं निर्विशङ्कं च प्रचलतु इति न्यायालयस्य निर्णयमुद्घोषयन् ।

श्री शिवाचार्याणामपूर्वं पाण्डित्यं असाधारणं तपःसामर्थ्यं निरतिशयं माहात्म्यं निराबाधं सौजन्यं निरर्गलां निष्ठां निर्मलं व्यक्तित्व लोकोत्तरं ब्रह्मवर्चः, विलक्षणां न्याय निष्ठां च निष्पक्षपातां कार्यप्रवृतिसर्वलोकानंदिनीं शांतवृत्ति निरीक्ष्य श्री दातार, श्री देसायि प्रभृतयः ब्राह्मणजातीयाः श्रीं अङ्गडीप्रभृतयः वीरशैवाश्च प्राड्विवेकाः सुप्रसिद्धाः स्वयमेव समागत्य ससन्तोषं श्री शम्भुलिङ्गेश्वरपक्षमेवादृत्य न्यायालये सयुक्तिकं वादमण्डनं व्यदधुः सोत्साहं । परेद्यवि भानुवासरे न्यायालयस्य विरामदिनत्वाद्वादिनः नाशक्नुवन् प्रतिबन्धकाज्ञामधिगंतुम् ।

पूर्वनियोजितकार्यक्रमानुसारेण सोमवासरे श्री शम्भुलिङ्गशवाचार्याणां बृहन्मठस्य आचार्यपीठ पट्टाभिषेकमहोत्सवः महता समारम्भोत्साहेन विध्युक्तप्रकारेणैव निराबाधं निरातङ्कं निर्विघ्नं च सुसम्पन्नः समभवत् ।

बङ्कापूरक्षेत्रगता अरळले ज्येष्ठमठाधीश्वरा मूर्तिमन्त इव वैराग्यदेवताः, साकारा इव सन्यासधर्माः, सावयवा इव परमेश्वरप्रसादाः चक्षुर्गोचरतामाप्ता इव अतीन्द्रियशक्तयः, जङ्गमरूपमापादिता इव आध्यात्मिकसिद्धयः, दमधामानि शमसीमानः भव्यताभूमानः पुण्यमहिमानः

गुरुगरिमाणः सद्विद्यावरिमाणः मनस्सौजन्यसाधिमानः, रामवृत्तांता इव निरस्तदूषणाः, तपोवनतरव इव भूयिष्ठवयसः, शिवाष्टमूर्तय इव भस्मपाण्डुरोमाश्लिष्टतनवः, पाण्डवा इव धर्मप्रधानाः, समदृष्टयोऽपि-विषमदृष्टिभक्ताः परित्यक्तसम्पदोऽपि सश्रीकाः, उल्लसत्कमलाक्षा अपि रुद्राक्षमालालङ्कृताः, विरक्ता अपि गृहीतक्षमाः, अकलत्रा अपि सकलत्राः, अपापा अपि सरसाः, निष्किञ्चना अपि विभूतिसमुद्भासिताः दक्षा अपि त्र्यक्षोपासकाः, अष्टसिद्धिमंतोऽपि अनष्टसिद्धिमंतः, तिरस्कृत दुःशासना अपि परिगृहीतकुशासनाः, क्षमाक्षेमाधानक्षमाः, अनुष्ठितयम-नियमाः, सदासाधितसंयमाः, वैराग्यनिधयः, विद्यावारिधयः, तपोमूर्तयः दिगंतविश्रांतकीर्तयः, श्रीगुरुपादेश्वरशिवाचार्यमहास्वामिनः स्वयं सन्निधाय श्री शम्भुलिङ्गशिवाचार्येभ्यः परमपवित्रप्रणवमंत्रोपदेशमा-कलय्य गुरुमठसम्प्रदायानुसारेण शास्त्रोक्तविधिना पट्टाभिषेकमहोत्स-वमपि ससम्भ्रमं सोत्साहं सादरं च निर्वर्तयामासुः ।

श्री रेणुकप्रमथपुङ्गवसम्प्रदाये
सम्प्राप्त मुख्यमठपीठपरम्परायाम्
यो ब्रह्मचर्यमनुतिष्ठति नैष्ठिकं या–
वज्जीवमर्हति शिवार्यपदाभिषेकम् ॥४१६॥

न कुण्डगोळकादिदुष्कळङ्कितान्वयान्वयाः
न चाङ्गभङ्गिनस्तथा शिवार्यपट्टभागिनः ॥४१७॥

अहीनः सुगुणैर्यस्तु शिवाभरणशेषवत्
सद्वंशजः शिवाचार्यपदभाक् मौक्तिकोपमः ॥४१८॥

इत्यत्र श्रुतयो मानं शतशोऽथसहस्रशः
स्मृतयश्चेतिहासाश्च पुराणान्यागमास्तया ॥४२०॥

कुलेन कान्त्या तपसा दमेन ज्ञानेन भक्त्या च शिवे विरक्त्या
शम्भुः शिवाचार्यपदेऽभिषिक्तः स सर्वथा सर्वगुणैर्महार्हः ४१९

एवं भक्ते विरक्ते भवमुक्ते शिवानुरक्ते लोककल्याणासक्ते योगयुक्ते अभियुक्ते शिष्योद्धरणशक्ते साक्षाच्छिवशक्त्यैवाभिव्यक्ते श्रीशम्भुलिङ्गशिवाचार्ये प्रमथान्यानुपभुक्ते श्रीप्रथितप्रमथपुङ्गवपरम्परा प्राप्ते महाचार्यपीठे ससम्भ्रमसमारम्भं सवैभवविजृम्भितं च विध्युक्त-विधिविधानपुरस्सरं पट्टाभिषिक्ते सति स्वतः सति ब्रह्मवर्चसा विलसति यतिचक्रवर्तितेजसा चकासति योगिसार्वभौमसुषुमागरिम्णा समुल्लसति असङ्ख्या एव आढ्याः मनोलग्नगुरुभक्ति जाड्याः श्रीलाः सुशीलाश्च शिष्याः सानंदमागत्य गुरुवरमेनमुपसृत्य सभक्त्युन्मेषं समर्पयामासुः गुरुदक्षिणारूपेण विपुलमेव धनं मुक्ताः सुवर्णं रजतं ऊर्णवस्त्रादिकं च स्व स्वयोग्यतानुसारम् ।

अयाचितोपनतेन अनिरीक्षितन अनपेक्षितेन स्वयमुपेक्षितेन शिष्यकोटिवितीर्णेन शिवाचार्यपादपीठिकोपांतविकीर्णेन प्रभूतेन द्रव्यजातेन निस्पृहशिखामणयः सद्गुणमणिखणयः श्री शम्भुलिङ्गार्याः दानिधुर्याः चिरकालजीर्णं शैथिल्यशीर्णं भिन्नभित्तिविदीर्णं भग्नप्राकारं भुग्नमण्डपं छिन्नछदि स्फुटितस्तंभं विघटितप्रस्तर-खण्ड-पिचण्डिलं प्राचीनतम स्वकीयं बृहन्मठं पुनर्नवीकृतं चक्रुः शिल्पशास्त्र जक्कणादिकल्पैः अनल्पचातुर्यधुर्यैः स्थपतिवर्यैः । अत्युत्तमजीर्णोद्धारप्रकल्पेन पुनर्निर्माणकुशलकमारिर्कमितं नवीकृतं च बृहन्मठमन्दिरं इंद्रसदनमिव अतिसुन्दरं दिव्यभव्यं च पर्यशोभत ।

॥ इति षष्ठस्तरङ्गः ॥

॥ अथ सप्तमस्तरङ्गः ॥

एवं गच्छंत्यां कियत्यामपि कलकलायां शिष्यजनप्रार्थनानुसारेण सञ्चरन्तः तत्र तत्र, परिहरन्तः भक्तचिन्तां, उद्धरन्तः दीनदलितान् वितरन्तः प्रसादं, विकिरन्तः, दयामृतशीकरान्, विहरन्तः शिवभक्तिरसोदधौ स्फुरन्त इव बालसूर्याः चरन्त इव गुरुकरुणाः, तरन्त इव भवसिन्धुं सरन्त इव शिवमूर्तयः श्री शम्भुलिङ्गशिवाचार्याः कर्णाटक-सीमा-प्रान्त-समुल्लासि सपत्समुल्हासि नैकशिवभक्ततल्लजपरिफुल्लं सोल्लापुरं नाम नगरं समुपाजग्मुः ।

श्रीपादपल्लवक्षेपाद्भाग्यं पल्लवितं पुरः
विपल्लवोऽपि कुत्रापि नादृश्यत यतो जने ॥४२१॥

भक्ताश्चादरयुक्ता हि समागत्य गुरोः पदोः
रजो धृत्वा शिरस्याशु निरस्यन्नात्मनो रजः ॥४२२॥

गुरोश्च भक्त्याऽश्रुजलेन पादौ सुपङ्किलौ सं परिकल्प्यलोकाः
सद्यो विपंकाः ननु सम्बभूवुरहो महत्वं गुरु पङ्कजाङ्घ्र्योः ४२३

तत्र च बहुत्र पण्डितमण्डितेषु सभामण्डपेषु प्रचण्डजनसम्मर्दमध्ये पण्डावन्मण्डलमण्डनमणेः यतिपुण्डरीकस्य योगिव्रजाखण्डलस्य शिवाचार्य सुधीमणेः आविष्कृत वेदशास्त्रादेशं समुपदर्शितपञ्चाचार्यहृदयोद्देशं सदुपदेशं उपन्यासभारतीं च श्रावं श्रावं सोल्लापुरगतभावुकभक्तजना उल्लासं हृदये, उत्साहं मनसि, पुलकं वपुषि, आनन्दमन्तरङ्गे, अञ्जलि

करयोः, कार्तज्ञ्यं शीर्षिण भक्ति भावे, तृप्ति मुखे, प्रणाममुद्रां च स्वस्वाष्टाङ्गेषु सममेव समवहन् समेऽपि ।]

पञ्चषदिनानि तत्र उषित्वा प्रपञ्च-गुरु-पञ्चाचार्य-प्रसारित-तत्वज्ञान-प्रपञ्चनं निर्वञ्चनबुध्या विधाय, जिज्ञासुजनशङ्काः समाधाय, भावुकानां श्रावकानां हृदयगुहासु परमेश्वर मूर्तिमेव निधाय स्वयमपि सदाशिवं हृदि प्रणिधाय तन्नगरं पावयांचकार दीक्षयांचकार शताधिकानेव वीरशैवदीक्षादानविधानेन लक्षयांचकार च सहस्राधिकानेव सज्जनान् विरूपाक्षकृपाकटाक्षविक्षेपाणां स योगिराट् ।

सोल्लापूरनगरे गुरुवरेण्यानां दिव्यं संस्तव्यं च वास्तव्यमुपश्रुत्य नेदिष्ठ-अक्कलकोटनामकनगरगताः साधिष्ठाः वरिष्ठ-गुरु-गरिष्ठ-गुणाकृष्टा भक्त्याविष्टा भूयिष्ठा; एव पौरप्रेष्ठाः शिष्यश्रेष्ठाः श्री शिवाचार्यसन्निधिमुपसद्य पदयुगळमभिवाद्य स्वाशयमावेद्य स्वभक्त्यातिशयं निवेद्य साष्टाङ्गं प्रणिपत्य ययाचिरे"पूज्याः श्रीचरणा अत्रभवन्तो भवन्तो दयावन्तो अस्माकं पुरमागत्य युष्माकं शिष्यसेवकान् अनुगृण्हन्तु-गृण्हन्तु सेवां च नो घ्नन्तु भूर्यघम् ।

इति] शिष्यजनानां समुपश्रुत्य विशिष्य प्रार्थनां दयातरङ्गितान्तरङ्गाः यतिपुङ्गवाः सानुग्रहमङ्गीकृत्य तदीयमादरातिशयमेदुरमुपनिमंत्रणमक्कलकोट संस्थानमागत्य भक्ताग्रेसर गुरुलिङ्गप्पण्ण महन्त-महोदयस्य मूर्तिमदिव गुरुप्रसादं प्रासादं सनाथयांचक्रुः स्वसन्निधानेन । तत्रापि प्रतिदिनं धीमद्धौरेयाणां एतेषामाध्यक्ष्ये प्रावर्तन्त प्रवचनानि प्राचलद् ज्ञानसत्रं प्रावर्धत शिवार्चतनंभ्रमः, प्रदिद्युते वीरशैवज्योतिः, प्रोल्ललास शिवदीक्षादानसमारंभः । स्वमतीया विमतीया स्सर्वेऽपि जना अहमहमिकयाऽगत्य, दर्शं दर्शं गुरुं गरीयांसं, श्रावं श्रावं तदीय साधीयांसमुपन्यासं नामं नामं मृदीयांसं तच्चरणपङ्कजं कारं कारं तनीयांसं] तच्चरणरेणुं स्वशिरसि तनीयांसमियदवधि चात्मानममन्यन्त महीयांसं धन्यतरं च वरीयांसं गुर्वनुग्रहविशेषासादनेन ।

संस्थानमहाराज्ञी कर्णाकर्णिकया समाकर्णयत् यमीश्वराणां अमीषां गरिमाणं गुरूणां वरिमाणं विरक्तानां साधिमानं सुधीमणीनां महिमानं च महामुनीनाम् ।

तत्क्षण एव समुपाधावत् श्रीचरण संदिदृक्षया समागत्य "स्वामिनः स्वराजभवनमागत्य स्वीयं राजातिथ्यं कृपया स्वीकृत्य अनुगृण्हंतु नो राजकुटुम्बमिति" व्यजिज्ञिपत् सविनयं सांजलिबन्धं च ।

ओमित्युक्तवत्यत्र यत्यधीश्वरे अत्यधिकतृप्तिमावहंती सत्यमेव धन्यं कृतकृत्यं चात्मानं मन्वाना महाराज्ञी वासंतिकलतेव विपुलकण्टक-जालकाञ्चिता चैत्रकाननपङ्क्तिरिव आमोदभरभरिता सोत्साह ततो निर्गत्य राजभवनतः श्री गुरुवरेण्यसमानयनाय प्रैषयत् सेनासन्नाहम् ।

राजधान्याः प्रमुखवीथीषु प्रावर्तत शोभायात्रा श्री शिवाचार्याणाम् । अग्रे काहळी-ढक्का-भेरी-आनक-गोमुखादयः ततो मञ्जुल-तूर्यस्वन-वेणु-सारङ्गी-मुख-मङ्गळवाद्यवृंदः, तदनु समवस्त्रधारिणः तालबद्धपद्धतौ त्वरितक्रमेण सरभस-पदतल-प्रक्षेपोत्क्षेपपुरस्सरं चलंतः रक्षापुरुषाः तत्पश्चात् चञ्चच्चञ्चला-चामीकर-चारुचंद्रहासान् हस्तेनोद्यम्य चञ्चला-सञ्चयमिव सञ्चालयंतः सैनिकपुरुषाः, तदनु शुभ्र-स्वच्छतरोच्चै-श्रव-संदोह-संदेह-संदायक-सिंधुर-वृंद-समारूढ-सादिश्रेणी, तत्पश्चात् गायकाः नर्तकाः पूर्णकुंभधारिणः मंत्रघोषं कुर्वाणाः पुरोहिताः मंगल कलश-कुंकुमकरण्डक-दर्पण-लाजाक्षतहस्ताः सुवासिन्यः तत्पश्चात करमुद्धृत्य चारुचामरं वीजयंतौ संस्थानगजराजौ, ततो नातिदूर एव पुष्पमालालङ्कृते मुक्तादाम-स्तोमाभिरामे राजद्रत्नराजिविराजि-ज्योतिः पुञ्ज-नीराजिते सूर्यरथनंदन इव लोचकहृदयानंदने मंद मंद स्पंदने चंदनमये शृङ्गारिते राजस्यंदने समुपविष्टाः वैराग्यमूर्तयः श्री शम्भुलिङ्गशिवाचार्याः तत्पश्चात् परस्सहस्राः जयघोषं कुर्वाणाः नागरिकाः नरा नार्यश्च शनैःशनैः प्रचलंति स्म शोभायात्रायाम् ।

श्री रेणुकाचार्य महाराजकी जय

श्री शम्भुलिङ्गशिवाचार्य महाराजकी जय

जय जय शिवाचार्य महाराज

जय जय श्री शम्भुलिङ्ग महाराज

इत्यादयः लोकभाषामयाः जनस्तोमकण्ठ-कुहरतः निस्सरन्तः अकुण्ठ कण्ठीरव-कण्ठरवकुण्ठीकरणचणाः प्रलयाम्भोधरकदम्बध्वानगम्भीराः श्री शम्भुलिङ्गस्वामिनाम्नां जयजयकाराः विश्व-विश्वम्भराभोगमभिव्याप्य अम्बरान्तरालमप्यापूर्य बधिरयन्ति स्म जम्भारातिकुम्भीन्द्रस्य इतरेषामप्यष्टदिक्स्तम्बेरमाणां कर्णपटलीः । प्रचलन्त्यां गुरुसार्वभौम–शोभायात्रायां प्रमुखवीथीषु प्रतिगृहं सुवासिन्यः गृहिण्यः गुरुमूर्तिं दूरादेव भक्तिभरोद्रेकेण नीराजयन्ति स्म स्व स्वगृहाङ्गणेषु । प्रत्यापणं च वणिग्वराः पुष्पहारान् गुरुपादयोः समर्प्य धन्यं मन्यन्ते स्म आत्मानम् ।

एवं चिरकालानन्तरं गुरुमूर्त्यधिरूढः रथः वाद्यवैभवपुरस्सरं नगरप्रदक्षिणाविधानेन राजभवनमुपासदत् । महाद्वार एव बद्धाञ्जलि-पुटं यतीश्वरानभ्युद्गन्तुं सिद्धा संस्थिता च राजमाता भृत्यवर्गेण राजकुमारेण च समं सप्रश्रयमभिवाद्य सुस्वागतं व्याजहार ।

राजभवनस्य मध्यगतमास्थानमण्डपमानीय अत्युन्नतासन उपवेश्य कनीयसा कुमारेण कारयामास पादपूजां विध्युक्तप्रकारेण । दक्षिणा रूपेण च समर्पयदेकादशसौवर्णनाण्यानि अगण्यं धनराशिं कौशेयवसनानि काश्मीरनिर्मितोर्णवस्त्रयुगलं विविधानि फलानि च ।

राजकुटुम्बविहितां तां गुरुपूजां विलोक्य "एतत्संस्थानप्रारम्भा-दद्ययावद् व्यतीतेष्वपि त्रिशतेषु हायनेषु ईदृशो गुरुपूजामहोत्सव नैकदापि निरवर्तत राजभवने । न कदाचिदपि प्रावर्ततात्र संस्थाने

ईदृशयतितितिपतीनां अभूतपूर्वः सुर्पवगुरोरिव सपर्यापर्यायोत्सवः अत्याश्चर्यंकर" इति सानन्दमुदगिरन् गुरु-पाद-पूजा-वैभव-प्रत्यक्षदर्शिनो वयोवृद्धाः अनुभवप्रबुद्धाः तद्ग्राम-ग्रामीण-ग्राम-प्रामण्यग्रण्यः ।

एवं राजमन्दिरे राजमातुः प्रार्थनानुरोधेन आतिथ्यमादृत्य सत्कारं स्वीकृत्य भक्तिभरोपहृतं च पादोपायनमङ्गीकृत्य राजपरिवार मन्वगृण्हन् श्री शिवाचार्यवर्याः ।

ततस्तन्नगर - गतनैक - भक्त-भावुक-जनानामाग्रहपूर्वक-प्रार्थनामनु-मान्य मान्यश्रीचरणाः राजपरिवारस्येव सामान्यभक्तानामपि गृहेषु आतिथ्यं पादपूजादिकं च स्वीकृत्य स्वकीयं प्राकाशयन् निष्पक्षपात सर्वजनसमानुरागम् । एवं शिष्यजनाग्रहोपनिमन्त्रणानुसारमभिवर्धिते श्री शिवाचार्यमहास्वामिनाम् अक्कलकोटनगरी वास्तव्ये प्रायः सर्वेऽपि संस्थानगताः शिवभक्ताः तल्लाभमासादयन् । सर्वेऽपि पर्यपूपुजन सुपर्व-गुरु-खर्वेतर-गर्व-निर्वापकान् श्री शिवाचार्ययोगिवर्यान् पादपूजा-भिक्षा- गुरुदक्षिणाऽतिथ्य-दानादि-विविध-सपर्या-पर्याय-निर्वर्तनेन ।

न कोऽपि शिष्येषु विशिष्य पूजामशिष्यताऽऽचार्यगुरोरकुर्वन्
सर्वोऽपि गुर्वार्यकृपाम्बुराशौ नमज्जनो मज्जनमन्वचार ॥४२४॥

न जातिभूतो न च वर्गदुर्गो न प्रान्त-भाषादि-भिदा-विशेषाः
गुरोर्न कंचिच्च कृपाप्रपातश्चकुर्दविष्ठं प्रियतं कनिष्ठम् ॥४२५॥

ब्राह्मणाः क्षत्रियाः शैवाः श्रोत्रिया वणिजोऽपरे
शूद्राः क्षुद्रमनोऽभावात्सर्वे गुर्वाशिषोऽभजन् ॥४२६॥

गुरु-मुखाब्ज-निरर्गल-निर्गलत्सरस-सुन्दर-बन्धुर-भारती
सकल-जातिजनान् समनन्दयत् सदुपदेश-निदेश-निदेशिनी ॥४२७॥

प्रवचनं कथयन् प्रतिवासरं जनतयाऽनतया नुतयाचितः
बहुमुखप्रतिभः प्रतिभात्ययं भुवि लसच्छशिखण्डशिखण्डवत् ४२८

गुरुवचः श्रुतवान्द्धिरिहादरान्मधुरमाक्षिकमैक्षवमाक्षिपत्
सुरसुधा स्वदिता मधु माधुरी समशिता च सिता रसिता सिता ॥४२८॥

एकस्मिन् दिने अक्कलकोटपत्तनस्य विक्रीयमाणागण्य पण्यवस्तु-श्रेण्यां, द्रोण्यामिव सम्पद्धूरस्य विपण्यामेकस्यां कोण्यां विद्यमानस्य महान्तगुरुलिङ्गप्पाख्यस्य शिष्यस्य आपणे तत्प्रार्थनानुरोधेन आगत्य उच्चासनासीनेषु विष विषमविषयोदासीनेषु श्री शिवाचार्येषु झिराळग्रामादागतः श्री रामभावुशास्त्रिनामकः कश्चन स्मार्त ब्राह्मणः समुपेत्य यजमानेन समुचितासन उपवेशितः पर्यप्राक्षीद् आपणस्वामिनम् । "अयि महन्तण्ण क एतेऽत्र द्राघिष्ठविष्टरसमुपविष्टा विशिष्टयतिवेषभूषणादिना यतिश्रेष्ठा इव भासमानाः सत्पुरुषाः ? किं नाम एतेषां शुभ नाम ? कुत आगता" इति ।

साक्षादत्रैव स्थितान् तानेव विचारयेत्यित्याह स श्रेष्ठी।

तदुत्तरक्षण एव सशङ्को श्री रामभावुशास्त्री कौतुकाक्षिप्तेन चक्षुषा श्री शिवाचार्यानभिलक्ष्य आपादमौलि चान्वीक्ष्य साक्षादप्राक्षीत्तानेव "अयि स्वामिनः ! कच्चिद्विहितं संस्कृताध्ययनम् ? किं क्रिमधीतम्? इति–

तदुत्तरक्षण एव प्रत्युत्पन्नमतिना श्री शिवाचार्ययतिना सनयेनापि विनयेन धैर्येण चातुर्येण चोदतारि संस्कृतभाषायामेव–

इन्द्राणीश्वरशर्वाणी मुखगीर्वाणयोषितां
श्रेणीड्यामध्यगां वाणीं सौपर्वाणीं यथामति ॥४२९॥

ीतोपनिषदोऽधीताः पीता पौराण भारती
किञ्चित् किञ्चित् किञ्च शास्त्रज्ञानं चापि सुसञ्चितम् ॥४३०॥

विज्ञानोदर्कसत्तर्कसम्पर्क मधुपर्कवत्
शारदाचारम्भकाले बाल्य एवाध्यगामहम् ॥४३१॥

मुग्धेन न मया लब्धं शब्दाब्धावद्भुतागमे
वैदग्ध्यं नापि वाल्लभ्यं किञ्चिद् ज्ञानं त्वलभ्यत ॥४३२॥

मीमांसां मांसलप्रज्ञा विद्वांसस्तंसयन्ति ताम्
अंशतः सिद्धिमाप्तोऽहं वैदुष्याधिजिगांसया ॥४३३॥

शृङ्गाटकं नाटकादि काव्यसाहित्यवैभवः
चम्पूगुम्फनसम्पच्च भाणाः प्राणा दिवो गिरः ॥४३४॥

समस्ता अपि चाभ्यस्ता वाणीहस्तावलम्बनात्
न पाण्डित्यं प्रवेशोऽस्ति शास्त्रे काव्ये च नैपुणी ॥४३५॥

तदा स च श्री रामभावुशास्त्री अदसीयं शास्त्र-साहित्य-प्रगाढ-पाण्डित्यं विनयच्छन्नमपि तद्वचसैत्र सम्यगुन्नीय मात्सर्याभिपन्न-विषादावसन्नः वस्तुस्थितिज्ञानविपन्नः कौतुकतुन्नः पुनरन्वयुंक्त क्वापि च शिवाचार्यज्ञाननैयून्यस्य जिगवेषिषया–

"अस्तु तत्काव्य-शास्त्रादि-संस्कृत-परिज्ञानं किंतु सर्वसंस्कृत शास्त्रमूलस्य वेदवाङ्मयस्य किमस्ति श्रीमतां सम्पूर्णसुविज्ञानम् ?

साधिक्षेपमिव तदनुयोगं निशम्य प्रशान्तेन चेतसा विनयभूषितेन वचसा विसन्देह-निर्णय-प्रोन्नतेन शिरसा, आत्मविश्वासविस्तृतेन चोरसा विलम्बासहिष्णुना तरसा दत्तवानुत्तरं विद्वदुत्तरं वावदूकमहत्तरः शिवाचार्यः ।

विद्वन् विदितमेव विश्वेषामपि विदुषामत्रभवतां भवतां च यदयमपारो हि वेदवाङ्मयाकूपार इति ।

अत एवोक्तमभियुक्तैः "अनन्ता वै वेदाः" इति ।

साकल्येन च तं वेदराशिं न कोऽप्याकल्पते चाकलयितुम् ।

किं न विदितं श्रीमतां भगवतो वेदानामियत्तां परिच्छेत्तुं प्रयतितवतः ऋषिपुङ्गवस्य भरद्वाज महामुनेः कथा ?

त्रीणि जन्मानि समधिगत्य समधीत्य प्रयत्यापि वेदवारिधेः पारमधिगन्तुमपारयन् स मेधाविमूर्धमणिः साक्षात्सहस्राक्षेण आचचक्षे पयोनिधिपुलिनराशेः मुष्टित्रयपरिमितां सिकतामुद्धरता ।

"मुने ! पश्य इमास्तिस्रः सिकतामुष्टीः। मम हस्तसात्कृता सिकता मुष्टिमिता । सागरतीरगता तु अपरिमिता अनन्ता च। एवमेव त्वयाऽपि त्रीणि जन्मानि स्वीकृत्य महाप्रयासेनाधीताऽपि श्रुतिततिः मुष्टित्रयपरिमिता एव । त्वया अनधिगता तु वेदवाणी सागरसिकताराशिवदपरिमिता अपाराऽनन्ता च। सहस्रजन्माध्ययननैरन्तर्येणापि वेदवारिधेः परं पारं न कोऽपि शक्ष्यत्यासादयितुमिति ।

अनेन च निदर्शनेन वेदवाङ्मयस्य सामस्त्येन तलस्पर्शिज्ञानं नामरोऽप्यधिगन्तुं प्रभवति किं पुनर्मादृशः पामरः ।

अथापि "......निष्कारणः षडङ्गो वेदः अध्येतव्यः" "यावतीर्वै-देवताः ताः सर्वाः वेदविदि ...,.... वसन्ति" इत्यादि वचनानुसारेण वैदिकसम्प्रदायानुसारिभिरवश्यमध्येतव्य एव भगवान् वेदः ।

यदि न शक्यते सामग्र्येण अध्येतुं तदा स्वशाखाध्ययनं वा अवश्यं कार्यमेवेत्युपदिशन्ति प्रमाणानि सन्दिशन्ति महात्मानः अनुमन्यते सम्प्रदायः ।

अस्माकमपि आगमोक्ताचारपद्धतौ ऋक्शाखीयनासदीयसूक्त पुरुषसूक्त-रौद्रसूक्तादिमन्त्रवर्णानां पठन-पाठन-प्रवचनोपदेश-मननादि समुदाचारश्चिरात्पुरातनकालादारभ्यैव परम्पराप्राप्त एव। एतेषामन्येषां च प्रमुख वैदिक सूक्तानां मन्त्रसमुच्चयस्य च श्री श्रीमदीशान शिवाचार्यवर्यः तथा श्रीव्योमकेशशिवाचार्यमहोदयास्तथा श्रीकरश्रीपति शिवाचार्याश्च व्यलेलिखन् दिव्यानि भाष्याणि।

श्री रामभावुशास्त्री—युष्माकं वीरशैवमतस्य के त आद्यप्रवर्तका आचार्यपुरुषाः? कच्चिद् ज्ञायते वा यौष्माकीणः पारम्परीणः इतिहासः अविकलमितिवृत्तं च?

शास्त्रिणः प्रश्नमेनमुपनिशम्य तत्क्षण एव एवम् उत्तरमाचचक्षे प्रेक्षावदग्रणीः सकलमपि भूतार्थं कालकुक्षिपारदृश्वना सुसूक्ष्मया ऐतिहासिकप्रज्ञया प्रत्यक्षदृष्टमिव निरीक्षमाणः शिवाचार्यवर्यः।

श्रीमाहेश्वरपादरेणुकणिका भक्त्या स्वमूर्ध्ना धरन्
श्रीमान् रेणुकनामको ननु गणाधीशः स्वमीशप्रियः

आद्यो मूलमहाप्रवर्तकमुनिः श्री वीरशैवाभिध–
प्रोद्यन्नैगमसम्प्रदाय सुमतस्याचार्य आर्यप्रियः ॥४३५॥

ऋग्वेदे किल यो रेवान् इत्युपाध्युपवर्णितः
अगस्त्यसमकालीनः सोऽयं शैवादिपूरुषः ॥४३६॥

शिखर-सन्तत-सन्तत-नीहिकाधिक-शिवा-महिमा-हिमवान् गिरिः
लसदगस्त्यसरोऽत्र च रेवणाभिधसरोऽस्ति चकास्ति च यद्भुवि ॥४३७॥

तत्र खलु रत्न-राजि-विराजिते सुरावासपूजिते शैवमहिमालये हिमालये सुप्रसिद्धस्य सिद्धजनसंसेवितस्य पावित सिस्नासु सार्थस्य रेवान

तीर्थस्य सादरभर उल्लेख: परिदृश्यते व्यासमुनिकृते सत्यभरिते महाभारते द्व्यशीतितमेऽध्याये -

रेणुकस्य च तत्रैव तीर्थं सिद्धनिषेवितम्
तत्र स्नात्वा भवेद्विप्रो निर्मलश्चन्द्रमा यथा ॥४३८॥

तत्र च सिद्धमुनिमनुजसेविते सुरवरसदावगाहपाविते रेणुकतीर्थे ब्राह्मण: स्नातः परिपूत: चन्द्रावदातश्च भवेदिति समुपवर्णित-मास्ते ।

उत्तङ्ग-श्रृङ्ग-सङ्गि-गङ्गा-जल-पावनस्य-शिवदम्पत्यो: क्रीडाङ्-गणस्य गिरिपुङ्गवस्य हिमालयस्य सानुप्रदेशे सन्तं परिलसन्तं च तमेनं सरोविशेषं तत्समीपगतगडवालमण्डल-गत-जनाः रेवणतलावनाम्ना अद्यापि निर्दिशन्ति । रेणुकतीर्थ इति रेवणतलाव इति च द्वाभ्यामप्य-भिधाभ्यां व्यवह्रियमाण:, लोकै: उल्लिख्यमान: ऐतिहासिक ग्रन्थेषु निर्दिश्यमान: पौराणिक प्रवन्धेषु परिदृश्यमानश्च चक्षुषोरद्यापि प्रत्यक्ष-गोचर: अयमेक एव तीर्थराज: विराजतेतमां माहेश्वरश्वशुरगृह्यमाणे शैलसार्वभौमे हिमालये । अनेन च रेणुक रेवणशब्दौ एकस्या एव व्यक्तेः पर्यायवाचकौ तादात्म्यसूचकाविति सेत्स्यति निर्माय निर्मत्सरं च कृते विचारणे ।

वयं सर्वेऽपि गणाधीश्वरेष्वन्यतमस्य शिवानुग्रहेष्वन्यतमस्य पुण्यतमस्य च तस्य श्री रेणुकमुने: परमपवित्रगोत्रजाता: । तथैव भिन्न भिन्न गणाधीश्वरगोत्रसम्भवा बहव एव वीरशैवाः अस्मन्मतीयाः विद्यन्ते । विद्योतन्ते च परमपवित्रस्वस्वकुलनाम्ना महीमण्डलमण्ड-नायमानाः ।

अस्मिन् विषये ईसवीये त्रयोदशे शतके समुत्पन्नः अस्मदादिवदेव वीरशैवसत्सम्प्रदायसम्प्रवृद्धः ज्ञानप्रबुद्ध: रससिद्धः तेलगुसाहित्यप्रसिद्धः

श्री सोमनाथपण्डितः एव प्रमाणम् । सुप्रथित श्री व्योमन्नामका राध्यवंशावतंसमौक्तिकाभरणायमानः स सोमनाथपण्डितः स्वविरचिते मुक्तामणीयमाननैकवचननिचयनिचिते अनुभवसारनामके ग्रन्थे तेलगु भाषामये—

भृङ्गिरिटिगोत्राडुनु गुरु
लिङ्गतनूजुण्ड शिवकुलीनुदर्यो
सङ्गविवर्जितचरितुडु
जङ्गमलिङ्ग प्रसादसत्प्रापुण्डन् ॥४३९॥

इति एकस्मिन् एकान्तत एव लोकंपृण श्लोके स्वयं सोमनाथ कविः भृङ्गि-गोत्रसमुद्भव इति प्रत्यपीपदत् सुस्पष्टमेव ।

एवमेव भिन्न भिन्न परम-पवित्र-गणाधीश्वर-गोत्र-समुत्पन्ना चारुचारित्र्य सम्पन्नाः असङ्ख्या एव माहेश्वरा अस्मन्मतीयाः वीरशैव सम्प्रदायपरम्परायां सुप्रथिताः इतिहास-पुराण-कथिताः परिदृश्यन्ते ।

ब्राह्मणाः वशिष्ठविश्वामित्रादि गोत्रीयाः । माहेश्वरसम्प्रदायानु वर्तिनो ह्यस्मदादयस्तु नन्दिभृङ्ग्यादिशिवगणाधीश्वराणां पावन गोत्र सम्भवा इति तु निर्विवादसिद्धः न्यायानुविद्धः प्रमाणबद्धः सिद्धान्त एव सर्व-विमर्शन-विचक्षणेतिहासाभिज्ञ-प्राज्ञ-पुङ्गव-सम्मतः ।

अस्मिन् विषये कर्णाटकाभिजन-बहुजन-जेगीयमान-कन्नड-दिव्य-काव्य-प्रणयन-लब्ध-कुमारव्यासेत्युपाधिभूषितः नारायणप्पनामककवि-कण्ठीरवः स्वकीयस्य कन्नडमहाभारतस्य अरण्यपर्वणः पञ्चमे सन्धौ—

देवननूरुपदलिनिन्दरु
देवियरु गृहगणपतिगळे
ल्लाविनोददि नोडि धरिसिदरोलिदु शाबरव

आ विगड नन्दीश वीरक
देवलक रेणुक महोदर
दावशिखिमुख वीरभद्राद्यखिलप्रमथगण ॥४४१॥

सन्तोषितसंक्रन्दनेन द्रुपदनन्दनीहृदयानन्दनेन मध्यमपाण्डुनन्दनेन सह सङ्गरप्रसङ्गे पुलिन्दवेषं सन्दधानेन चन्द्रचूडेन सह स्कन्दसिन्धुर वह्न नन्दीश्वर-वीरक-रेणुकादयः प्रमथवृन्दवृन्दारका अपि विनोदेन स्वयमपि शबरवेषं सन्धार्य सानन्दं अन्त्रकरिपुमन्वसरन्निति रेणुकादि प्रमथानां सुन्दरतरं सन्दृश्यते समुपवर्णनम् ॥

शारदानुग्रहेण सर्वविद्याविशारदः श्री नारादादिवत् सुरसन्दोह वन्दितः महर्षिवर्यः श्री रेणुकगणाधीश्वरोऽपि गगनांगणस्वैरसञ्चरण शक्तियुक्तः प्रभावशाली प्रभुपरमेश्वरपरमप्रसादभाजनीभूतो बाभाति शंकरकिंकरेषु भक्तजनप्रियंकरः ॥ सूर्यकिरणान्तरालेऽपि स्वच्छन्दं सञ्चरिष्णुः सर्वत्र गमनागमनसिद्धिमानयं प्रमथगणधुरीणः रेणुकवद्वर्तमानत्वाद् रेणुक इति सबहुमानं व्यपदिष्टः त्रिविष्टमपधिष्ठितैः सुरश्रेष्ठैः धरणीपृष्ठप्रतिष्ठितैः शिष्टविशिष्टैः मुनिमहिष्ठैः विद्वद्वरिष्ठैः नरश्रेष्ठैश्च।

तथा रमणीयतम-रामकथा-परिष्कारक-रामायणनामक-रमणीय-रसोत्कट-महाकाव्य-प्रथमाविष्कार-निमित्तं पुष्कर-प्रादुष्कृत-विरिञ्चादि पुष्कल-सुरसत्तमैरनुत्तम आदिकविरिति पुरस्कृतः परवर्तिभिश्च कविशेखरैर्नमस्कृतः वल्मीकजन्मा महाकविः अरण्यकाण्डे एकादशसर्गे—

आश्रमो नातिदूरस्थो महर्षेर्भावितात्मनः
आगस्त्य इति विख्यातो लोके स्वेनैव कर्मणा ॥४४२॥

आश्रमो दृश्यते तस्य परिश्रान्तश्रमापहः
आज्य धूमाकुलवनश्चीरमालापरिष्कृतः ॥४४३॥

अगस्त्यस्याश्रमः श्रीमान् विनीतजनसेवितः
एष लोकार्चितः साधुर्हिते नित्यरतः सदा ॥४४५॥

युद्धकाण्डेऽपि पुनश्चतुर्विंशत्युत्तरशततमे सर्गे भगवान् श्रीरामः सर्व-सद्गुण-सुमनो-लताऽरामां स्वमनोभिरामां रमणीयतमां स्वरामां सीतां नाम सतीशिरोमणीं प्रति पुष्पकविमानेन लंकानगरीतः पुनरयोध्याप्रत्यावर्तन समये मध्ये मार्गे तत्तत्प्रदेशान् निदर्शयन् अगस्त्याश्रममपि सादरं निर्दिशन् ब्रूते "अगस्त्यस्याश्रमश्चैव दृश्यते कदलीवृतः (पश्य मैथिलि) इति ।

एवं श्री रेणुकमुनेः अगस्त्यमुनेश्च सगौरव उल्लेखः अत्यन्त प्राचीनतमेषु महाभारत रामायणादिषु पुराणैतिहासिक ग्रन्थेषु च बहुलमुपलभ्यत" इति विविधरीत्या श्री रामभाव शास्त्रिणं प्रति श्री शम्भुलिङ्गशिवाचार्यः स्वकीय वीरशैव सम्प्रदायस्य अनूचान-रेणुकादि शिवगणाधीश-परम्परा-सम्प्राप्तत्वं पुराणेतिहासादि-प्राचीन-प्रामाणिक-ग्रन्थाकर-निकर-कथित-ग्रथितत्वं सर्वोपरिष्ठं वैशिष्ट्यं च समाचष्ट पाण्डित्यजुष्टेन प्रमाणपरिपुष्टेन विषयविवेचनविशिष्टेन वचन निचयेन ।

तदेतदुपश्रुत्य परितुष्टः रामभावुशास्त्री शिवाचार्यपाण्डित्य-समाकृष्टः वास्तविकतत्वतथ्यश्रवणनष्टाहम्भावमात्सर्यः गौरवभावाविष्टः अन्ते च साष्टाङ्गं प्रणिपत्य 'ज्ञानप्रकृष्टमष्टमूर्तिपरमप्रसादा-सादनसमुत्कृष्टं यतिश्रेष्ठमामन्त्र्य प्रास्थात् स्वस्थानं स्वस्थेनान्त-रात्मना ।

ईसवीये २८-५-१९३८ तमे दिनाङ्के बुलढाणामण्डलान्तर्गत खामगांवनगरे निर्वर्तिताया अखिलभारतवीरशैवपरिषदः आध्यक्ष्य सदाक्ष्यमुद्वहन् प्रेक्षावत्परिवृढः परिव्राजकप्रवरः श्री शम्भुलिङ्ग-शिवाचार्यः महाराष्ट्रभाषायामेव पाण्डित्यपूर्णं निखिलविद्वद्वरेण्य

विस्मापकं विधाय भाषणं सर्वमपि निर्वाहयामास चातुर्येणैव सभाकार्य-कलापम् ।

कर्णाटकदेशवासीयस्यापि आचार्यवर्यस्य महाराष्ट्रभाषायां प्रावीण्यं प्रभुत्वं वाक्चातुर्यं च दृष्ट्वा तत्परिषदः सर्वेऽपि सभासदः कौतुकाक्रान्तहृदः तद्योग्यताविदः भक्त्युद्रिक्तमुदः प्रणेमुः पण्डितपरिव्राज-कमेनम् ।

आन्ध्रप्रान्ते सर्वत्रापि सत्पुरुष इति सम्पादित-सान्द्र-यशश्चन्द्रिका-नीरन्ध्रित-दशदिगन्तः शान्तो दान्तस्तितिक्षुः मुमुक्षुः भक्तजनानु-जिवृक्षुः श्री शिवकोटे वीरभद्रस्वामिनामा कश्चन विपश्चिदपश्चिमः तेजस्वी तपस्वी मनस्वी ब्रह्मवर्चस्वी यशस्वी च महापुरुषः इन्दुधर-पादारविन्द - निष्यन्ददमन्द - मरन्द - बिन्दु - मिलिन्दायमान - मानसः निवसति स्म ।

कदाचित् भारतभूवलयभूषणायमानस्य परळिवैजनाथ ज्योति-र्लिङ्गस्य रुद्राभिषेकं कर्तुं समुद्यतोऽभूत् सातिशयेन भूतनाथ निष्ठेन अभूतपूर्वेण प्रभूततरेण भक्तिभरेण प्रणुन्नः परशिवपादैकप्रपन्नः शिवार्चनार्हतोपयुक्तसकलसदाचारसम्पन्नः स योगीश्वरः ।

परन्तु तद्देवस्थानस्य अर्चकाः हृदयान्तरालभरितस्वार्थाः अनधि-गतवेदवेदान्तस्मृत्याद्यर्थाः कुक्षिम्भरयः केचन धूर्ताः ब्राह्मणब्रुवाः "तदेतद् ज्योतिर्लिङ्गं स्पृष्ट्वा अभिषेकं पूजादिकं कर्तुं ब्राह्मणा एव अर्हतमाः परमेश्वर प्रियतमा अधिकारिणः । ब्राह्मणेतराणां वीरशैवादीनां नास्त्येव गङ्गाधरस्य लिङ्गानि मूर्तीर्वा स्प्रष्टुं अर्चितुं वाधिकार इति साम्रेडं सामर्षं साटोपं च रटन्तः न्यरूरुधन् ।

एतेषां दुर्विचारधूसराणां कलुषभावनाकासराणां दुरभिमान्य ग्रसराणां केषाञ्चन भूसुराणां विकीर्णस्वार्थरजांसि सङ्कुचितविचार-

लघीयांसि वचांसि निशम्य स्वभावसरल: वीरभद्रेति नाम वहन्नपि सौम्यप्रकृतिः स साधुः श्री शम्भुलिङ्गशिवाचार्यानेव शरणमुपाययौ ।

तदा शिवाचार्या: निष्पक्षपातविचार विचक्षणैः वस्तुस्थितिविमर्शनचणैः कृतसम्प्रदायरक्षणैः यथार्थ-वाक्यार्थ-विवेचनैकक्षणैः निखिल-विद्वल्लक्षणैः कैश्चन पण्डितप्रवरैः सह देवस्थानास्थानमण्टपमाजगाम। आजुहाव च वादार्थं प्रतिबन्धकर्तॄन् सर्वानपि विप्रान् । उदाजहार श्रुति वचनानि । उल्लिलेख स्मृतिवचांसि । उद्धधार आगमोक्तीः । समुपदर्शयामास च काशीश्रीशैलादिक्षेत्रेषु ज्योतिर्लिङ्गानि- स्पृष्ट्वा चतुर्वर्णोद्भवा: सर्वेऽपि भक्ताः यथा परिपूजयन्ति वहो: पुरातनकालदेवेत्यादि प्रत्यक्षनिदर्शनानि ।

एवं प्रत्यक्षानुमानागम-युक्ति-तंत्रशास्त्रादि-सकल-प्रमाणान्यप्यविकलमुद्धृत्य उदाहृत्य च वादाटोपकोपाटापैः फुरफुरायमाणान् स्फुरदधरोष्ठान् सर्वानपि विप्रविद्वच्छ्रेष्ठान् निरुत्तरान् मुद्रितमुखान-मूकीभूतांश्च विदधे । प्रतिष्ठितविद्वन्मध्यस्थाधिष्ठितायां तस्यां सभायां चातुर्वर्ण्योद्भवानां सर्वेषामपि शिवभक्तानां स्वस्वामिनः जगदण्डनिर्माण-शौण्डीरस्य खंडेन्दु-शेखर-मण्डित-शिखण्डस्य आखण्डलादि-सुर-मण्डल-मुकुटमणि-मण्डित पदपुण्डरीकस्य भगवतः खण्डपरशोः स्वयं व्यक्त-लिङ्गविग्रहादिपरिपूजनस्य संपूर्ण एव अधिकार. निरपवादतयैव वरिवर्ति ।

ज्योतिर्लिङ्गसमर्चने केवलं ब्राह्मणजातिजातानामेव अधिकार इत्यत्र नैकमपि प्रमाणवचनमुपलभ्यते श्रुत्यां वा स्मृत्यां वा पुराणेषु वा । स्वार्थसाधका: जगद्बाधकाः श्रुतिस्मृतिययार्थभावविरोधका: स्वार्थान्धाः केचन ब्रह्मबन्धवः प्राचीनग्रन्थेषु प्रक्षिप्य कानिचन स्वकपोल कल्पितानि वचनानि दूषयन्ति शास्त्रसाहित्यं पोषयन्ति स्वार्थं । रोषयन्ति ब्राह्मणेतरान् । शोषयन्ति श्रीसामान्यस्य शास्त्रश्रद्धाम् । तोषयन्ति स्वजातीयान् कांश्चन कूपमण्डूकायितान् । स्वयमेव उद्घोषयन्ति

स्वीयश्रेष्ठत्वडिण्डिमं । दूषयन्ति सर्वधर्मीयान् । निश्शेषयन्ति च जनसामान्यस्य हृदये चिरादेव विद्यमानं ब्रह्मवृन्दविषयकं गौरवं । समुन्मेषयन्ति वर्गकलहम् ।

भगवतः परमेश्वरस्य पुरः सर्वेऽपि समाना एव । अत एवोदगारि पार्थसारथिना भगवता स्वकीयायामविगीतायां गीतायाम् "समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः" इति "निर्दोषं हि समं ब्रह्म" इति च ।

किं भगवान् भूतभावनः भवानीपतिः ब्राह्मणानामेव पिता? क्षत्रिय वैश्य शूद्रादीन् किं न निर्ममे उमापतिः? यदि सर्वानपि सर्व एव पिता भूत्वा जनयामास तर्हि तदुत्पन्नानां पुत्राणां ब्राह्मणेतराणां स्वजन्मदातारं स्वपितरं पूजयितुमपि किं नाधिकारः ? धिक्धिक् दुर्बुद्धि ब्राह्मण ब्रुवाणाम् केषाञ्चित् । क्षुद्रबुद्धि च पण्डितानां, स्वार्थान्धतां च उच्चवर्णीयानाम । पुत्राणां पितृपूजाधिकारं भक्तानां भवपूजाधिकारं च न कोऽपि छेत्तुमीष्टे । अत एव शिवकोटे वीरभद्रस्वामिनः वैजनाथशिव–लिङगपूजायामस्त्येव सर्वात्मना सर्वविधोऽप्यधिकारः अर्हता च । कस्तिन्नरोद्धा? कस्तिन्नषेद्धा च? आगच्छतु पुरस्तात् । प्रयच्छतु प्रमाण वचनानि परस्तात् । प्रतीच्छतु नः आव्हानम् ।

ईदृशं असदृशं युक्तियुक्तं प्रमाणवचनोपन्यासमाकर्ण्य विवर्णा वादिवावदूकाः मौनमुद्रयैव स्वसम्मतिं समसूचयन् । मध्यस्था अपि श्री शम्भुलिङगशिवाचार्यमेव विजयशालिनमघोष्य परळिज्योतिर्लिङगस्य स्पर्शने पूजने च सर्वेषामप्यस्ति अधिकारः चतुर्वर्णोद्भवानां श्री शिवभक्तानामिति निर्णयमङगीचक्रुः । कतिपयवर्षानन्तरं न इदं च व्याज्यं पुनर्हैदराबादस्य वरिष्ठन्यायालयवितर्दिकामधिरुह्य उभयपक्षीयप्राड्विवाक संमर्द-विमर्द-मथित-कथित-प्रथितमभूदिति श्रोश्रूयते ।

एवं चरन् देशमथोपदेशमध्यात्मसन्देशमसौ वितन्वन्
मराठि तेलगू कनड प्रदेशे विवर्धयामास च चित्प्रकाशम् ॥४४०॥

सर्वत्र विजयन् शैववैजयन्तीं समुद्धुवन्
विजयाख्यपुरं प्रायात् शम्भुलिङ्गशिवः सुधीः ।।४४१।।

विजापुरप्रजाः सर्वाः प्रजापतिमिवामराः
ससम्भ्रमसमारम्भं नेमुः शम्भुगुरूत्तमम् ।।४४२।।

स्वागतं चागतौ कृत्वा भक्त्या चोपायनान्यपि
शिवोपसादनोपायं मत्वोपानिन्युरञ्जसा ।।४४३।।

विद्वन्मूर्धन्य-शम्भूक्त-तत्वोपान्यास-वैखरीम्
श्रुत्वा धन्यममन्यन्त चात्मानं सकला जनाः ।।४४४।।

सरस्वत्यास्तटो विद्यावटो वा ज्ञानसम्पुटः
जनैरित्यूहितेऽवात्सीत् स्वकीये स बृहन्मठे ।।४४५।।

धर्मानुजश्रीविजयोपमेन सर्वत्र चोद्यद्विजयान्वितेन
श्री शम्भुलिङ्गाख्ययतीश्वरेण पुरो यथार्थं विजयाख्यनाम ।।४४६।।

यतीश्वरस्यास्य विबोधनेन
सतीसुतार्थैषणमप्यपास्य
सतीश्वरध्यानपरा अभूवन्
जना विरक्ताःशिवभृत्यभक्ताः ।।४४७।।

मुहुर्दर्शं दर्शं यतितितिपतेर्भास्वरवपु–
रहो श्रावं श्रावं सरसमुपदेशं प्रतिदिनम्
सदा पायं पायं तदमलवचः स्वादिमसुधां
विजापूराभिख्या समधिकमुदाऽपूरि च पुरी ।।४४८।।

भवतरुपद्दुतं सर्वं स्वीचकार महागुरुः
स्वीयं चकार नो किञ्चिन्निस्सङ्कोचस्वभाववान् ॥४४९॥

किञ्चित्कालमुषित्वाऽत्र तुषित्वा जनमानसम्
सञ्चारार्थं प्रतस्थेऽसौ पत्रवाचार्यप्रभाववान् ॥४५०॥

॥ इति सप्तमस्तरङ्ग : ॥

॥ अथ अष्टमस्तरङ्गः ॥

एकस्मिन् दिने दशदिशान्तरावकाशविकासितारुणारुण-प्रकाशः निशावसानसमयः। विकसदरविन्दमकरन्दभारादिव मन्दमन्दस्पन्दनेन नन्दयति स्म गन्धवहः जीवसन्दोहम्। कुन्द-मन्दार-बन्धूक-नन्द्यावर्तादि-तरु-लता - वृन्द - सम्फुल्ल - सुम-सन्दोह - निष्यन्दमन्द-मरन्द-बिन्दु-मधुपान मत्त-मिलिन्द-गीतगुञ्जारवः रञ्जयति स्म रसिकपुञ्जम्।

दधिमन्थनपराणां मन्थानदण्डमन्थरयेण सरभसमाकर्षतीनां मृगाङ्कमुखीनां कर-पङ्कज-क्वणत्कनककाचकङ्कण-किङ्किणी-झङ्कारः मठमन्दिरेषु प्राभातिकपाठं पठतां वेदाध्ययन पटूनां वटूनां वदनपुटपा-पठ्यमानः सोङ्कारः श्रुतिघोषः प्रभात-शीतवात-प्रबुद्ध-विहङ्ग-जाति जात-पोत-जात-कृत-कल-कल - कोलाहल - मञ्जुनादश्च मुखरयति स्म दिङ्मुखानि।

ईदृशे परम मङ्गलमय प्रसङ्गे ब्राह्मे मुहूर्ते एव उद्बुध्य परं ब्रह्म ध्यायतः विरक्त शिखामणः जगज्जालमेव जरत्तृणजालमिव जिहासोः श्री शम्भुलिङ्गशिवयोगीश्वरस्य सर्वविषयेष्वपि महदेव मनसि समुदियाय वैराग्यम्। समदभूत्सर्वत्रापि चौदास्यम्। समजनिषत स्वीयमठाधिपत्या धिकारादिप्रशासनविषयेऽप्यलम्बुद्धिः। अप्रार्थितोपनतबृहन्मठीयसम्प--दुपयोगोपभोगादिष्वपि व्यजुगुप्सत तदीयं सञ्जातभगवद्भक्तिभावोदय सदापि सदयं सतां हृदयम्।

अहो वैराग्यं विद्वन्मणेः। अहो निस्पृहता निष्कामनिवृत्तिमार्ग निष्ठस्य यतिश्रेष्ठस्य। अहो शिवध्यानपरायणता श्री शंभुलिङ्गशिवाचार्यस्य

यदयं निरङ्कुशमहाप्रभुरपि बृहन्मठस्य, सर्वतन्त्रस्वतन्त्रपीठाधिपतिरपि अपरिमितक्षेत्रसम्पत्सम्पन्नस्य शिष्यसम्पत्समृद्धस्य च महापीठस्य, निर-पवादसर्वाधिकार्यपि धनकनकक्षेत्रारामनागरधामस्तोमादि श्रीमत्वमहत्व-महितस्य वीरशैवसत्सम्प्रदायपरम्पराप्राप्तमहासंस्थानस्य वैराग्यभाग्यो-दयाव्यहितोत्तरक्षण एव सर्वमपि सुपर्वसार्वभौमसम्पद्गर्वनिर्वापकमखर्व-सम्पत्तिभरभरितमपूर्ववैराग्यबुध्या धनकनकनाण्यनिधिमुखं स्थिरचरश्री-सर्वस्वमपि शर्वार्पणबुद्ध्या पर्यत्याक्षीत् सर्वमुनिवर्यात्याश्चर्यकरवैराग्यचर्यः योगिधुर्यः सः श्री शम्भुलिङ्गशिवाचार्यः ।

आत्मनः सम्बन्धिनमेव कञ्चन श्रीमठस्य सर्वविधव्यवस्थासम्पा-दनाय नियुज्य ततः प्रस्थाय ग्रामैकरात्रसञ्चारक्रमेण सञ्चरन् कर्णाटक-देशसारं कर्षककुलहर्षाधारं पान्थकुलश्रमशमनधीरं शीतलीकृतमन्दसमीरं प्रस्फुरद्वानीरं निरन्तराचान्तमधुमधुरनीरं स्रवत्सुधाधारं प्रवहत्प्रवाह-परम्परामनोहारिण्याः कृष्णवेणीतरङ्गिण्यास्तीरं स्वैरं पर्यटन्नुपा-जगाम । तत्र च ददर्श कृष्णानदीम् ।

यस्याश्च कृष्णवेण्याः स्वच्छाच्छस्य सलिलौघस्य परितः परि-पूतस्य प्रवाहस्यापि महिमा मधुरिमा गरिमा च नैकैरेव रससिद्धैः कवीश्वरैः सरससुन्दरमुपवर्णितं भावबन्धुरमभिष्टुतं च-

॥ कृष्णवेणीवैभवम् ॥

सुधाधाराऽधारायितमधुरवारां निधिरयं
नरानाराद् घोरादवति भवकारार्तिभयतः
महीहाराकारा पशु-सुकृषि-सारायितरसा
नदी येयं कृष्णा हृतसकलतृष्णा विजयते ॥१॥

मनोव्यापं तापं नयति किल या लोपमवनौ
महापापान् व्यापादयति सह चापत्तिभिरहो
दुरापं चिद्रूपं गमयति पयःपायिपुरुषान्
सरित् सेयं कृष्णा मम विषय तृष्णां शमयतु ॥२॥

विधात्री क्षेमाणां सकलजनधात्री सकरुणा
प्रदात्री कामानां सलिलमयगात्री शुचिकरी
नियन्त्री लोकानां जगति विनिहन्त्री च विपदाम्
इयं कृष्णाङ्गोत्था विमलयतु कृष्णा सपदि माम् ॥३॥

सुधास्पर्धोन्नद्धं जलमतिसमृद्धं सुरुचिरं
सिताद्राक्षाक्षौद्रैक्षवमधुसदृक्षा रुचिरपि
अतुल्यं नैर्मल्यं मधुररसपौष्कल्यमपिते
परे पारे दूरे जननि महिमा मादृशगिराम ॥४॥

सकृत्कृष्णास्नानं जनिमरणहानं प्र कुरुते
सकृत् कृष्णापानं परिहरति दैनन्दिन शुचः
सकृत कृष्णाव्हानं क्षपयति यमाव्हानजभयम्
जनः कृष्णाऽलोकादयति खलु कृष्णाङ्घ्रिकमलम् ॥५॥

अटन्ती कर्णाटे क्षितितल ललाटे पटुगति–
र्नटन्ती साटोपं स्थपुटित महाराष्ट्रधरणौ
स्वनैर्यन्त्रैरान्ध्रान् चटुलगति नीरन्ध्रयति या
शुभं नः पुष्णीयात् सरिदमलकृष्णा भगवती ॥६॥

कृष्णवेणि घनपापकृपाणि
क्षोणिकोणविसरज्जलवेणि
प्राणिपावकपयःकणपाणि–
स्त्वं पुनीहि जल घोषितवाणि ॥७॥

किरन्ती कारुण्यं तृषमपहरन्ती पशुनृणां
क्षरन्तीश प्रीतिर्भुवि ननु सरन्ती हरिकृपा
स्खलन्ती सह्याद्रेः पुनरुपचलन्त्यान्ध्रविषयं
स्रवन्ती कृष्णाख्या दुरितमपहन्तीक्षणवशात् ॥८॥

पुनाना सिष्णासून् जलकणपिपासूंश्च पिबतां
धुनाना लोकानां दुरितमिह नानाविधमपि
लुनाना द्राग्दुःखं सपदि च ददाना शुभगतिं
जनानां मुष्णीयात विपदमिह कृष्णा मम सरित् ॥९॥

जनिः श्रीमत्कृष्णात् कलुषहृति निष्णातवपुषः
गतिः पुण्यारण्येष्वपि भरतभूपावनहृदि
तथैवान्ते रत्नाकरजलनिधेर्मेलनमहो
ततो मातः कृष्णे तव सुचरितं पुण्यभरितम् ॥१०॥

सवित्री हृत्संकल्पित विविधपुंस्कामिततते:
भवित्री चिन्मात्रान्मधुमथनगात्राज्जलमयी
अवित्री भक्तानामघकुललवित्री पुनरियं
पवित्रीकुर्यान्मामधममपि कृष्णा करुणया ॥११॥

समुद्भूता पीताम्बरनृहरिपूतावयवतो
लसच्छ्रीशैलाधीश्वर हरशिरोऽभ्यर्चनकरी
वरेण्या तीर्थानां विबुधवरसेव्या शुचितमा
नदीयं श्रीकृष्णा त्रिदशतटिनी साम्यमयति ॥१२॥

स्रवन्ती सह्याद्रे गिरिभुवि ललन्ती तत इत–
श्चलन्ती कर्णाटानधिदरि गलन्त्यन्तरुदरम्
चलन्ती श्रीशैलं पथि कलकलन्ती जलरयात्
मलन्ती सिन्धुं नः शमयतु च कृष्णा भवभयम् ॥१३

नमामि कृष्णां महसा च कृष्णां
कृष्णाङ्ग जातेति जगत्प्रसिद्धाम्
प्रमुष्णतीमुष्णकरांशुतप्य–
ल्लोकस्य तृष्णां पशुपक्षिणां च

क्षोणीभूषणभूतभारतमहीकोणीरथसह्याचल–
श्रेणीशृङ्गमहाबलेश्वरसुखद्रोणीतटादुद्गताम्
वेणीभूतजलां च दुष्कृतवनोच्छेदे कृपाणीं नदी–
न्द्राणीं मौनिमुनिश्रितां भगवतीं श्रीकृष्णवेणीं भजे ॥१५॥

त्वङ्गत्तुङ्ग-तरङ्ग-मारुत-मिथः सङ्घात-सङ्घर्षभू-
मार्दङ्ग-ध्वनि सङ्गतोर्मि-लहरी-सङ्गीत-भङ्गी-स्वनैः
तीरोन्मीलित-कञ्ज-पुञ्ज-लतिका-कुञ्जान्त-गञ्जा-लुठद्
भृङ्गी-रञ्जक-गुञ्जितैरपि सदा वाचालिताशामुखाम् ॥१६॥

सौधं स्वादिम माक्षिकं मधुरिमाक्षेप्तुं क्षमं चैक्षवं
नीचीकर्तुमलम्भविष्णु रसतो मोचा-समीचीनताम्
अच्छाच्छं विमलं सदा स्फटिकवत् स्वच्छं यथेच्छं पिबन्
यत्स्वाधिष्ठपयो हि पाशवपयस्तुच्छं नरो मन्यते ॥१७॥

सन्तापार्तनृणां हि निर्वृतिमथो शान्तिं च याऽत्यन्तिकीम्
स्वान्ते सन्तनुते निरन्तरमहो स्नानेन पानेन च
क्षुत्क्षामान् तृषितांश्च पक्षिनिवहान् निर्वापयित्रीं जलैः
कृष्णाख्यां तटिनीं जलस्थपुटिनीं सर्वापदुच्चाटिनीम् ॥१८॥

कर्णाटे लसितामपीह भरत श्रीकर्णपूरायितां
माहाराष्ट्रमहीतलेऽपि महितां कुल्याम्बुकल्याणदाम्
आन्ध्रं वर्धित-सान्द्र-धान्य-सलिलैर्नीरन्ध्रमातन्वतीं
सर्वानन्दद-विश्ववन्दित-महा-सिन्धुं च कृष्णाभिधाम् ॥१९॥

तीरोपान्त-सुदूर-सन्मृदु-मृदा-केदार-भू-धान्यकैः
सर्वोदारतरोदराभिधदरीमापूरयन्तीं सदा
विश्वस्यैव हि शश्वदन्नजलसन्दानादि विश्वासदाम्
साक्षाद्दक्षिणजाह्नवीति जगति ख्यातां च कृष्णानदीम् ॥२०॥

अवित्रीं लोकानां निज-जल-पवित्रीकृत-धरां
सवित्रीं कामानां सपदि च लवित्रीं जनशुचाम्
धरित्री-सौभाग्यं हरिहरसुपुत्रीं च तदलं-
भवित्रीमुद्धारे क्षितिजनिमतां पुण्यसरितम् ॥२१॥

नदीनामपि दीनानामुद्धारे बद्धकङ्कणाम्
अवनीजनुषां सक्तामवनेऽपि वनोच्छ्रिताम् ॥२२॥
कृष्णाजलं तु यः पाति स पाति निखिलां भुवम्
सकृत्स्नातोऽपि निष्णातस्स्याल्लोकोद्धृतिकर्मणि ॥२३॥

यस्या जलानां सङ्घातः
पापसङ्घातकारकः
भङ्गोऽप्यभङ्गुर स्वर्गा–
नन्दसङ्गाय कल्पते ॥२४॥

लोकानामघराशिकर्षणवशात् तृष्णार्ति सङ्कर्षणात्
संसारार्तिविकर्षणाच्च धरणीदाहज्वराकर्षणात्
कालाहिद्युतितः 'करि' क्षितितले कर्णाटके व्याप्तितः
कृष्णाङ्गोद्भवतश्च सार्थकलसत्कृष्णाभिधां वाहिनीम् ॥२५॥

धर्मोल्लासकरीं सदैव विजय-श्रेयोऽभिवृद्धि-प्रदां
भीमाभिख्य-महाबलोदयमितां नासत्यवाग्जिनाम्
कृष्णेष्टां द्रुपदात्मजोचितमहाकृष्णाभिधामप्यहो
चित्रं यद्धृतराष्ट्र-मुख्य-शकुनि-प्रीत्यावहां तां धुनीम् ॥२६॥

नेत्राणि स्फटिकाच्छनिर्मलजलैरानन्दयन्तीं नृणाम
श्रोत्राण्यप्यनिलाहतोच्छ्रित चलद्वाचाल-वीची-शतैः
घ्राणं तीर-तरु-प्रसून-बहुलामोदेन शीतामृत–
स्पर्शेन त्वचमम्बुना च रसनां सर्वेन्द्रियाल्हादिनीम् ॥२७॥

मणिस्वच्छामच्छां कमठकुलमच्छावलियुताम्
लसन्मुक्ताचूर्णोपम-पुलिन-पूर्णाऽतनुतटाम्
मरुल्लीलोत्तालामित-लहरि-माला-कलकलैः
मुखानि प्राच्यादि प्रमुखहरितां या मुखरयेत् ॥२८॥

महाबलेश्वराङ्घ्र्यब्ज-क्षालनात्तीर्थतां गताम्
कृष्णामुल्लोलकल्लोलसमुल्लासि तरङ्गिणीम् ॥२९॥

मर्त्याक्रमण-कृत्पाश-दण्डधृग्यमसैनिकान्
दूरीकर्तुं हि सिद्धां तां कृष्णवेण्याख्य वाहिनीम् ॥३०॥

महच्छ्रीसौभाग्यं विपुलजनकर्णाटकभुवः
महाराष्ट्राख्याया अपि नियतमाहोपुरुषिकाम्
भुवो मौल्या मल्या नव-कुसुम-माल्यायित-जला-
मतुल्यां कल्याण-प्रद-सुकृत-कुल्यायित नदीम् ॥३ ।

यस्यां मज्जनमात्रतो भवसमुद्रोन्मज्जनं प्राणिनां
यन्नीरैः कटुदुःख पापपङ्क्ली प्रक्षालिता स्यात्स्वयम्
यन्मृत्स्ना परिमार्जयत्यलिकगान् कृत्स्नार्तिलेखान् विधेः
तां निष्यन्ददमन्द-वारि-मकरन्दाढ्य-प्रवाहां नदीम् ॥३२॥

येयं दक्षिणजान्हवीति जगति ख्याताभिगीता बुधैः
स्वः सोपान-परम्परायित-मरुल्लोलोर्मिका-घूर्मिता
भाषा-जाति-विभिन्न-देशज-जने या पक्षपातोज्झिता
सर्वानन्ददविश्व-वंद्यजननीं कृष्णाभिधां तां धुनीम् ॥३३॥

दुहाना लोकानां हृदयलषितार्थान् प्रणयतः
जनान् स्वैर्वात्सल्यामृतमयपयोभिः स्नपयती
दृणाना दारिद्र्यं भुवि दिवि पृणाना सुमनसः
स्रवन्ती श्रीकृष्णा सुरभिरिव तृष्णां हरतु नः ॥३४॥

सतोषान् घोषान् गोगणमपि समोदं कलयते
लसद्गोत्रोद्धारं हलधरकुलोत्कर्षमपि च
पयोमुग्धा रामावलि मुखविकास क्षमरसा
यथार्थां कृष्णाख्यां भजति ननु कृष्णाभिधधुनी ॥३५॥

रुचा कृष्णा नाम्ना तृषितजनपीतामृतरुचिः
जने रक्ता शुभ्रा यशसि तटशष्पैरपि हरित्
सितैः फेनै र्मीनै र्हरिततृणसस्यैः शबलिता
लसन्नानावर्णा शुचमपहरेत्कृष्णतटिनी ॥३६॥

मुदा गोपान् गोपायति बहुविधापायनिवहात्
तथा भूपानापाययति नव दिव्यामृतरसम्
जनात् सर्वानाप्याययति रसपानेन सदया
नदी कृष्णा कां कां जनहितकृतिं नैव कुरुते ॥३७॥

लसत्पङ्का पङ्कं हरति च विशङ्कं ननु नृणां
स्वयं भङ्गैर्युक्ताप्यखिल भवभङ्गं कलयति
जडा जाड्यं हन्ति क्षरदमृतधारापि विषभृत्
विपत्तीर्मुष्णीयात् विमलतटिनी विष्वगटिनी ॥३८॥

काशीं नाहमयासिषं न च मयाऽयोध्या गयाऽध्यासिषि
काञ्चीं किं च न गन्तुमिच्छति मनो द्वारावतीं नाञ्चति
नान्यत्पुष्कर मुख्य पुष्कल महाक्षेत्राग्र्यतीर्थाण्यगां
कृष्णे त्वत्करुणाकणैकशरणस्तीरेऽस्मि मां तारय ॥३९।

न गङ्गाऽनङ्गारेः शिरसि कृतसङ्गापि च मया
न तुङ्गा प्रोत्तुङ्गामलतरतरङ्गा न सरयूः
न पातङ्गी कावेर्यपरसरितः पुण्यभरिताः
गताः स्नाताः पीता स्त्वयि निहितभारेण जननि ॥४०॥

तपःस्वाध्यायार्चा न हरियजनं नापि भजनम्
न सेवां देवानां न च खलु गुरूणामकरवम्
निकारं विश्वस्यातनवमिह विश्वस्य भवतीम्
मयीदानीं मातर्न कुरु करुणायां कृपणताम् ॥४१॥

अकार्षं स्वच्छन्दाचरणमपथेच्छानुसरणं
व्यहार्षं निर्लज्जं रतिरसनिमज्जद्युवतिभिः
समस्ताघस्तोमक्षपणचणमाता त्वमसि मे
त्विति त्वन्निष्ठा मां व्यतनुत सुतं तेऽनयभयम् ॥४२॥

गजाश्वान् दृष्ट्वा श्वा यदि भषति धाष्ट्र्यं शुनि न स–
न्निधानं तद् भर्तुः श्वविरुतिनिदानं खलु यथा
तथा धाष्ट्र्यं दौष्ट्यं मयि यदपि चोच्छ्ंखलखल–
गुणा मातस्त्वत्प्रत्ययबलनिदानास्त्वमव माम् ॥४३॥

अवज्ञातोऽध्यातो भवतु शतमन्युः सुरपतिः
रविश्चण्डः पिण्डः प्रखरदहनः कोपदहनः
न मे भीतिर्मातस्तव तु करुणाशीतलतनोः
निदाघः किं सूर्यासनकमलपुष्पं ग्लपयति ॥४४

त्वयि स्नानात्पानात् शमयति तृष्णा तनुभृतां
परं मातश्चेतोऽभ्यधिकतरतृष्णं त्वयि मम
नृणां मोहं लोभं क्षपयसि तु मुह्याम्यनुदिनम्
त्वयीद्धो मल्लोभः कलयति च मां त्वन्मयममुम् ॥४५॥

पुरस्तात्ते मातः पदयुगमधस्तान्निपतितम्
लुठन्तं पुत्रं मामपि तव शठं चेन्न वृणुषे
उदासीनाऽसीना भवसि यदि वाक् स्याच्च वितथा
"कुपुत्रो जायेत क्वचिदपि कुमाता न भवति" ॥४६॥

रुचा चक्षुश्चित्तं सुमधुररसेनाशु रसनां
ललत्कल्लोलानां कलकलरवैः कर्णयुगलम्
स्फुटत्पद्मामोदानिलपरिमलैर्घ्राणमपि च
पृणन्ती त्वं सर्वेन्द्रियनिवहसंप्रीणनचणा ॥४७॥

शुचा दीनं दूनं तव तनयमेनं तु जननि
कृपाऽकूपाराम्भःकतिपयकणैः प्रोक्षसि न चेत्
तदा मातृप्रेमाऽम्बरकुसुम सौगन्ध सुषमा-
सगन्धो निर्गन्धो गलितगरिमा मातृमहिमा ॥४८॥

चलद्वीची-माला-सुखतरल-दोलोत्सव-रसाः
बकाः कोकाः काकास्तट जलगभेका जलचराः
न मानव्यं दिव्यं पदमपि च भव्यं जिगमिष–
न्त्यदः कृष्णातीरं मधुमधुरनीरं श्रय सदा ॥४९॥

प्रहारो दुःखानां मधुर उपहारश्च तपसां
परीहारश्चिन्ता भयदुरित सन्ताजशुचाम्
विहारः पुण्यानाममलमणिहारः क्षितिगले
पयःपूरः कृष्णे कलयतु ममोद्धारमचिरात् ॥५०॥

महिष्यस्ते स्नाता गतजनुषि शीताम्भसि पुरा
इदानीं ता रा यस्तदिह महिषी नाम च तथा
न चेत्तत्पत्नीनां कथमिव पतीनां महिषताम्
विना स्यात्तन्नाम स्फुटमिह तव स्नान महिमा ॥५१॥

जले लीना मीना उपगतसुमीनाङ्कवपुषः
समं मीनाक्षीभिर्दिवि वरयमीनोचित सुखम्
लभन्ते श्री मीनाकृति हरिकृपातस्तव शुभे
नदीना मे कृष्णे दुरितमिह मीनातु भवती ॥५२॥

लताकुञ्जैर्गुञ्जन्मधुपसुमपुञ्जैः सुरभितम्
सुगन्ध-द्रु-स्यन्दन्मधुर-मकरन्दोन्दनमितम्
जनुर्जालं कूलङ्कषमिह समुच्छेत्तुममलम्
तदेतत्तेकूलं विलसदनुकूलं भवतु मे ॥५३॥

पयश्चौर्ये शौर्यं तव हि पितृशौर्यादृतमभूत्
गुणास्तातात् पुत्रानपि समुपयान्तीति भणितम्
ऋतं मन्ये धन्ये हरिकरणजन्ये तदनघे
सदा कृष्णे मुष्णास्यघकुलमनुष्णार्द्रहृदये ॥५४॥

कियत्यो न क्षित्यां भरितहरितः सन्ति सरितः
परं श्रेष्ठा प्रेष्ठा भवति खलु कृष्णैव जगति
यतो नाम्ना धाम्ना जननकृतभूम्ना सरिदियं
नृणां कृष्णं चित्ते स्थिरयति सदा स्मारयति च ॥५५॥

पयः पायं पायं व्रजभुवि पयोम्भोधि शयितुः
पयोमूर्तेर्याङ्गात्समजनि च तस्यास्तु पयसि
दधिस्निग्धो दुग्धामृतघृतमधुस्वादिमभरो
यदि स्यान्नाश्चर्यं त्वयि तु सहजोऽयं पितृगुणः ॥५६॥

व्रजाभीरी-नारी-गृहगत-पयोहारि-मधुजित्
तव क्षीरे नीरे किमपि न विवेदान्तरमपि
पयो मेने नीरं सुमधुरतरं तज्जलपरो
बभूवायं शब्दः पय इति तथार्थद्वयपरः ॥५७॥

स्खलन्ती शृङ्गेभ्य स्खलनततिमध्वंस्त च नृणां
पतन्ती कान्तारे सकलपतितोद्धारकुशला
चलन्ती चापल्यं परिहरति चित्तस्य भजतां
नदीराज्ञी कृष्णा प्रशमयतु तृष्णां भवभवाम ॥५८॥

अटन्तः कान्तारे पटुगति लुटन्तो जनपदे
नटन्तः शृङ्गाग्रेष्वपि ननु लुठन्तश्च दुरितम्
स्फुटन्तो वक्षस्तोऽम्भसिपुटपुटन्तः कलरवैः
स्फुरन्तः कल्लोला ददतु मम कल्याणमनिशम ॥५९॥

सलीलं त्वङ्गन्तो बहुलगिरि-शृङ्गाङ्गणभुवि
सलास्यं रिङ्गन्तो मरुमयधरोत्सङ्ग वलये
सदा चालिङ्गन्तो ह्युपवन वनग्रामनगरीः
तरङ्गास्ते तुङ्गा मम दुरित भङ्गाय जननि ॥६०॥

तस्याश्च पुलिनश्रोण्याः पक्षिकुलकलकलमञ्जुवाण्याः समुद्धृतभक्त श्रेण्याः आप्लावितधरिण्याः पावनतातुलितनिर्जरनिर्झरिण्याः कृष्णवेण्याः श्रेष्ठतरङ्गिण्याः दूरीभूतजनकलापे शोश्रूयमाणविहङ्गकुल कलकल कलालापे निबिडतर-तीर-तरु-तत-तति-तिरस्करिणीतिरस्कृत-सूर्यातप-तापे कस्मिश्चन एकस्मिन् द्वीपे स्वयम्भूलिङ्गालिङ्गितमिति विख्यातं गुहेश्वरदेवस्थानमासीसदत् स योगिसम्राट्।

द्वीपे वसन्तं विलसन्तमीशं सन्तं तमेकान्तमनोरमेऽत्र
गुहेश्वरं साधु सुसेविषुः श्री शम्भुः शिवाचार्य उपाजगाम ॥५११॥
गङ्गाधरस्याङ्घ्रिसरोजयुग्मं कृष्णा तरङ्गिण्यमलैस्तरङ्गैः
स्रवत्पयःशीतलशीकराग्रैः संस्नाप्य धन्या भवति स्म मान्या ॥५१२॥

जम्बीर-जम्ब्वम्बरचुम्बिनिम्ब-
रम्भा कदम्बावनिरुट्-कदम्बैः
मल्ली-मतल्ली-मुख-नैक-वल्ली-
समुल्लसत्फुल्ल-सुमैः सुगन्धि ॥५१३॥

मरु-स्थली-शाद्वल-रूढ-शष्पैः
लता-तरुस्तोम-विकासि-पुष्पैः
मञ्जून्नदद्भृंग-लता-निकुञ्जै
रम्यं तदासीत्पशुपक्षि-पुञ्जैः ॥५१४॥

जलस्थलैकान्तमनोरमत्वम्
दृष्ट्वात्र शम्भुः स गुहेश्वरस्सन्
कैलास-संवास-विलास-केली-
स्वलालसत्वं वसति प्रहाय ॥५१५॥

धुतामितद्रूयवनोऽतिपावनः
कृष्णाजलार्द्रः पवनोऽत्र शम्भोः

सुस्वागतं वृक्षचलत्पलाश–
हस्तैः प्रचक्रे विहगस्वनैश्च ॥५१६।

एवं श्री शम्भुलिङ्गशिवाचार्यः तत्र कृष्णा तरङ्गिणी-तरल-तर-तरङ्ग-हृदयान्तरङ्ग-रङ्गस्थल-स्थित-गुहेश्वराधिष्ठितं निसर्गसौन्दर्य-केंद्रायमाणं परमरमणीयं द्वीपं परिप्रेक्ष्य विविक्तरमणीयमिदमेव स्थलं मम अखण्डतपोनुष्ठानाय एकान्तसाधनाय च योग्यमिति निर्धार्य तदेव निर्मानुषं निर्मक्षिकं च द्वीपकल्पं उपकल्पयामास स्वावासम् । संकल्प–यामास च कल्पतरुकल्पं परमेश्वरमुद्दिश्य तपोनुष्ठानाय चाल्पेतरयत्न–निर्विकल्पसमाधिमाचरितुम् ।

अशनं व्यसनं पुंसां त्यक्त्वा तत् पवनाशनः
निश्चिक्ये क्षीरभुग् भूत्वा तपश्चरितुमद्भुतम् ॥५१७॥

परमस्मिन् सुदुर्लभमानुषसञ्चारे सुदूरे कृष्णातीरे द्वीपाकारे गुहेश्वरक्षेत्रे कथं लभ्येत क्षीरम् । तदपि गोक्षीरमिति चिन्तयत्येव योगीश्वरे कङ्कणवाडि ग्रामस्थः कवटगी बसप्पण्णनामकः सद्गृहस्थः स्वयमुपस्थाय श्रीचरणचरणपरिचरणं केनापि रूपेणाचरितुमुत्सुकः व्यजिज्ञिपत् ।

आस्थीयतां तपः स्वस्थचेतसा स्वस्तये नृणाम्
समस्ता ते व्यवस्थात्र तस्थुषे क्रियते मया ॥५१८॥

तस्य भक्तिं दृष्ट्वा उक्तिं श्रुत्वा सन्तुष्टस्वान्तः श्री शम्भुलिङ्ग-शिवाचार्यः स्वतपोनुष्ठानं संमतं परमेश्वरस्येति समादधे । यतो हि–

अत्रोपसरणं चास्य विनैवाकारणं कुतः
कारणं चात्र नूनं हि प्रेरणं परमेशितुः ॥५१९॥

मासांश्चतुर्दशात्राहं तपन् वर्षार्द्रतार्दनम्
तपातपस्य तापं च सहे शीतर्तुदुर्दशाम् ॥५२०॥

दिव्येन नव्येन गुहेश्वरस्य गव्येन कृत्वा पयसाभिषेकम्
पास्यामि तत्तीर्थपयस्तदन्यदपास्य रस्यं सकलं च भक्ष्यम् ।५२१।

नाहारेण हि वर्तेऽहं परमारचितेन तु
क्रियासमभिहारेण हारेण तपसान्धसा ॥५२२॥

आचतुर्दश मासान्तमाचरिष्ये पयोव्रतम्
आचन्द्रशेखराश्वासमाचामन् गोपयः परम् ॥५२३॥

तावत्कालं पयो दातुं त्वया मे शक्यते न वा
विचार्य ब्रूहि निर्धार्य तपश्चर्या हि सा यतः ॥५२४॥

गोक्षीरदानसन्देहमालक्ष्यात्मनि सद्गुरोः
अधिक्षिप्त इवाध्यक्षमाचचक्षे बसप्पकः ॥५२५॥

जानेऽहं सुतितिप्सां वः प्रतिजाने च गोपयः
यथेच्छमेव यच्छामि मा भूत्संशीतिरत्र वः ॥५२६॥

घटोध्न्यो बहवः सन्ति गावो मे सदनान्तरे
युष्माकं वदने यद्वद् गावो वाणीमुखान्तरे ॥५२७॥

मेरुवच्चारुशृङ्गाढ्याः पयस्विन्योऽभ्रसिन्धुवत्
सुपयोधरभारार्द्रा अभ्रवत्सन्ति धेनवः ॥५२८॥

गोमतीभूषिता चैव भारतोर्वीव सर्वदा
साङ्ख्यपद्धतिवच्चैव कपिलाधिष्ठिता पुनः ॥५२९॥

लसद्गोष्ठीगरिष्ठा च राजास्थानसभेव सा
मद्गेहांगणभूः कृष्णलीलावद् गोकुलान्विता ॥५३०॥

पयसो न हि नैयून्यं न कार्पण्यं मनागपि
अतिमात्र प्रयत्नेऽपि सत्पात्रं कुत्र चेदृशम् ॥५३१॥

अनुग्रहोऽयं यन्मत्तः पयसो वः परिग्रहः
भर्गस्सविग्रहस्त्वं मे चागृण्हाम्याशु गृह्यताम् ॥५३२॥

धेनु-सन्दोह-सन्दोह-स्यन्दन्मन्देतरं पयः
न सन्देहोऽत्र सन्दास्ये मकरन्दरसोपमम् ॥५३३॥

कङ्कणवाडी-ग्राम-गत-ग्रामणी-ग्रामाग्रणीभूतस्य कवटगीकुलावतंसस्य बसप्पनामकगृहस्थस्य गोक्षीरदानप्रतिश्रवेन समाश्वस्ताः श्री शम्भुलिङ्गशिवाचार्यवर्याः तथास्त्विति तमनुगृह्य आशीराशिभिरभ्यनन्दन् । स्वानुतिष्ठासित-तपस्समाधेः सकलविधमपि सौविध्य अदृश्यरूपेण समुपकल्पयतः चन्द्रार्धचूडामणेः पदेन्दीवरद्वन्द्वं मनसा चाभिवन्द्य अमन्दं च आनन्दमनुविन्द्य धिया निर्जितनिर्जरगुरुः स जगद्गुरुः कृष्णा-निर्झरिणी-गर्जदूर्मि-माला-जर्जर-तीर-तरु-निकरे निर्जन-द्वीपे सौवस्तिमाकलयत सोल्लासम् ।

तत्रैव च प्रशस्ते परितस्तत-तरु-स्तोमाभिरामे सर्वतः परिस्तृत-व्रतति-व्रात-पर्ण-पटल-घन-निविड-वन-घन-श्यामायमाने प्रहर्षित इव विपुलकण्टकजालकाञ्चिते, कुरुक्षेत्र इव द्रौणि-धृतराष्ट्र-शकुनि-सङ्कुले रतिरहस्य इव शम्बरसंरक्षिते, सुरपति कलेवर इव मरुद्गणवीजिते, क्षीराब्धितीर इव पयः फेनधवलितदन्तुरिते, विरक्तपुरुष इव तृणीकृत भूवलये, सौभाग्यवतीभालपट्ट इव लसत्तिलकोपशोभिते, वधूहस्त इव सरभसपरिपतन्नैककङ्कणालङ्कृते, मूर्खमहाराज इव जडमध्यवर्तिनि सत्यलोक इव कमलसम्भूतिसंशोभिते, पाण्डवसेनामुख इव नृत्यच्छिखण्डिनि, आवासस्थान इव काननलक्ष्म्याः, विश्रान्तिभूमाविव जलदेवतानां, प्रसाधनगृह इव वनश्रियः, वक्षस्थल इव कृष्णवेण्याः, मृदुतर-मृदुदित-शाद्वल-श्यामल-कोमल-भूभागे स्थलजलचरयादोगणावरोधस्य

तृणतल्पकल्पे तस्मिन् द्वीपकल्पे मध्यभागे निरमापयत् स्वर्णवर्ण-जीर्ण-पर्णाकीर्णतार्णछर्दि जपतपोनुष्ठानसौकर्यपूर्णा गुहेश्वराभ्यर्णे एव कामपि पर्णकुटीम् ।

प्रत्यासीदति तपोनुष्ठानायात्युत्तमसमये उत्तरायणे माघ-शुक्ल-त्रयोदशी-सुमुहूर्ते, प्रभात-सन्ध्या-राग-प्रसञ्जित-गुञ्जा-पुञ्जाभ-माञ्जिष्ठ-छवि-रञ्जितेषु दशदिङ्मुखेषु, शीतातिपातभीतभीतेषु बहिरुत्पतितुमपि सङ्कुचत्सु विहगव्रातेषु, यमायमान-हिमातिशय-सम्पात-सञ्जनिता-मर्षेष्विव नामशेषतामुपगतेषु नक्षत्रनिकुरम्बेषु, जलावगाहन-जनित-जाड्याऽपादितमौढ्य इव मन्दमन्दं स्पन्दमाने सुमनो-वृन्द-निष्यन्दत्म-करन्द-बिन्दु-सन्दोह-वाहिनि प्राभातिके मातरिश्वनि, अरुणारुण-किरण-जाल-मन्त्राक्षतानिव विकीर्य श्रीशिवाचार्यपरमहंसप्रारिप्सततपोनुष्ठा-नाय मङ्गलमिवाशंसमाने गगनावतंसे मरीचिमालिनि, पतत्रि-कुल-कलकल-कोलाहलमिषेण तूर्यघोषमिवोपपादयति वनस्पतिनिकरे द्वीपान्तराल-प्रापित-बालातप-प्रभा-पुञ्ज-व्याजेन दीपाराधनमिवाचरति मार्तण्डमण्डले, आश्रमांगण-समुत्पतितपयःफेन-पाण्डुर-पाथःशीकर-निकरैः रंगवल्ली-विरचन-व्यापारमिव निर्वर्तयति कृष्णवेणी-तरंगिणी-तरंग-संघाते, उषःकाल एवोद्बुद्धाः योगसिद्धाः तपोनुष्ठानाय कटिबद्धाः संकल्पितमहाकार्याः अपरिमितधैर्याः स्वतस्सिद्धमनस्थैर्याः वनदेवतो-पजनिताश्चर्याः सामान्यजनाऽविदितचर्याः श्री शम्भुलिङ्गशिवाचार्या स्तपस्विवर्या मनस्विधुर्याः अपास्ततन्द्रां विधूतनिद्रां सन्धार्य योगमुद्रां अविगणय्य शैत्यं, आदृत्य शिवदौत्यं,आसाद्य प्रतीरं उपसृत्य नीरं, अवतीर्य प्रवाहमध्यं अवस्थाय कण्ठदघ्ने जले, विधाय स्नानसंकल्पं, अवलोड्य, जलजालं, प्रपठ्य अघमर्षणमन्त्रं, अवगाह्य त्रिवारं, समाप्य शास्त्रोक्त-स्नानविधिं पर्णकुटीरमुपाजग्मुः ।

तत्र च अनुष्ठाय स्वकीय नित्याह्निकं, समभ्यर्च्य परमेश्वरं, परिपूज्य गुहेश्वरं, सम्प्रार्थ्य तपोनुष्ठानाय तदीयानुज्ञां, संस्मृत्य गुरुदेवतां

सन्ध्याय कुलदेवतां, अभिवन्द्य स्वेष्टदेवतां, संकल्पपूर्वकं प्रारारम्भीति स्म ससम्भ्रमोज्जृम्भगं शम्भुलिङ्गयोगीश्वरः दीर्घकालिकतपश्चर्यानुष्ठानम् ।

तत्रैव च आश्रमस्य मध्ये मेध्यासनमध्यमध्यासीनः समं कायशिरोग्रीवं धारयन्नचलं शिरः, निरुध्य श्वासं, नियम्येन्द्रियग्रामं, नियन्त्र्य च आहारनिद्रादिकं, संसाध्य चित्तैकाग्र्यं, अवलम्ब्य सुदीर्घकलीनं मौनं विषयाशा-वर्जन-निस्तरंगे स्वान्तरंगरंगे अनंगरिपोर्गंगाधरस्य अंघ्रि-युगलमेव अभंगुरया भक्त्या चिरं ध्यायन् तद्ध्यानैकतानलीनमानस प्रारेभे तपश्चर्याम् ।

एवं प्रावर्तिष्ट कष्टकरमप्यष्टमूर्ति-पद-निविष्ट-मानसतया प्रणष्ट-दुःखानुभूति-विशिष्टं निर्विष्टाऽध्यात्मरसानुभवोत्कृष्टं परितुष्टमानस द्राघिष्ठं महिष्ठं शिष्टजनाभिष्टुतं तत्तपोनुष्ठानं सुचिरं निर्विघ्नं-निरातङ्कं निर्विशङ्कं च ।

विसरदूष्मभीष्मे ग्रीष्मे योगाकृष्टः तपोनिष्ठः स ब्रह्मिष्ठो मुनिश्रेष्ठः सानन्दमेव असहिष्ट चण्डमार्तण्डस्य ज्वलदङ्गारखण्डानिव अखण्डं वर्षतां करनिकराणां तापम् ।

अमीमर्षत सहर्षं वर्षाकाल-वरीवृष्यमाण-मुसलधार-वृष्टि-निष्ठ्यूत धाराकार-वारासार-प्रहारम् ।

अतितक्षत च हेमन्तशिशिरादिशीतर्तुकाले, पतिविरहित-सत्यालि-हृत्याद्यत्याचारकारि-व्रात्याधम-शैत्याभिध-दैत्यापसदस्य अत्याहितमत्यन्तसहिष्णुतया ।

एवं शीत-वात-वर्षा-सम्पातातपादि-ऋतुनिपातोपजातं सकलमपि दुःखजातं भगवतो भूतनाथस्य कृपातो दृक्पातो मयि भवतु पोते त्विति-धिया सर्वविधमपि सप्रतोषमेव सासहीति स्म ।

शिवध्यानाभिधां सर्वबुधास्वाद्यां सुधां तदा
स्वदतोऽस्य क्षुधा-बाधा कदाचिन्नोदभूदपि ॥५३४॥

तृष्णासु धनदारादितृष्णैव हि बलीयसी
तस्या एव परित्यागात् पर्यशुष्यच्च साऽखिला ॥५३५॥

एवं तपे नभसि सहसि तपसि च सर्वस्मिन्नप्यनेहसि तपसि स्थिते च तस्मिन् अनेनसि योगिचन्द्रमसि तद्द्वीपगतास्तरवोऽपि तमेव भगवन्तं यतिमघवन्तमनुकृत्य आबद्धजटामण्डलाः चीरवल्कल-धारिणः शीतातपवर्षासु स्थिताः तपोनुष्ठानमिवान्वतिष्ठन् । सर्वथा पक्ष पातविधुरं वृथाशब्दाडम्बरमकुर्वाणं अकृतनीडं तमेनं योगिमघवानमालोक्य वनविहङ्गाः स्वकीयद्विजशब्दानर्हतां परिभाव्येव जिह्यियति स्म चेतस्येव ।

यथाप्रतिज्ञं कवटगीबसप्पः प्रतिदिनं द्वीपं प्रति क्षीर प्रापणाय स्वभागिनेयं न्ययोजयच्चेन्नप्पनामानम् । प्रत्यहं स तपस्विभ्यः पयः समुपाहरति स्म ।

कदाचित् अम्बर-तलालम्बि-सम्भृताऽम्भोभराम्बुद-कदम्ब-सम्बाध-सम्भूत-गम्भीर-कडकड-ध्वनि-मुखरित-दिङ्मुखे कृषीवलहर्षावहे वर्षा-समये धाराधर-निपतद्धाराकारवर्षाऽसारस्रुताऽपरिमित-नीर-राशि-वर्धित महापूरायां कृष्णवेण्यां कूलङ्कषमहाप्रवाहेण प्रवहन्त्यां श्री शम्भुलिङ्ग-शिवाचार्याधिष्ठितं सर्वतः समुद्रवत्-परिदृश्यमानाऽपरम्पार-वारिपरि-वेष्टितं तद् द्वीपं प्रति गोक्षीरोपहरणं दुश्शकमिवालक्ष्यत ।

अथापि उत्साहाभरणः बलिष्ठकायकरणः प्लवनकलानिपुणः चेन्नप्पनामकस्तरुणः स्वश्वशुरस्य निदेशानुसारेण प्रतिदिनमप्रमादेन तुम्बीफलद्वयघटितं क्षुद्रप्लवमेकमवलम्ब्य सधैर्यं भीष्मप्रवाहे प्लवन्नेव क्षीरमानयति स्म द्वीपं प्रति ।

परमेकस्मिन् दिने सन्तत-वरीवृष्यमाण-वृष्टि-जल-धारासम्पातेन प्रतिक्षणमुपचीयमाननीचेतरवारि-वीची - निचयैरत्युल्बणरूपमाबिभ्राणे कृष्णवेणीमहाप्रवाहे यथापूर्वं चेन्नप्पः सम्पुटाकारपित्तलपात्रं क्षीरमापूर्य मुखं दृढतरमाबध्य तुम्बीद्वयकृतावलम्बनः प्रतस्थे भीष्मजलप्रवाह-मुत्तरीतुम् । प्रतिदिनमभ्यस्ततया निर्भयतया स्वैरं तरति स्म । सरभसं सत्वरं च सरति स्म नदीप्रवाहे परतीराभिमुखम् ।

प्रळयकालीनाऽकूपार-पारावारवत्परिदृश्यमानमपि तदपारपय पूरं सलीलं प्लवति तस्मिन् सन्तरणनिपुणे तरुणे चेन्नप्पे एकेन पाणिना क्षीरपात्रमुद्धृत्यापरेण च करेण जलराशिमपसारयति, मध्ये नद्या अभि मुखमभ्यागमदेकः भीकराकारः साक्षान्मृत्युदेवतावाहनीभूतमहिष इव ससम्भ्रममुपसर्पन् क्रकच-कर्कश-पुच्छ-दंष्ट्रादण्ड-भीषणः समुत्पाट्यमान-जलचक्रः यादश्चक्रचक्रवर्ती कश्चन नक्रः । तं भयङ्करं दैत्यप्राणिनं निरीक्ष्य भयभ्रान्ते चेन्नप्पे तत्क्षणमेव परिवर्त्य किंचिदाकुञ्चित तुम्बी-द्वय-प्लवाञ्चिते पश्चात् सरति पराचीनतया सन्तरति, सरभसं इतोऽपि पृष्ठतः तस्मादपि भीकरतरः जलचरशक्रः कोऽपि चान्य एव क्रूरनक्रः मुखं विवृत्य पुर आधावति स्म ।

तद्दृष्ट्वा "हा हन्त हतोऽस्मि मन्दभाग्यः । उभयतो मृत्युः । किंकरोमीति" चीत्कुर्वन् चेन्नप्पः ससंभ्रमं करगतं क्षीरपात्रमुत्क्षिप्य समीपमगतं कञ्चन मकरं लक्ष्यीकृत्य व्यात्ते विवृते च तन्मुखकुहरे सवेगं प्राक्षिपत् । स्वयमपि प्लवन्तं तुंबीद्वयनिर्मितप्लवं पादाग्रांत्प्रहृत्य उत्प्लुत्य जलमध्ये निपत्य विरुद्धदिशाऽपलयत प्लवन्नेव सरभसं बाहुभ्यामुभाभ्याम् ।

बलवता पात्रप्रक्षेपेण ताडितः पीडितः चेन्नप्पाऽभिमुखः स नक्रः स्वे विवृतमुखे दंष्ट्रामध्ये दृढतरं संलग्नं कठिणतरपित्तलधातुमयं क्षीरपात्रं उद्वमितुं निगरीतुं वाऽपारयन् दुद्राव ततः सुदूरम्

तरीतो वेगादुत्प्लवनसमये चेन्नप्पस्य बलात् तिर्यक् चलितपा_ दाग्रेण नोदितः तीक्ष्ण छुरिका-परशु-सनाथः तुंबीप्लवः पश्चादभिधावतः द्वितीयस्य नक्रस्य मुखमास्फोटयामास। अनेन चाकस्मिकाघातेन भीतभीतः स अन्यो ग्राहोऽपि परावृत्य सुदूरमपससार। चेन्नप्पोऽपि विशालाभ्यां बाहुभ्यां वेगात्संप्लवमानः सुरक्षितमुपास्प्राक्षीत् तीरम्। इतश्च शम्बुलिङ्गस्वामिनः गोक्षीरमनुपनतं निरीक्ष्य संपूर्णमुपोष्यैव मयाऽद्य तप-आचरणीयमिति विरूपाक्षस्य अपेक्षा वर्तते इति प्रतिभातीति समाधाय निराहारेणैव अतप्यन्त अहोरात्रं तपः।

ततश्च श्री चरणेभ्यः प्रतिदिनं गोक्षीरमप्रमादेनैवोपाहरिष्यामीति प्रतिजानन्कवटगीबसप्पमहोदयः नक्रभीत्या स्वभागिनेयश्चेन्नप्पः द्वीप मप्राप्यैव क्षीरमप्रदायैव प्रत्यावर्ततेतिप्रवृत्तिमुपलभ्य तमाजुहाव अब्रवीच्च "चेन्नप्प! अद्य स्वामिनामुपवासमेव त्वमकारयः। भीरुरसि त्वं श्री शंभ लिंगशिवाचार्याणां नामोच्चरन् तुंबीप्लवमवलम्ब्यैव पुरोऽसरिष्यः प्लव-न्नेव तदा किमभविष्यत् ? सुरक्षितमतरिष्यः प्रवाहम्। वृथैव भीत्या पलायितः प्रत्यावर्तिष्ट भवान् गुरुणां चाद्य पूर्णोपवास एवाभूत्। भीरुणा च त्वया न शक्ष्यते गोक्षीरमुपनेतुम्। अन्यमेव नियोक्ष्यामि दक्षतरं श्वः प्रभृति इति।

तच्छ्रुत्वा निर्भर्त्छित इव तुच्छीकृत अवमानित इव च विषीदन् चेन्नप्पः पुनः सोत्साहमगादीत् "नहि नहि त्यक्ष्यामि क्षीरप्रापणं गुरवे। यत्किमपि वा भवतु। अहमेव अंगीकृतं कार्यं साधयिष्यामि। गुरुकार्ये मरणमपि मे श्रेयस्करणम्। गुरुचरणमेव शरणम्। तत्पादस्मरण भव--सन्तरणमिति कथयन्ति शिवशरणाः। भवसन्तरणं गुरुचरणं च मम नदीप्रवाहतरणे किं न तरणीभवेत्? नाहमन्यस्मै दास्याम्यवसरम्। अहमेव प्रस्थास्ये अहमेव प्रयस्यामि तरिष्यामि च नदीम्। प्रयास्यामि द्वीपम्। प्रदास्यामि क्षीरं गुरवे। प्राप्स्यामि च तत्प्रसादं इति।

यथोक्तं परे द्यवि प्रातरुत्थाय अपरमेव क्षीरपात्रं करेणादाय तुंबीद्वयसंबद्धं पोतमेकमवलंब्य पुनः प्रातिष्ठिपद शौर्यधारिधुर्यः संप्राप्त-प्रवाहसन्तरणचातुर्यः गुरुचरणस्मरणासादितस्थैर्यः अलक्षितप्रवाहगांभीर्यः सिषाधयिषितगुरुकार्यः साहसिवर्यः चेन्नप्पयुवकः यदा च सः प्रतिदिनमिव तुंबीतरीमश्वतरीमिवावलंब्य कृष्णाप्रवाहमध्यमभ्यापतत् तदा पुनरायातौ गृहीताग्रहाविव मूर्तिमन्ताविव पापग्रहौ द्वौ ग्राहौ ।

धीरधीश्चेन्नप्पः अभ्यर्णमभ्युपपन्नावपि दृष्ट्वा वक्त्रवक्रौ तौ नक्रौ अबिभ्यन्नेव निर्भयतया–

जय शम्भुलिङ्गेश जय भो शिवाचार्य
जय जय जगत्राण जय भूपरित्राण
जय जय शिवाचार्य जय रक्षणाकार्य
मां रक्ष नक्राच्च विधे हि वक्रात् ॥५३६॥

शरणं प्रयामि चरणं जगद्गुरोः
शरणं तदन्यदरणं च नास्ति मे
करुणी गुरुस्स तरणीभवेद्भवो–
त्तरणे च पापतिमिरापसारणे ॥५३७॥

एहि मां गुरो त्राहि मां गुरो
पाहि मां गुरो देहि ते करौ
किंकरोऽस्मि ते शङ्करानुग
त्वं कुरुष्व मे शं कृपाकर ॥५३८॥

नास्ति मे गतिस्त्वं हि मे गतिः
त्वां विना यति निश्चिता मृतिः
प्रीयतां गुरुर्दीयतां करो
त्रायतां च नो ध्यायतो भृशम् ॥५३९॥

तारयाम्भसः पारयांऽहसः
वारयाऽपदो मे रयाद् गुरो
तेऽरयः कृपाधारयाऽप्लुतं
पारयन्ति नो बाधितुं नरम् ॥५४०॥

रक्ष रक्ष मां दक्षजापतेः
त्र्यक्षनाम्निनश्चाक्षताशिषाम्
लक्ष्यकेन्द्र भास्वद्यतीन्द्र भो
सद्य एव मामुद्धर प्रभो ॥५४१॥

नातपं तपो नाजपं जपं
नो व्रतं कृतं नो नमस्कृतम्
का गतिर्गुरो भूदिवस्तरो
देहि ते करं मूर्ध्नि मे वरम् ॥५४२॥

पालयेड्य मां त्वं कृपालय
लीलया शिशुं लालयेश माम्
शीलयाऽर्द्रया त्वं दृशा कृपा–
शीलया गुरो पालय प्रभो ॥५४३॥

पृष्ठतोऽग्रतोऽत्युग्रविग्रहौ
ग्राहदुर्ग्रहौ मद्ग्रहाग्रहौ
व्यात्तुमागतौ मृत्युनोदितौ
पाहि मां गुरो जहि च तावुभौ ॥५४४॥

रामनामतः पूर्वमम्बुधा–
वश्म चातरच्चेति विश्रुतम्
शम्भु नाम संस्मृत्य चाश्महृत्
लीलयाऽतरं सिन्धुमद्भुतम् ॥५४५॥

पलायेथां पलायेथां वक्रौ नक्राविती द्रुतम्
आशीश्चक्रं प्रगृह्याशु शम्भुरायाति देववत ॥५४६॥

नक्र वक्त्राति वक्रोग्र-दंष्ट्राग्राऽऽक्रुष्ट-चेतनम्
गजेन्द्रमिव गोविन्दो रक्ष मामक्षतं गुरो ॥५४७॥

एवं साम्रेडं सोत्प्रासं सोच्चस्वरं च उच्चरन् गुरुस्तोत्रं–

जय शम्भो हर शम्भो गुरु शम्भो कुरु शं भोः
रक्षाऽम्भोनिकुरम्बे कुम्भीरादतिभीतम् ॥५४८॥

इत्याद्यर्थकैः कन्नडभाषामयैः शब्दैर्गर्जनां पर्जन्योर्जित-तर्जनात्मक-ध्वनि-विशेषैः कुर्वन् मरुच्चालित-वाचाल-वीची-निचय-कलकल-नीचीव-करणनिपुणैः गुरुनामोच्चारणैः नभोमण्डलमेव मुखरीकृतमकरोत् ।

अस्य च सतारस्वर-चीत्कार-थूत्कार-फूत्कार-पुरस्कृत-हर-गुरु–नामोच्चारस्वर-कोलाहलेन भीताविव अभिभूताविव शिष्यीभूतावि-भक्तीभूताविव तावुभावपि महाभूतौ नक्रौ तत्क्षणमेव वक्रगत्याऽगत्य तुम्बीफलद्वयसम्बद्धां द्रोणीं दूरादेव मण्डलाकारं परिभ्रम्य परिवर्त्य च प्रदक्षिणं विधायेव सुदूरमपससृतुः ।

तन्निरीक्ष्य उच्छ्वसित इव पुनरुज्जीवित इव आश्वस्त इव मृत्युमुखादुन्मुक्त इव चेन्नप्पः कृष्णाप्रवाह इव आनन्दसागरप्रवाहेऽपि संप्लवन् तदेतत्सकलमपि श्री शम्भुलिङ्गशिवाचार्यगुरुणां नामोच्चार-प्रभावपरिणाम इति मनसैव गुरुचरणमभिनन्दन् सत्वरमुत्तरन् उभाभ्या-मप्यत्युत्साहोपोद्वलिताभ्यां बाहुभ्यां सलीलं सलिलराशिमपसारयन उपाससाद द्वीपतीरम् ।

नदीतटादतिनिकट एव अटवीप्रदेशे वर्तमानं वट-कुटज-पटीरादि-विटपि-पटल-परिवेष्टितं गुरूणां पर्णकुटीरं प्रति चेन्नप्पः सत्वरागत्वर

समुपसृत्य दण्डिकुलमण्डनमणीनां पण्डितमण्डलाऽखण्डलानां खण्डेन्दुशेखरं प्रत्यखण्डं तप आतिष्ठमानानां श्री शम्भुलिङ्गशिवाचार्याणां पदपुण्डरीकयोः पुरत आत्मानं दण्डवत् पातयित्वा प्रार्थयामास–

नाक्षमे क्षीरमानेतुं ह्यो यत्तत्क्षम्यतां गुरो
क्षुद्रस्याक्षुल्लकं मन्तुं त्वादृक्षाः क्षन्तुमीशते ॥५४९॥

मध्ये प्रवाहं द्वौ ग्राहौ ग्रसितुं मां धृताग्रहौ
यदाऽग्रेऽसरतां तौ वो न्यग्रहीत् मय्यनुग्रहः ॥५५०॥

नामं नामं भवन्नामात्युच्चैरुच्चार्य गर्जति
मयि तौ मां विमुच्यैव गतौ कृत्वा प्रदक्षिणाम् ॥५५१॥

ग्राहं ग्रसन्तं गजराजमादौ हरिर्निजग्राह सुदर्शनेन
नक्रौ विना चक्रमहो निगृह्य तेऽत्यक्रमीच्चक्रिणमेव नाम ५५२

त्वन्नाम हित्वा जगतीतलेऽस्मिन् किं नाम सम्पत्सुखशान्तिदायि
तदुच्चरिष्ये स्मरणं करिष्ये संसारलीलामुपसंहरिष्ये ॥५५३॥

स्पष्टं दृष्टं मयोत्कृष्टं विशिष्टं श्रीगुरोर्मम
प्रत्यक्षतोऽद्य माहात्म्यं विबुधैः समभिष्टुतम् ॥५५५॥

शम्भुलिङ्गशिवाचार्याः श्रुत्वा वृत्तं तदाऽब्रुवन्
सर्वं शर्वेच्छयैवोर्व्यां निर्वर्तत इति स्फुटम् ॥५५६॥

भर्गानुग्रहतो ग्राहदुर्ग्रहग्रहणोज्झितः
त्वं तं स्वर्गापवर्गादिप्रदं दुर्गापतिं भज ॥५५७॥

मह्यं लब्धं धेनुदुग्धं न ह्यः किञ्चिच्च न ह्यतः
खेदः किन्तु प्रमोदोऽभूत् यदुपोष्य तपःकृतम् ॥५५८॥

ईशानध्यानपीयूषपानेन मम पोषणम्
उपोषणेन मद्देहशोषणं न मनागपि ॥५५९॥

गुहेश्वरस्य गोक्षीरस्नानं न ह्य कृतं त्विति
विषीदामोऽत्र किंकुर्मो वयं शङ्करकिङ्कराः ॥५६१॥

तीर्त्वा कृष्णा-महापूरं क्षीरं नानायि यत्त्वया
दोषस्ते नैष ईषच्चापीशेच्छेष्टेऽत्र सर्वथा ॥५६०॥

मानसं तु मयाकारि पयस्नपनमीशितुः
क्षमाप्ययाचि तं त्यक्त्वा क्षन्तुं मन्तुं च कः क्षमः ॥५६२॥

गुरुवरैः इति सान्त्वनवचनैः समाहितश्चेन्नप्पः गव्यं पयः समर्प्य समाप्य च सेवाविधिं पुनर्न्यवीवृतत स्वग्रामम्-

विमलतरतरङ्गा दक्षिणगङ्गा कृष्णातरङ्गिण्यपि स्वोत्सङ्ग-रङ्गमिव तदेतद् द्वीपाङ्गणमधिष्ठाय तपोऽनुष्ठानाय जान्हवी-जल-जाल-जाताऽलव-गर्व-जारण-जागरूक-जटाजूटं धूर्जटिमारिराधयिषुं, नन्दीश्वरमिव शैवोद्धारधुरन्धरं, प्रभातसमयमिव आमीलिततारकं न्यग्रोधपादपमिव विततजटाकलापं सुयोधनमिव कृतकुशासनपरिग्रहं हेमन्तोद्यानमिव अपरागं, अशोकचक्रवर्तिनमिव विषयानुधावनविरतं हनुमन्तमिव निगृहीताक्षं, सतीसौन्दर्यमिव गृहीतरुद्राक्षमालं, वडवाग्निमिव पयोमात्रभक्षं, वनस्थलमिव प्रस्फुटजपातिशयरागं, भवानीपतिमिव संसाधितयमनियमं, उत्तरायणमिव तपःप्रभावविच्छायरविमण्डलं, शुक्राचार्यमिव कचाभिवृद्धिसमुल्लासितं, तमेनं मुनिमनुजमानितं महर्षिं निशाम्य हर्षोत्कर्षनिर्भरेव नृत्यति स्म मरुल्लीलालोलैस्तरङ्ग-जालैः ।

मध्ये मध्ये केनापि कारणेन समुपनतेष्वपि भूयिष्ठेषु कष्टेषु अन्तरान्तरागतेष्वप्यनन्तान्तरायेषु, उपस्थितास्वपि धैर्यादिशोषिकासु

विभीत्रिकासु भगवतो नगजारमणस्य गजाननपितुर्निरवग्रहेण अनुग्रहेण विघ्नराशिकोशीकरण-देशिकैर्गुरुजनानामाशीराशिभिः शिष्यानुकूल्येन भक्तजनसहकारेण च चतुर्दशमासात्मकसुदीर्घसमयावधिकः तपोनुष्टान–महोत्सवः पूर्तिमगात् ।

एवं गच्छन्त्यां कियत्यामपि कालकलायां एकस्मिन् दिने प्रभात-सन्ध्यारागरक्तिमाक्तेषु अलक्तकालिप्तेष्विव आशामत्तकाशिनीमुखेषु शनैः शनैः वलमाने मलयपवमाने, अरविन्दमुकुलबन्धनोन्मुक्तेषु मिलिन्देषु कम्पितचम्पके आन्दोलितमाकन्दे नाटितकुटजे लासितलवङ्गे चुंबित-निबे उत्तम्भितकदम्बे उत्तोलितताले उल्लासितमल्लिके स्पन्दितबन्धूके विपाटितपाटले विस्फारितशेफालिके उन्मीलितमालतीके स्यन्दितमकरन्दे नन्दितमिलिन्दे अभिवन्दितमन्दारे मन्दं मन्दं वहति निशावसानजातज डिम्नि शीकराद्रिताश्रमसीम्नि गन्धवहस्तनन्धये अरुणारुणकिरणविकिरण सुवर्णाऽभरणैर्मनोहरति श्रृंगारितहरिति शीतलीकृतमरुति शोणीकृतकृष्णास रिति संस्फुरति प्राभातिके सन्ध्यासमये श्री शंभुलिंगशिवाचार्याः दैवीप्रेर-णया कामप्युत्स्वप्नदशामवागाहिषन्त ।

स्वप्ने च अवालोकिषन्त कमपि महातेजस्विनं उदयात्पूर्वं शिवभक्त सन्दिदृक्षयेवागतं भगवन्तं भास्वन्तं वाडवहविष्मन्तमिव प्रशान्तरूपमुद्वहन्त रजनीकान्तमिव द्वितीयं भुवमवतरन्तं, तृतीयमिव सोदरं अश्विनीकुमा योः चतुर्थमिव दक्षिणागार्हपत्याहवनीयाद्यग्निश्रेण्यां, पञ्चममिव वेदचतुष्टयस्य श्रौतरूपं, षष्टमिव पञ्चाचार्यप्रभावसमुदञ्चितं लोकानुग्रहार्थमेकीभूत-विशिष्टस्वरूपं, विसर्पिणा देहमहसा, दासीभूतेनेव ब्रह्मवर्चसा परिचर्य-माणं, हृदयमापूर्य बहिरप्युल्लसता लोकानुरागेणेव काषायाम्बरेण परिस्फुरन्तं, आश्रमतरुमिव जटावल्कलधारिणं, शिवमिव प्रसादितार्यं, हरिमिव लसत्सुदर्शनं, चतुर्मुखमिव लब्धसरस्वतीवाल्लभ्यं, बृहस्पतिमिव कचप्रसन्नमुखं, काव्यप्रबन्धमिव सुप्रसादं, परित्यक्तश्वर्यमपि विभत्युज्वलं नक्षत्रमण्डलमिव नवग्रहोल्लसितं, विरक्तमपि सुवणसम्पन्नं, वीतस्पृहमपि

उद्भासिताशं, स्वतपःसिद्धिमिव प्रत्यक्षतामुपनीतं, चतुर्दशमासावधिकमहा तपःफलप्रदित्सयेवागतं साक्षाद्विरूपाक्षं कमपि योगीश्वरम् ।

स च महायोगी किमपि वक्तुं स्फुरिताधरोष्ठान् श्री शिवाचार्यान् प्रति "साधु विदिताशयोऽस्मि । सिद्धं ते तपः । प्रसन्नः परमेश्वर । त्यजैतद् द्वीपं साधय स्थलान्तरम्" इति हृद्यं निगद्य सद्य एवान्तर्दधे ।

प्रातः प्रबुद्धाश्च श्री शम्भुलिङ्गशिवाचार्याः सुप्रसन्नान्तरङ्गाः अयं च स्वप्नसन्देशः मत्तपःप्रसन्नस्य श्री परमेश्वरस्यैव निदेश इति निरधारयन् । स्वकृतं पशुपति प्रसादसाधकं तपः सार्थकमभूदिति प्रासीदन मनसि । धन्यममन्यन्त चात्मानं शिवानुग्रहभाजनम् । कृतकृत्यममंसत च स्वीयं प्रदीर्घतपःप्रयासम् । यथार्थतामन्वभवन महाकवेः "क्लेशः फलेन हि पुनर्नवतां विधत्ते" इति सूक्तवचनस्य । विश्वस्येशस्य विश्वस्य वचनं आदृत्य विज्ञप्ति भक्तानां, परित्यज्य द्वीपमुपागात् कङ्कणवाडीग्रामम् ।

तपःसंसिद्धांश्च एतान् सिद्धपुरुषान् सन्द्रष्टुं सहस्राधिका एव भक्ताः कङ्कणवाडीमभ्यागच्छन् । तांश्च भक्तजनान् कङ्कणवाडीग्रामागतान् तस्थांश्च भक्तगृहस्थान् प्रति सर्वज्ञमूर्तेर्भगवतः शर्वस्य स्वतपोनुष्ठानाज्ञोपज्ञां न्यवेदयन्नितः प्रस्थातुं स्वस्यानुज्ञाम् ।

हिमशिखरे कस्मिंश्चन गंगाजलकलकलमुखरे स्थित्वा प्रखरं तपस्तप्तव्यमिति स्वसङ्कल्पं च न्यगदन् । शिष्या अपि पुरस्तात् गुरुवरेण्यानामत्रैव वासः कथं भवेत् ? तेषां हिमप्रस्थंप्रस्थानं प्रति कथमस्माभि. प्रत्यवस्थानं कृतं स्थाने भवेदिति विचारयन्तो मनस्येव न्यवर्तन्त स्वस्वग्रामम् ।

पंचषष्वेव वासरेषु वर्षाकालतया प्रतिवृष्टिपातसमेधितजलधाराभिः प्रवर्धितः कृष्णासरितः प्रवाहः पुनरपि महापूररूपं प्रतिपद्य श्री गुहेश्वर

देवस्थानं श्री शिवाचार्यपर्णकुटीरं चार्द्राद्रं चकार सलिलौघेन। सर्वेषामपि श्री शम्भुलिङ्गस्वामिनां स्वप्नसन्देशस्य प्रत्ययगोचरतमायासीद्याथार्थ्यम्।

रवकवीतिग्रामादागतः चिक्कोडि रामलिङ्गप्पनामकः सद्भक्त सातिशयश्रद्धायुक्तः धावन्नुपागच्छद् गुरुचरणान्तिकम। बद्धाञ्जलिः पुटं प्रार्थयामास च श्री शम्भुलिङ्गस्वामिपादान् "अयि महान्तः सन्तः मया श्रुतं भगवन्तोऽत्र भवन्तः करिष्यन्ति स्थानान्तरम्। त्यजिष्यन्ति द्वीपं। यजिष्यन्ति परमेश्वरम्। भजिष्यन्ति आश्रमान्तरम्। भोक्ष्यन्ते च उपवासस्य परिसमाप्ततया शिवप्रसादम् इति॥

अत्रैका मदीया प्रार्थना गुरुचरणैः गुरुकरुणैः धृतशिष्यान्तःकरणैश्च अवश्यमवधानदानेन श्रोतव्या। सानुग्रहं च अङ्गीकर्तव्या। नेतो दूरं प्रस्थातव्यमस्मान् भक्तजनान् विहाय। न वयमितः परं गुरुतरं गुरुविरहं शक्ष्याम सोढुम्। न त्यक्ष्यामः श्रीचरणवरणसन्निधिम्। वक्ष्यामः यत्रकुत्राप्येतद्देशे श्रीमतां निवाससौकर्यसौविध्यसम्पादनभारम्। स्प्रक्ष्यामः गुरुचरणमेतदर्थं सशपथम्। न वयं मोक्ष्यामः अस्मद्गुरुवरान्। सन्ततं च बुभुक्षामः युष्मदुपदेशामृतमृष्टान्नम्।

आदिशन्तु भक्तं माम्। कुत्र वा स्थाने श्रीचरणानामेकान्त-साधनानुष्ठानयोग्यमाश्रममावासं च कीदृशं करवाणि कथं वा करव, श्रीश्रीमतामाज्ञामेव प्रतिपालयन्नस्मि" इति सवाष्पगद्गदमुद्गिरन् भक्त्युद्रेकतः श्री शम्भुलिङ्गमृदुचरणौ परिमृश्य साष्टाङ्गं प्रणिपपात। पञ्चदशनिमेषान् अत्यजन्नेव गुरुपदपुण्डरीके दण्डवत्पुरो न्यपातय-दात्मानम्।

तदा करुणाभरणाः संस्रवद्दयावदन्तःकरणाः सङ्कलित शिष्यको-टिसमुद्धरणाः श्री शम्भुलिङ्गश्रीचरणाः अम्बरपथालम्बिताम्भोभर-सम्बाध-विजृम्भदम्बुद-कदम्ब-गम्भीर-नादावधीरण-धुरीणधोरणीधारणया

विहित भक्तजन श्रोत्रपारणया गिराऽन्वकंपन्ताऽकंपभक्तिसंपन्नं राम-लिङ्गप्पम् ।

भक्तश्रेष्ठ त्वमुत्तिष्ठ परितुष्टोऽस्मि तेऽधुना
वत्स वत्स्यामि चेच्छातः सन्निकृष्टभुवीष्टकृत् ॥५६३॥

जम्बूखण्डोतिनेदिष्ठभूखण्डाग्नेयदिक्तटे
काननान्तःप्रदेशान्तर्वेशन्तोऽस्ति प्रशान्तिभूः ॥५६४॥

तत्तीरे विलसन्नीरे लोलद्वानीरलालिते
शिवालयोऽपि बाभाति शोभालाभोन्नतो भुवि ॥५६५॥

पल्वलस्य शिरोदेशे पत्रचषा इल्वला इव
मन्दारा नन्दनाऽमन्दानन्द-सन्दायका नृणाम् ॥५६६॥

श्रीगन्ध-बन्धु-माकन्द-पिचुमन्द-द्रु-वृन्दतः
निष्यन्दन्मकरन्दार्द्रं सौगन्धाऽमन्दनन्ददम् ॥५६७॥

जम्बु-जम्बीर-निम्बोच्चै-रम्भादि-द्रु-करम्बितं
कदम्बादि-कदम्बातिसम्बाध-शिशिरान्तरम् ॥५६८॥

वेशन्त-तीर-देशं तं निविशन्तं निषेवितुम्
ईशं तं तन्नु वेशन्तवेशं किं मानसं दधौ ॥५६९॥

स्वच्छोदं नामतोऽच्छोदं किं जलाजीर्णतः सरः
पर्यणंसीन्नु चाल्पोदधृगेतत्पल्वलात्मना ॥५७२॥

एकान्तरम्यमेकान्ततपोयोग्यमिदं स्थलम्
शिवमन्दिरदाक्षिण्येनाश्रमोऽत्र विधीयताम् ॥५७१॥

गुरुवराणामेतां स्वानुग्रहायैवोच्चरितां सुधामधुमुचमाचान्तमोचामिव वाचं निशम्य तद्दययैव वाचालितः रामलिङ्गप्पः उत्थाय भक्तिभार-गद्गदाक्षरया क्षरदिक्षुरसया वाण्या व्यजिज्ञिपत् ।

"भगवन् तस्मिन् खलु गिरिकन्दरान्तःप्रदेशे पल्वलोपान्ते कुत्र स्थाने मया निर्मातव्यः पुण्याश्रमोऽत्रभवतां भवतां तपोनुष्ठानाय? दयया निर्दिश्यताम्" ।

तदा मन्दं हसन्तः मन्देतर-मति-निन्दित-पुरन्दर-गुरवः श्री जगद्गुरवः श्री रामलिङ्गप्पशिष्याय नारीकेलफल प्रसादं प्रदाय एवमाज्ञाशिषुः ।

"तदेतत् परममङ्गलकरं नारीकेलफलं कस्यचिदष्टवर्षवयस्कस्य वालकस्य करे समर्पय । स एतत्फलं यत्र निक्षिपेत् तत्रैव विधीयतामाश्रमः" इति ।

तदुपश्रुत्य हर्ष-प्रकर्ष-नरीनृत्यच्चित्तमयूरः श्री रामलिङ्गप्पमहोदयः पञ्चषैः निर्वञ्चनस्वभावैः प्रपञ्चव्यवहाराभिज्ञैः गुरुकृतज्ञैः पञ्चजनैः समेतः निर्दिष्टं गुरुवरेष्ट सर्वोत्कृष्टं नैकानोकह-शाखाग्र-चुंवित-नाकलोक एकान्तमनोरमं पाकारातिप्रियनन्दनवनीनीकाशं पिनाकपाणिसन्निधानेन भूकैलासवदुपलक्ष्यमाणं निशान्तमिव वनदेवतायाः शुद्धान्तमिव मधुश्रियः क्रीडाङ्गणमिव सौन्दर्यलक्ष्म्याः केन्द्रस्थलमिव निसर्गरमणीयतायाः विश्रान्तिस्थानमिव शान्तिसीमन्तिन्याः प्रसाधनगृहमिव दिग्देवतानां वृद्धमिव बहुवयस्कं, सङ्गीतभवनमिव मधुरमधुकरगीतगुञ्जारवरञ्जित चन्द्रमण्डलमिव हरिणाधिष्ठितं, कैलासमिव सन्निहितशिवं, पाण्डवसेनाबलमिव शिखण्डिमण्डितं,हस्तिनापुरमिव धृतराष्ट्र-द्रौणिशकुनि-परिवार भूषितं, रामराज्यमिव कुशाधिष्ठितं, व्रजभूमिमिव तृणावर्तपरिवेष्टितं, कृष्णचरितमिव गोकुलोल्लासितं, दुर्मन्त्रिमण्डलमिव जलाशयदुर्ललितं, सुरसाम्राज्यमिव वृषाध्यासितं, बदरिकाश्रममिव स्वच्छन्दसञ्चारिशुक

तद्गिरिकन्दरान्तर्वर्ति सुन्दरस्थानं सर्वेऽपि ते गुर्वाज्ञामेव पञ्चाचार्याज्ञेति सञ्चिन्त्य निर्वञ्चनबुध्या तत्परिपालनसमुदञ्चदुत्साहाञ्चिताः पञ्च पञ्चजनपञ्चाननाः सादरं समुपाजग्मुः ।

तत्रत्यं निसर्गसौन्दर्यं जलसौकर्यं स्थलप्राचुर्यं विविक्तरमणीयतां दृष्टवा मुमुदिरे मनस्येव । प्रशंसिरे गुरूणां दूरदृष्टिम् । मेनिरे च कृतार्थमात्मानम् । अनुमेनिरे चैकमत्येन तदेव योग्यतमं स्थलं गुरूणां कठिणतरदीर्घतपोऽनुष्ठानायेति ।

तत्र च त्रिचतुराः क्रीडाचतुराः गोपबालकाः क्रीडन्ति स्म । तेषु च कमपि अष्टवर्षदेशीयमतितेजस्विनं सुकुमारं कुमारमाहूय तस्य च कुशेशयकोमलतरे करे नारीकेलफलं प्रदाय "इदं श्रीफलं कराञ्जलिपुटे-नाञ्जसा धरन् सञ्चरास्मिन् प्रदेशे । यत्रेदं निक्षेप्तुं भवति तवापेक्षा प्रेरणा वा तत्रैव प्रक्षिप" इति निरदिशन् ।

तेषां च ज्यायसां प्रेयसां निदेशमनुसृत्य स गोपालबालः श्रीफलं संपुटितेन करेण आदाय तत्क्षण एव गृहीतगाम्भीर्यः उद्यद्धैर्यः प्रदर्शित सरभससञ्चरणचातुर्यः दिक्षु विदिक्षु किमपि दिदृक्षन्निव किमप्यन्विष्यन्निव ससूक्ष्मेक्षिकं निक्षिपन्नितस्ततः चक्षुः अन्ते क्वचन निचिक्षेप नारीकेल-फलम् । सफलं चाकलयत स्वस्य परिश्रमम् ।

तमनुसृत्यैव आगच्छन्तो रामप्पादयः पञ्च पञ्चजना योग्यस्थाने स्थापितं निरीक्ष्य श्रीफलं समुदञ्चित-रोमाञ्च-सञ्चय-कञ्चुकित-कलेवरा सम्यगभ्यञ्चन् तत्स्थलम् । हस्तत्रयगभीरं तत्रैव निचक्षिपुर्बीजरूपेण तत्फलम् । न द्रक्षणाय च नत्पालनैकलक्षं वृक्षपोषणदक्षं गुरुस कमपि कृषीवलं नियुज्य स्वस्थानं न्यवृतन् । च गर्तमेकं तत्रैव खनित्वा तच्च श्रीफलं तत्रैव उप्त्वा प्रभूतं च स्नात्रयित्वा च सरोजलम् ।

यत्र गोपालबालकेन श्रीफलं यदृच्छयैव निक्षिप्तं तत्रैव काचन पर्णकुटी निर्मीयतामिति रामलिङ्गप्पं आदिदिशुः श्री शिवाचार्याः।

न खलु तत्स्थलमिदानीन्तनकाल इव तदानीं वृक्षलतादि वैरल्येन मरुभूतमासीत्। किंतु महोन्नतछायावृक्षलक्षाऽलक्ष्यमाणक्षितितलं असङ्ख्य-लता-वितान-शाखा-पर्णावलि-निबिडतरं नैक-क्रूर-श्वापद-स्वैर-सञ्चार-भीकरं जनसञ्चार-वर्जितं चाभवत्।

गुरुवरेण्यानां तु कस्यापि हिंस्र प्राणिनः सकाशाद् नासीदेव भीति र्वा अपायशंका वा। तेषां महामहिम्ना प्रभाविताः क्रूरा अपि हिंस्राः प्राणिनः सात्विकभावं भजन्त इति सर्वेषामपि विदितचरमेवासीत्।

परन्तु तेषां सन्दर्शनार्थमागच्छतां भक्तानां कतिपयदिनानि तत्रोषित्वा सेवाशुश्रूषादिकं कर्तुं तथा शिवरात्रि-नवरात्रि-गुरुपूर्णिमा-गौरी-गणपति-हर-गुरु-पूजादि-दिनेषु विशेषरूपेण गुरुसेवां देवपूजा साम्प्रदायिक-समाराधनादिकं च विधातुमानुकूल्यं भवेदिति रामलिङ्गप्प-महोदयः जात्याऽकृपणः निपुणमतीन् शिल्पिनः समाहूय दिव्यमठ निर्माणस्य व्यवस्थां प्रकल्पयामास।

तदर्थं भक्तानामपेक्षां गुरुसन्निधौ निवेद्य नवीन मठनिर्माणायय श्री शम्भुलिङ्गशिवाचार्याणामनुमतिं सम्पादयामास।

दर्शनार्थमायास्यतामायासो वाऽनानुकूल्यं वा न स्यादिति श्री गुरुवरेण्यैरपि स्फुरत्कारुण्यैः श्री रामलिङ्गप्पस्य याचना इतरभक्तानां प्रार्थनाऽगण्यनैकगृहस्थानां च सूचना अन्वमोदि।

ततः प्रोत्साहित इव दैवेन, प्रचोदित इव पूर्वपुण्येन, उपोद्वलित इव भगवत्या भवितव्यतया आचुम्बित इव उदर्कश्रिया, श्री रामलिङ्ग प्पमहोदयः शिलाचूर्ण - शङ्खचूर्ण-सिकता-सम्पेषण-जनित-दार्ढ्यापादक-लेपोप-लिप्त- शिलामय - स्तम्भ - भित्ति-छदि-छन्नं गिरिजाचैलाञ्चलमिव

अन्तर्गूढगुहोपशोभितं आदिशेषमिव गिरीशप्रकोष्ठविराजितं, नन्दीश्वरमिव शैलाङ्गणसमुल्लासितं, देवताभोजनमिव सुधामयं, श्रीवत्सलाञ्छनमिव वनमालामध्यसमुद्भासितं, प्राचीदिङ्मुखमिव उदन्मुखसूर्याश्रितं, कर्षकगृहाङ्गणमिव महानसान्वितं, सूर्यसंसारमिव छायासन्तानबहुलं, नरसिंहावतारमिव दृढिष्ठस्तम्भालम्बं, बदरीनारायणमिव विशालोत्तमक्षेत्रप्रतिष्ठितं, दिव्यं भव्यं सुन्दरं च आश्रममन्दिरं निर्मापयामास ।

भर्म्यादि-रम्य-हर्म्यालिनिर्माण-कर्मालङ्कर्मीणाः विस्मरितविश्वकर्माणः अनल्पशिल्पकल्पनाल्पीकृतमयजक्कणादयः कुशलस्थापत्यविज्ञान-प्रज्ञाशालिनः गुरुसेवाबुद्ध्या स्वयं ससन्तोषं समागत्य सर्वविध-सौविध्य-वैविध्य-विराजितं गुर्वाश्रमं कानन-मध्य-प्रदेशे निर्ममिरे ।

श्री गुरुचरणानां एकान्ततपोनुष्ठानाय अत्युपयुक्तां यमनियमासन प्राणायाम-प्रत्याहार-ध्यान-धारण-समाध्याद्यष्टाङ्गसाधनायात्युपयुक्ततमां पर्याप्तां च एकां गुहां मन्दिरस्याधस्तादेकान्तस्थले व्यरीरचन् । उपरिष्ठाच्च पूजागृहं पाकशालां अतिथिगृहं शयनकक्ष्यां चाबबन्धुः ।

ईसवीये १९३९ तमेवर्षे आश्रमनिर्माणकर्म परिसमाप्य कङ्कणवाडी ग्राम-स्थितान् श्री शम्भुलिङ्गशिवयोगिनः तत्रागन्तुं प्रार्थयामास रामलिङ्गप्पमहोदयः ।

तस्य विज्ञापनामङ्गीकृत्य प्राज्ञपुङ्गवाः श्री शम्भुलिंगशिवाचार्याः माघशुक्लत्रयोदश्यां सुमुहूर्ते नूतनमाश्रमं सनाथयाञ्चक्रुः भक्तजन श्रेयोनिदानेन समुत्पादितरामलिङ्गप्पादिमनस्समाधानेन स्वसन्निधानेन । तत्रागत्य च स्वकीयं दैनन्दिनं तपोनुष्ठानं प्रारभन्त पार्वतीपति चित्तप्रसादासादनैकोपायभूतम् ।

॥ इति अष्टमस्तरङ्गः ॥

॥ अथ नवमस्तरङ्ग : ॥

तस्मिंश्च रुक्षारण्ये आश्रमस्थानस्य अत्युन्नत पर्वतीयप्रदेशत्वेन जलं दुर्मिळमभूदिति हुलियाळु मठस्य गुरुपादय्य मठपति मल्लय्य प्रभृतयो ग्रामीणाग्रणी-ग्राम-ग्रामणीभूताः महानुभावाः प्रतिदिनं स्वग्रामतः शकट-द्वये शुचिर्भूतजनापूरित जलपूर्णमहापात्राणि निक्षिप्य आश्रमकार्यनिर्वा-हाय सलिल प्रेषयन्ति स्म ।

एवमेतादृशं गुरुबराश्रमे सलिल दौर्लभ्यं विज्ञाय कैलासवासि वरगीमठबसवय्यस्य धर्मपत्नी वयोवृद्धा धर्मकार्यार्थं सदासिद्धा नीलम्मा नाम्नी नारीमणिः पञ्चषैः सभ्यगृहस्थैः सह सिद्धाश्रममुपसद्य श्री गुरूणां चरणसन्निधौ साष्टाङ्गप्रणाम विधाय सप्रश्रयं सम्प्रार्थितवती विज्ञा-पितवती च–

कृपाऽकूपार मे कूपं निर्मातुं सम्मतिं दिश
मामुद्धृत्यांहसां कूपात् सुधाकूपे पतिं क्षिप ॥५७२॥

कान्तार एकान्तमनोरमेऽस्मिन्
कान्तस्य मे सद्गतये च शान्त्यै
निर्माय कूपं स्वकृतं च पापं
व्यपोहितुं मेऽनुमतिः प्रदीयताम् ॥५७३॥

वस्तुर्याश्रमिधुर्याणामाश्रमे कूपनिर्मितेः
श्रमो मे सफलो भूयच्छ्रीमतामाज्ञया गुरो ॥५७४॥

इति सम्प्रार्थनां तस्या अन्वमोदन्त सज्जनाः
तया सहागताः सर्वे गुरुभक्त्याब्धिमज्जनाः ॥५७५॥

श्रुत्वा तेषां सज्जनानां नीलम्मायाश्च याचनां
क्षणं विचार्य ते प्रादु र्वाप्या निर्मितिसम्मतिम् ॥५८६॥

क्षुत्तृष्णिर्वापिकां तापलोपिकामत्र वापिकाम्
निर्मापयाशु कैलासं मे पतिं प्रापय प्रभो ॥५७७॥

पितृणां पितृलोके स्यात्सुखायात्र जलाञ्जलिः
कूपदानेन तेषां स्यात्स्वर्गे लब्धामृताञ्जलिः ॥५७९॥

गुर्वाज्ञामधिगत्यैवं नीलम्मानयनाम्बुजात्
आनन्दाश्रुजलं कूपापूरणायेव निर्ययौ ॥५८०॥

गुरुः स्वसेवां बहुभक्तिभावामङ्गीचकारेति मुमोद साध्वी
नीलाक्षिनीलाञ्जनकान्तिपूरै र्नीराजयामास गुरुं च नीला ॥५८१॥

ततः गद्गुरवः सद्गृहस्थैस्तैर्नीलाम्बया च समेत्यसर्वत्रापि पादचारेण सञ्चार्य "आश्रमोपकण्ठश्रीकण्ठेश्वरस्य देवालयस्य पुरोभागे कूपो यदि निर्मीयेत तदा शम्भोः प्रतिदिनकुंभाभिषेकादिपूजादिकार्यार्थं आश्रम–वासिनां यात्रिकाणां च स्नान-पान-वसन-प्रावन-देवालयाऽश्रमक्षालनादि नैक-व्यापार-निर्वाहाय च उपयुक्तं भवेत्तज्जलम् । अतोऽत्रैव पुरारि-पुरोभाग एव खन्यतां वितन्यतां वापी" इति समसूचयन् गुरवः ।

तेषां च यतिततिपतीनां वचनं सूचनमपि वेदवचनमेव मन्वाना नीलांबांगना तन्निर्दिष्ट एव विशिष्टस्थले वापीं खनयितुमुपाक्रमन्त । अहर्निशमगणितायासमनालोचित कायक्लेशं अगणितद्रव्यव्ययं च खन्य–माने कूपे, हन्यमाने भूगर्भे, खनित्रकुद्दालादिभिः खण्डयमानेषु धरणी-विवरान्तः प्रस्तरस्तरेषु, भिद्यमाने मृत्कवचे, छिद्यमानेषु गण्डशिलाखण्डेषु'

शतधा चूर्णविदीर्णेऽपि भूदेव्या हृदये, सहस्रधा छिन्नविछिन्नेऽपि वसुधा-वक्षस्थले नीलम्मायां मनोरथो नाऽभूत्फलेग्रहिः ।

पौनः पुन्येन विधीयमाननिशिताग्र-लोहदण्ड-प्रहार-सहस्राघाता-वमानितेव वसुमती - विवरान्तरङ्ग - स्फोटित-नैक-सुरङ्ग-शत-निर्दग्धेव खनित्र-पिटकायस-दण्डमुद्गरादि-विविध-खनन-साधन - शतनिष्ठुराघात-घातित-हृदय-व्याकुपितेव भगवती विश्वम्भरा नादर्शयत् स्वस्य आर्द्र हृदयम् । स्वधन-गोपन-निपुणेव कृपणा वसुन्धरा आत्मनो हृदयरहस्य-मिव स्वजीवनगौप्यमिव स्वरसभूतं जलं नैव व्यक्तीचकार ।

कृच्छ्रेण शैलोच्छ्रितभूमिभागं
दिवातपे सङ्खनतां जनानाम्
स्वेदाम्बुपूरोऽवयवेभ्य आसीत्
प्रवाहितो नाम्बुकणोऽपि भूमौ ॥५८२॥

सर्वेऽपि शिल्पिनो बद्धकङ्कणाः कूपनिर्मितौ
कंकणः किन्तु नो लब्धः नैराश्येऽक्षिषु कंकणाः ॥५८३॥

जले त्वलब्धे जलजायताक्षी
जज्वाल दुःखज्वलनाद् हृदन्तः
जलं मुमोचाक्षियुगाच्च नीला
मुखं शुचा नीलमभूत्तदानीम् ॥५८४॥

सा दुःखशीलाऽतिशयेन नीला
विना ह्युपायाद् गुरुमभ्युपायात्
गुरुप्रसादात्सकलार्तिनाशः
स्यादित्यसौ विश्वसिति स्म साध्वी ॥५८५

गुरोः समीपं समुपेत्य तस्य
पादारविन्दे प्रणिपत्य भक्त्या
निवेदयामास च वेदनां स्वां
नीलाक्षिनिर्यद्बहुनीरनीला ॥५८६॥

शतहस्तमिते खाते निशितैर्लोहदण्डकैः
न जातः सलिलापातः कुतो हेतोर्नु भूबिले
दीर्घपुण्यं तु सम्प्राप्तुं दीर्घिका खानिता मया
जलाभावाच्च मच्छोको दीर्घीभूतोऽधुना गुरो ॥५८७॥

अहं पापीयसी वापीजलं नावापि यन्मया
केन वाऽशापि नाशापि जललाभस्य मेऽत्र यत् ॥५८८॥

निशम्य तद्वाक्यमथो निशाम्य
तां कूपवन्नीरसभावरूक्षाम्
जगद्गुरुस्तां निजगाद मन्दं
दयाम्बुपूरैः स्नपयन्निवैनाम् ॥५८९॥

शिलामयो हि शैलोऽयमत्युच्चे दुर्लभं जलम्
सिकतायां यथा तैलं पाषाणे च पयस्तथा ॥५९०॥

त्वया तु न मनागत्र कदापि विमनायताम्
न स्वार्थं खानितः कूपो न ते दोषो न चेज्जलम् ॥५९१॥

यद्यप्यत्रैव खल्वस्ति पल्वलो निकषाश्रमम्
न श्रमो न स्ततो नीरमाहर्तुं स्नानपानयोः ॥५९२॥

परं तु पशवो गावः पुङ्गवाः सैरिभादयः
स्नान्ति पान्ति जलं हन्त क्रीडन्ति मलिनं ततः ॥५९३॥

यदि ते तु निवार्यन्ते वेशन्ते वारि निर्मलम्
दुर्मिलं न भवेदेव परं तत्कर्म नेष्यते ॥५९५॥

सर्वेषां प्राणिनां स्नानपानाद्यर्थे हि तप्यताम्
स्वच्छन्दाम्बुविहारार्थं चेशेनेतत्सरः कृतम् ॥५१६॥

वार्येतद् यदि वार्येत पशूनां स्नानपानयोः
कष्टं पशुपती रुष्टो कष्टं वारयितुर्दिशेत् ॥५९७॥

तदर्थं च मया वापी कापि निर्मीयतामिति
आदिष्टं किंतु किं दिष्टं जानीते केवलं शिवः ॥ ५९८॥

मधुवन्मधुरं नीरमधुना यदि लभ्यते
पशूनां पुरुषाणां च सर्वेषां प्राणिनां हितम् ॥५९९॥

क्वापि देशे तु हृद्देशे सूद्देशेन सती कृतिः
क्रियते यदि निस्वार्थैस्तां नेशः कुरुते वृथा ॥६००॥

मा खिन्तां कुरु मा चिन्तां हन्त सन्तापकारिणीम्
निशान्ते भज विश्रान्ति हरः शं तनुते ध्रुवम् ॥६०१॥

विश्वस्येशं तु विश्वस्य यत्नः कार्यो नरैः सदा
फलं वापीजलं वापि हरेच्छाधीनमेवहि ॥६०२॥

शङ्करः किङ्कराणां वः सर्वदापि प्रियङ्करः
सेवेति त्वं कुरुष्वैतद् दास्यत्येव फलं प्रभुः ॥६०३॥

गङ्गौघं शिरसा बिभ्रन मनसा दयते यदि
कूपे ह्यापातयेदापः किंप्रभुः किं प्रभुर्हरः ॥६०४॥

शङ्करः शं करोत्येव शङ्कातङ्को न ते भवेत्
त्वं कूपं खानयाम्भस्ते भक्तिरानयतीश्वरे ॥६०५॥

हरे गुरौ पापहरे यदि स्याच्चित्तं तवार्द्रं बहुभक्तियोगात्
तयोः प्रसादादचिराज्जलार्द्रं नूनं भवेत् कूपतलं हि शुष्कम् ॥६०६॥

एवं दीनदीनां मनोवैक्लव्यदूनां शोकोच्छूननयनां स्वकीयमेव मन्दभाग्यं निन्दन्तीं कुररीमिव क्रन्दन्तीं नीलम्मां शान्तवचनैः सान्त्वयति शान्तिसागरे दान्त्यागरे सदायान्तरङ्गे यतिपुङ्गवे कोऽपि कूपकर्मकारी भृत्यः सरभसमुपेत्य नीलम्मां प्रत्यवोचत् ।

मातः श्रीमत्या आपातालं खानितस्य खलु कूपस्य पश्चिमभागे सहसा रत्नगर्भान्तर्भागं निर्भिद्य शारदाभ्रशुभ्रः प्रादुर्भवति सलिलप्रवाह शर्करामधुर इति ।

श्रुत्वा जलोद्गमं नीलादेहे रोमोद्गमोऽह्यभूत्
शोकाम्भः पर्यणंसीच्च हर्षाश्रुत्वेन नेत्रयोः ॥६०७॥

शैलगर्भे शिलामध्ये जलाप्तिं तत्तपोबलात्
प्राशंसीत्तद्वचः सत्यं प्राणंसीच्च गुरोःपदे ॥६०८॥

हन्त नोऽत्यन्तसन्तोषो जलाप्त्याऽभूत्तथापि च
सर्वं शर्ववशं चेति मुमुदे सा गुरोर्गिरा ॥६०९॥

अद्यापि दृश्यते तत्र कूपपार्श्वस्थिताश्मनि
नीलम्माया नामधेयमुत्कीर्णं भाति शाश्वतम् ॥६१०॥

जलाशयस्य निर्मित्या नीलम्माविषये पुनः
सदाशयो निर्मितोऽभूद् हरस्य हृदयान्तरे ॥६११॥

एवं श्री शंभुलिङ्गशिवाचार्याणां साधुजनशरण्यानां योगिवरेण्यानां पुण्याश्रमस्य परसरारण्य जलसौकर्यं जनसञ्चारं च दृष्ट्वा निर्भयाः समीपग्रामवासिनः ग्रामीणाः गोपालाः तत्र प्रवृद्ध-सुविपुलतृणछेदनाय गोमहिषचारणाय च प्रतिदिनमागन्तुमुपाक्रमन्त ।

बहव एव च काष्ठविक्रेतारः प्रतिबासरं समागत्य क्रकचपरश्वादिभिः अम्बरचुंबिनोऽपि सहस्राधिकान् वृक्षान् छित्वा भित्वा च सुन्दर-मठ - मन्दिर - मन्दुरा - सिन्धुरावाससेतु - न्यायालय-राजभवन-रङ्कभवन-शालापण-यन्त्रागारादि-निर्माण-कर्मात्युपयुक्तान् द्राघिष्ठान् स्नानपाकादि गृहकार्योपयुक्तांश्च क्षोदिष्ठान् भूयिष्ठान् काष्ठान् उद्धृत्य शकटादिष्वारोप्य शिरस्सु सन्धार्य च नयन्ति स्म सङ्घश एव जनाः ।

एवं क्रमेण छिन्नेषु निबिडतरतरुस्तोमेषु, लूनासु लतासु, कार्तितेषु गुल्मेषु, मृगयालुब्धैर्व्यापादितेषु श्वापदेषु, घातितेषु मृगेषु, पातितेषु गव्हरेषु, बहुलीभवति जनसञ्चारे, दूरीभूतायां दुर्गमतायां, जनपादपातक्षुण्णेषु वनप्रान्तेषु, तिरोहितायामेकान्तरम्यतायां, अधिकाधिके च जनसम्मर्दे श्री गुरुवरेण्यानां तपोनुष्ठानाय माभूदातङ्क इति विचार्य श्री हरगुरु भक्तियुक्तः चिक्कोडिरामलिङ्गप्पमहोदयः आश्रमं परितः विंशति हस्तोच्छ्रितं प्राकारं निरमापयत् ।

तस्मिंश्च पुण्याश्रमे श्री शंभुलिङ्गशिवाचार्यस्वामिपादाः ईसवीय १९४० तमवत्सरादारभ्य १९५२ तम बर्ष पर्यन्तं द्वादशवात्सरिकं सुदीर्घं तपः आतिष्ठन्त कष्टकरं निर्विघ्नतया ।

गुरुर्द्वादशवर्षाणि सुदीर्घमतपत्तपः
नामानुगुण्यमाप्येव गुरुभूतं तपोऽपि च ॥६१२॥

न स्वर्गं नापवर्गं वा न चान्यद्भौतिकं सुखम्
तपःफलमियेषासौ किन्तूमाकान्तसत्कृपाम् ॥६१३॥

तत्तपोऽत्यद्भुतं दृष्ट्वा विस्मयस्तिमिताःसमे
मुनयो मौनितां त्यक्त्वा संस्तुतिध्वनयोऽभवन् ॥६१४॥

न जघास न सुष्वाप न जहास जगाद च
देहयात्रार्थतोऽन्यत्र न किंचिदपि सोऽचरत् ॥६१५॥

तपसादौ महर्षित्वं देवर्षित्वं ततोऽध्यगात्
ब्रह्मर्षित्वं ततश्चान्ते ब्रह्मिष्ठत्वं क्रमाद्ययौ ॥६१६॥

निरपेक्षास्तपस्यन्ति मुनयो मोक्षकांक्षिणः
तदप्युपेक्ष्य तप्यन्तं त्र्यक्षः स्वयमपैक्षत ॥६१७॥

विरूपाक्षकृपाकांक्षी तत्कटाक्षेक्षितोऽभवत्
तेन तद्ब्रह्मतेजोऽपि ववृधेऽत्यधिकाधिकम् ॥६१८॥

शिवपादप्रपन्नोऽसौ सम्पन्नोऽध्यात्मतेजसा
शरीरेण परं क्षीणः शिवमौलीन्दुवद्बभौ ॥६१९॥

विरक्तोऽपायमितीवास्य देहे रक्तं स्म शुष्यति
ब्रह्म मीमांसमानस्य देहो मांसलतां जहौ ॥६२०॥

तपस्यस्थिगतप्राणैर्गजचर्माम्बरं चिरम्
स यद्दध्यौ शरीरेऽस्य तच्चैर्मवास्थिसुस्थिरम् ॥६२१॥

वपुषा कृशोऽपि महसा महीयसा
तपसाभिवृद्धविपुलात्मवर्चसा
स च भूयसा महितदैवतेजसा
रुरुचे कृशानुरुचि रम्यरोचिषा ॥६२२॥

गुरुणा गुरुस्स उरुणा समाधिना
तपसा व्रतैश्च बहुधा कृतैःशुभैः
कृशतामुपेत्य भृशमात्मनस्तनोः
तनु नाम सार्थमतनोत्तनुत्वतः ॥६२३॥

तप-उपोषण-पेषण-भीषणा-
तप-विशोषण-कर्शित-योगिराट्
अमर-तक्षक-शातित-मण्डला-
म्बर-मणी-रमणीय-तनुर्बभौ ॥६२४॥

तन्वास्तनीयसः शम्भोर्दिव्यदीप्त्या महीयसः
नेत्रकञ्जे कान्तिपुञ्जो नूनं केन्द्रीकृतो बभौ ॥६२५॥

स सुरैरमृताशया हृते सकले सौधकलाकलापके
शिरसा गिरिशादृतः कृशस्तपसेवात्र बभौ शशी वशी ॥६२६॥

तत्तस्य तपसः कार्श्यं दर्शयत्साक्षि चाक्षुषम्
तदस्थिपञ्जराकारचित्रमद्यास्ति चाश्रमे ॥६२७॥

एवमतिनिष्ठुरतर - कष्टकर-तपोनुष्ठानसमापादितं तानवं नव तानवं, अतिमानमङ्गाङ्गकृशिमानं च अभिलक्ष्य त्र्यक्षैकबद्धलक्ष्यः प्रेक्षाभरप्रतिक्षिप्तसहस्राक्षगुरुः नियमिताक्षः तपोदक्षः विलक्षणप्रतिभा-प्रागल्भ्योपलक्षितः श्री शंभुलिङ्गशिवाचार्यसुधीशेखरः योगीश्वरो "नश्वरमेवेदं पाञ्चभौतिकं शरीरं कदेदं विनंक्ष्यतीति को वेद।

अतः स्वजीवितावधावेव नः मरणोत्तरसमाधेरत्रैव भूगर्भमठ व्यवस्था कार्येति" सङ्कल्पयामास।

तदेतेषां सङ्कल्पं कथमपि विज्ञाय श्री रामलिङ्गप्पमहोदयः सरभसमुपसृत्य व्यजिज्ञिपत्प्राज्ञपरिवृढान् गुरुवरान् ।

अयि पूज्यतमाः पञ्चाचार्यसमाः समाजोद्धारबद्धकङ्कणाः गुरूत्तमा भवादृशां, मरणोत्तरकालीनसमाधिनिर्माणाय कुतो वा ईदृशी अतित्वरा ?

युष्मादृशां विभूतिपुरुषाणामवताराः न स्वार्थ प्रयोजनकाः किन्तु परोपकारार्था एव ।

यावत्कालमस्मिन् प्रपञ्चे जीवन्ति अत्रभवन्तो भवन्तो, भवादृशः असदृशो वा दिव्यदृशः, तावत्कालं मादृशाः सुखं जीवामः, निश्चिन्तं कालं यापयामः वीतसांसारिकचिन्तासन्तापाः । अस्माकमायुषोऽर्धभागं सानन्दं वितरिष्यामः श्रीचरणानामायुरारोग्याद्यभिवृध्यर्थं यद्युपयुक्तं स्यात् ।

परं समासादित मृत्युञ्जयप्रसादानां श्रीश्रीमत्तां न कस्याप्यायुषः प्रदानस्य आवश्यकता । स्वयं अल्पायुषां दीर्घायुर्दाने, रोगिष्ठानां चारोग्य दाने क्षमाणां क्षमाभूषणानां क्षमाक्षेमधानबद्धदीक्षाणां भवादृक्षाणां सविधेपि न सञ्चरति मृत्युः ।

तथापि नूनमिच्छामरणिनां भीष्मादीनां पंक्तिमपि पावयन्तो भवन्तो यदि इदानीमेव निर्मिमित्सन्ति समाधिं तन्नात्र मृण्मयं भूगर्भान्तर्भागे भवितुमर्हति ।

यद्यनुजानन्ति श्रीमन्तः तदाहमेव मसृणशिलाफलकैः सदृशं भवादृशां चिरसमाधियोगानुष्ठानस्य, उचितं त्वादृशदिव्यदेहसमवस्थानस्य योग्यं योग्युत्तमानां कलेवरस्य शाश्वतप्रतिष्ठानस्य, उपयुक्ततरं चिरकालं भक्तजनाराधनाय, अनुकूलं साक्षाच्छिवशक्त्यवतरणाय, सुकरं पञ्चाचार्यादिपुरातनमहापुरुषाणां तेजःप्रकर्षसङ्क्रमणाय, सुगमं

गणाधीशसन्निधानविशेषोपयानस्य, पर्याप्तं प्रतिदिनसमुपचीयमान-तपस्तेजःपुञ्जपिञ्जरीभवनाय कमपि दिव्यं नव्यं विविक्तं रम्यं भक्तैक-गम्यं च समाधिं तत्स्थानं च निर्मापयितुमभिलषामि।

अनुजानन्तु गुरवः। अनुगृह्णन्तु भक्तपरमाणुमेनम्। सार्थयन्तु मदी-यामिमामियदवधि विहितां विधीयमानां विधास्यमानां च सेवाम्।

अन्यामपि अस्य अज्ञस्य भवद्भक्तस्य प्रार्थनां शृण्वन्तु सनिर्बन्धां साञ्जलिबद्धां च।

मया तावत् पूर्वमेव ज्ञातं प्रतिपादितं च यच्छ्रीमन्त इच्छामरणिन इति। यदि शतवर्षावधिः सुदूर एव स्थाप्यते मृत्युः, नियम्यते कालः नियन्त्र्यते विधिः, यदि चाश्वास्यतेऽयं जनः शतं वर्षाण्यावन्नान्तर्धीयते मनुष्यलोकतः, न समाप्यते चावतारकार्यमधुनैवेति, यदि नोपसंह्रियते मादृश-पामरजनोद्धारव्यापारः, शतसंवत्सरं एवमेव भक्तभावुकजनप्रत्यक्षगोचर शम्भुलिङ्गशिवाचार्यस्वरूपेणैव साक्षाच्चिरमत्रैव पामरानुग्राहकेण अवस्थानमस्मच्चक्षुषोः पुरत एव प्रतिज्ञायेत श्री श्रीचरणैः तदा सानन्दं सोत्साहं च निर्मिमित्से भवत्समाधिमण्डपम्।

इमां च मदीयामिच्छां याचनां सूचनामभ्यर्थनां सम्प्रार्थनां विज्ञा-पनामनुरोधमाग्रहं चानुमत्य अस्माकं सर्वेषामपि सद्भक्तजनानामुपरि कार्यो निरवग्रहोऽनुग्रह इति।

तदीयामिमां दीनदीनां सर्वशिष्याशयप्रतिनिधिभूतां प्रार्थनामन्व-मन्यन्त दयासिन्धवः शिष्यवत्सलाः गुरुवरेण्याः।

एवमङ्गीकुर्वाणेषु योगिगणगीर्वाणेषु तन्निर्वाणस्थानं श्री चिक्कोडी रामलिङ्गप्पमहोदयः नैकसहस्ररूप्यकाणि व्ययीकृत्य तदिच्छानुगुणमेव अच्छाच्छं स्वच्छावदातं समाधिस्थानं मरणोत्तरचिरन्तनसन्निधानोचितं च विरचयामास।

तदनन्तरं स एव वदान्यतावधीरितकर्णः दानौदार्यह्रेपितबलिराजः श्री रामलिङ्गप्पमहोदयः श्री गुरुचरणानामाश्रमस्य महाद्वारमुभयतः पार्श्वयोः यतिततिपतीनां श्री शिवाचार्याणां सन्दर्शनार्थमागच्छतामभ्यागमिष्यतां च भक्तानां निवासवास्तव्यसौविध्याय अतिथिशालागृहाणि आबबंध।

एवं स्वसम्पादितद्रव्यस्य अर्धभागं गुरुपादसेवार्थमेव उपयुञ्जानः श्री रामलिङ्गप्पदानी अर्धाधिकलक्षपरिमितं धनं श्री सद्गुरुप्रवराणां पुण्याश्रमविविधागारनिर्माणकर्मण्येव विनियुज्य सार्थकमकरोत्स्वकीयां सम्पदम्। सफलयामास जन्म। धन्यं चकार जीवितम्। मान्यमतानीत्सर्वमपि स्वीयमायुः। गुरुसेवया गौरवभाजनतामनीनयदात्मानम्।

परमोत्कर्षसीमानमुपस्पृशन्त्या गुरुभक्त्या चिक्कोडीरामलिङ्गप्पमहोदयेन तस्मिन् कान्तारप्रान्तविनिर्मापिते भव्ये दिव्ये सन्ततगुरुवास्तव्य स्तव्येनव्ये चाश्रमपदे जपतपोध्यानगानपाठप्रवचनोपदेशोपन्यासलोकोद्धारादिपुण्यकर्माणि कुर्वाणाश्चिरमवात्सुः श्री शम्भुलिङ्गशिवयोगिनः।

आश्रमान्नातिदविष्ठमुधोळनगरीनागरिकाः कदाचित् गुरुपादमूलमागत्य गुरूपदेशदानेन च अनुगृह्णन्तु अस्मान् मुधोळपुरीवासिनः भक्तभावुकजनानिति प्रार्थयन्त।

विज्ञाय तेषामज्ञानां सुज्ञानां च समेषां जिज्ञासां, अनुज्ञाय ज्ञानकार्यम भिज्ञशिखामणयः श्री शम्भुलिङ्गशिवाचार्यमहोदयाः घटप्रभाख्यतटिनीतट विराजद्वटकुटजपाटलचिञ्चादिनैकविटपिपटलमनोहरं नैकश्रोत्रियपापठ्यमानवेदपाठमन्त्रजुघोषमुखरितं मुधोळं नाम नातिविस्तृतं नातिसङ्कुचितं संस्थानिकराजधानतया विशदविशालवीथीविपणिविराजितं नगरमुपाजग्मुः।

तत्र च प्रतिदिनं श्री शिवाचार्यसुधीवर्याणां विहितशास्त्रार्थ-प्रकाशाः साधितसामान्यजनज्ञानविकासाः श्रोत्रसंशयविपर्ययव्युदासाः निर्गच्छत्स्वर्गङ्गाप्रवाहवन्निरर्गलनिर्गलद्वाग्विलासाः प्रावर्तन्त शास्त्रोपन्यासा ।

मुधोळगमहालोका मुहुर्मुमुदिरे तदा
महनीयगुरोः श्रुत्वा मननीयं हि भाषणम् ॥६२८॥

तेषां च देवतातन्त्रमिव धिषणातिकौशल्यप्रत्यायकं सागरमिव गभीराशयं, कुबेरकोशमिव विपुलार्थसम्पन्नं, शङ्करजटाजूटमिव निर्जरनिर्झरिणीवीचीकोलाहलनीचीकरणक्षमं, हनुमद्व्यापारमिव सुरसाभिनन्दनीयं, इन्द्रचापमिव रञ्जनीयवर्णमनोहरं, सीताचरितमिव कुशलवादिप्रमोददं, नरसिंहावतारमिव नखरप्रयोगबहुलं, प्रह्लादोल्लासकारकं च श्री शम्भुलिङ्गशिवयोगीश्वराणां अमन्दमकरन्दबिन्दुसन्दोहनिष्यन्दि । पाखण्डिनास्तिकादिवादिकुयुक्तिखण्डनभीषणं सनातनसद्धर्मपोषणं रामचरितवन्निरस्तदूषणं राकानिशाकरज्योत्स्नाजालवत्समस्तमानवमानसतोषणं वीरशैवमतसर्वोत्कृष्ट्यसमुद्घोषणं नवनवप्रमेयोन्मेषणं दूरीकृतधर्मदेवद्वेषणं दिव्यवाग्भूषणं बोधितनिगमागमसन्देशं गुरूपदेशं च श्रुत्वा ब्रह्मानन्दसगन्धं मन्देतरमेवानन्दमन्वविन्दत ब्रह्मवृन्दम् ।

वित्रासितशत्रवः नितरामप्रीयन्त क्षत्रियाः ।

गुरुमूर्तिदर्शनानन्दविकसितास्याः गुरुमुखावगतवेदवेदान्तस्वारस्याः हृद्यन्तः समतुष्यन्त वैश्याः ।

विद्रावितान्ज्ञानोन्निद्राः श्रवणकालावलम्बितमनसमाधिसममुद्राः सर्वेऽपि शूद्राः ज्ञानसमुद्रायमाणस्य गुरुपुङ्गवस्य प्रवचनभारतीरसपानेन आनन्दसमुद्र इव न्यमज्जन्त ।

किमधिकं वक्तव्यं विशिष्य तच्छिष्याणां समुल्लासितदैवानां विहितहरगुरुसेवानां समुद्रिच्यमानगौरवभक्तिभावानां वीरशैवानां च विषये ।

सकलसुरसञ्चयाञ्चिताः श्री पञ्चाचार्या एव समस्तपञ्चजनोद्धरणाय पुनः प्रपञ्चमवतीर्य श्री शिवाचार्यसुधीवर्यरूपेण प्रपञ्चयन्ति परमार्थतत्वानीति धिया सभक्त्युन्मेषं समसेवन्त श्री गुरुपुङ्गवान्, श्रद्धया च श्रुण्वन्ति स्म तदीयानि प्रवचनानि सर्वजातीयाः सर्वधर्मीयाः सर्व प्रान्तीयाः सर्व भाषीयाश्च सहृदयाः साधुजनाः सममेव ।

ईसवीये १९४० तमे वर्षे एवं मुधोळनगरे गुरुलिङ्गय्य होसमठमहोदयानां भवनस्य विशालतरप्राङ्गणे प्रवर्तमानेषु उपन्यासेषु, निरर्गलं निस्सरन्त्या गुरुवरप्रवचनभारत्या विव्रियमाणेषु शास्त्रेषु, विशदीक्रियमाणेषु प्रमेयेषु, दूरीक्रियमाणेषु श्रावकसंशयेषु, छिद्यमानेषु हृदयग्रन्थिषु, भिद्यमानेषु विपर्ययेषु, आविष्क्रियमाणेषु तात्विकरहस्येषु, समाधीयमानेषु चिरादनुत्तरितवेदान्तिकजटिलप्रश्नेषु प्रवहन्त्यां च प्राज्ञपुङ्गव श्री शम्भुलिङ्गशिवाचार्य वाग्गङ्गायां, न केवलं मुधोळनागरिकाः किंतु तत्प्रान्तपरिसरवर्तिनः परःसहस्रा एव भक्तभावुक जिज्ञासुश्रावकाः समागत्य अस्मिन् ज्ञानतीर्थे समवगाह्य कृतार्थाः समधिगतपुरुषार्था इवामोदन्तात्यर्थमेव सार्थकं चामन्यन्त स्वीयं जन्म ।

एवं प्रतिदिनं शुश्रूषया गुरूपदेशस्य, जिज्ञासया तत्त्वानां, बुभुत्सया पारमार्थिकविषयाणां, विवित्सया वेदान्तसौरस्यस्य, अवजिगमिषया आध्यात्मिकरहस्यस्य, आगत्याऽप्रमादेन उपविश्य, भक्त्यतिशयेन संश्रुत्य श्रद्धाजाड्येन विज्ञाय विषयान् यथार्थ्येन कृतार्थीभवत्सु शताधिकेषु जनेषु मुळली ग्रामस्थः बेळगलीत्युपाव्हः श्री बसवलिङ्गप्पमहोदयोऽपि अन्यतमः धन्यतमश्चासीत् ।

स च जात्या सज्जनः प्रकृत्या गुरुभक्तः स्वभावत एव आस्तिकः जन्मनैव हरगुरुनिष्ठः प्रवृत्यैव श्रद्धालुः ऐरावत इव करोद्यद्दानप्रवाहः

राजोरःप्रदेश इव हारभक्त्यालङ्कृतः, यक्षलोक इव सदा वैश्रवणादरः सुरवर्ग इव प्रसादितगुरुः परमेश्वर इव समासादितसर्वमङ्गळः गङ्गौघ इव भगीरथसरणिप्रवृत्तः भगवान् विष्णुरिव लक्ष्मीस्वयंवृतः अश्वत्थामा इव कृपानुगतः श्री कृष्ण इव सत्यान्वितः भीमसेन इव धर्मादेशप्रतिपालकः सद्ग्रहस्थः श्री शम्भुलिङ्गशिवयोगिनां सरस-मधुर-सुन्दर-बन्धुर-वचन-रचनोपन्यास-भारती-सुधारसं पायं पायं तेषां च सदनुभाव प्रभावाविर्भावान् तदा तदा दर्शं दर्शं सुतरां हृतहृदयः नितरामावर्जितात्मा क्रियासमभिहारेण तदुपदेशानांश्रवणलुब्धः तत्सन्दर्शनमुग्धः श्री गुरुलिङ्गय्य महोदयैस्सह गुरूणामाश्रमं प्रति आगच्छति स्म।

पौनः पुन्येन योगाश्रममागत्य गुरूपदेशं संश्रुत्य प्रत्यक्षमेव प्रतिदिनं गुरूत्तमैर्विधीयमानलिङ्गपूजादिविधानं जपतपोनुष्ठानादिकं च निरीक्ष्य बद्धश्रद्धो गुरुपादनिष्ठो महिमाकृष्टश्च भूत्वा श्री गुरुचरणानामेकान्त भक्तो बभव ।

बागलकोटनगरं चिरादेव संस्कृतशास्त्रपाण्डित्यस्य केन्द्रायमाणं सुप्रसिद्धमेव वरीवर्ति । तन्नगरप्रमुखाः बशेट्टप्पप्रभृतयः अन्ये च गण्यनागरिकाः पुण्यपुरुषाणां विद्वद्वरेण्यानां श्री शम्भुलिङ्गशिवाचार्याणां गैर्वाण्यां वाण्यां अन्यान्येषु च शास्त्रेषु प्रावीण्यं प्रवचने च नैपुण्य अवगत्य संश्रुत्य आदृत्य गुरुपादमूलमुपसृत्य साष्टाङ्ग प्रणिपत्य तत्पादपांसु शिरसा सन्धार्य अञ्जलिमाबध्य भक्तिपुरस्सरं प्रार्थयन्त ।

"अयि पूज्यतमाः विद्वद्वृन्द-वृन्दारक-वन्दनीय-पदारविन्द-द्वन्द्वाः कर्मन्दि-सन्दोह-पुरन्दराः योगिवृन्देन्दीवर-चन्द्रमसः मन्देतर-तपो-नन्दित चन्द्रशेखराः मुनिशेखराः शिवाचार्यस्वामिनः ! बागलकोटिवासिनः सर्वेऽपि पौराः श्रीचरणानां शास्त्रीयप्रवचनं श्रोतुं आध्यात्मिकतत्व-रहस्यं चावगन्तुमतितरामुत्सहन्ते, नितरामुत्सुकन्ते च। अतः कृपया समागत्य पञ्चदशदिनानि यावद् तत्रोषित्वा उपदेशामृतपानेन पावयन्तु नः इति"

तेषां सादरं सभक्त्यतिशयं च प्रवचनोपनिमन्त्रणमङ्गीकृत्य श्रीचरणाः ईसवीये १९५३ तमे वत्सरे बागलकोटनगरीमुपेत्य वीरशैव-सिद्धान्तप्रवेश इति विषयमधिकृत्य व्याख्यानमालां प्रावर्तयन्त ।

श्री श्री शम्भुलिङ्गशिवाचार्यमहास्वामिनां सरससुन्दरं भावबन्धुरं वैरस्यविधुरं शास्त्रसर्वंकषं निगमागमकूलंकषं सुश्राव्यं पण्डितानां. मनोरञ्जकं पामराणां, मार्गदर्शकं महिळामणीनां, बोधप्रदं ब्राह्मणानां, स्फूर्तिदायकं वीरशैवानां, दृगुन्मीलकं विद्यार्थिनां, श्रद्धेयं विद्योपजीविनां, तृप्तिदायकं तत्वबुभुत्सूनां, परनिर्वृतिप्रापकं रसिकानां, समाधायकं वैज्ञानिकयक्षप्रश्नानां, उद्घाटकं ज्ञानभाण्डारस्य, पारदर्शकं सारस्वतमहोदधेः, गौप्यस्फोटकं अध्यात्मरहस्याणां, अनावरणमहोत्सवं वैदिकवाङ्मयगूढार्थानां, मर्मोद्घाटकं वचनशास्त्रप्रमेयाणां. प्रत्यादेशं नास्तिकविचाराणां, समञ्जससमाधानं भौतवादसमस्यानां, समुचितोत्तरं पाखण्डिपूर्वपक्षाणां, समन्वयमार्गदर्शकं सर्वधर्माणां, दिक्सूचकं वर्णसामरस्यस्य पथप्रदर्शकं जातिबान्धव्यस्य, निवारणकारणं मिथोमतवैषम्यस्य, परिहारसूत्रं पारस्परिकमतिवैमनस्यस्य, सुवर्णसेतुभूतं सर्वजातीयस्नेहसागरस्य, अमन्दानन्दसन्दायकं अध्यापकानां, ब्रह्मानन्ददं तत्वजिज्ञासूनां, आल्हादकं श्रोतृसामान्यस्य, आप्यायकमज्ञजनानां, अत्यादराकर्ण्यं प्राज्ञपुङ्गवानां, विषयविशेषोपधायकं विमर्शकानां, संशयछेदकं विचिकित्सकानां, सद्योविभेदकं हृदयग्रन्थीनां, मोदकं आविपालगोपालस्त्रीशूद्रद्विजबन्धूनां, विविधविषयप्रतिपादकं विश्वजनबोधक, दिव्यतत्वसाधक, परमेश्वरपारम्यनिवेदकं, . वीरशैवमतवैशिष्ट्योपपादकं, च प्रवचनं सर्वजनाकर्षकं प्राचलत् पञ्चदशदिनानि यावत् ।

तत्रत्य बसवेश्वरकलाशालायाः प्राचार्याः इङ्ग्लण्डविश्वविद्यालयोपलब्ध 'डाक्टर'पदविभूषिताः स्वयं वीरशैवसिद्धान्ताऽध्ययनलब्धागाधवैदग्ध्यप्रसिद्धाः डा. सि. च. नन्दीमठमहोदया अन्ये च वैदुष्यधन्या मान्याश्च भूयांस एव विद्वांसः प्रतिदिनं प्रवचनोपन्यासवाङ्मुखं श्रीचर-

णानां संश्रुत्य संगृह्य, विलिख्य तद्भ्रापणगतविषयान् यथाशक्ति कोडीकृत्य सारोद्धारं विधाय च ग्रन्थरूपेण प्रकटीचक्रुरित्यतद्विदितमेव सर्वेषामपि विदितवेदितव्यानाम् ।

मुधोळविभागस्य जम्बगीग्रामवासी पूजारीत्युपाव्हो हनुमन्तप्पसूनुः गोविन्दड्रेडीनामक गृहस्थः अनगवाडी ग्रामे शालाशिक्षकः आसीत् ।

एकस्मिन दिने कुळळूरग्रामगा रेवय्यस्वामिनामानः सुपरिचितपरमार्थसीमानः अनुभावभूमानः दिव्यधामानः महामहिमानः सत्पुरुषाः सञ्चारक्रमेण घटप्रभातटिनीतटनिकटेसमाटिकमानमनगवाडीति प्रथितं ग्राममुपाजग्मुः ।

तत्र देवतापुरुष इव विद्याधरपक्षपाती, कच इव समुपासितकविः शीतकर इव बुधसन्तत्यनुरागी, हिमालय इव क्षमाधारः, चाप इव गुणाश्रयः भाग्यवानिव गुरुबलोपपन्नः, न्यायाधीश इव शिक्षादानोद्यतः, वेदान्तसमय इव शश्वदक्षरोपदेशकः, विष्णुः इव सदा विनीतः, चतुर्मुख इव विहितसरस्वत्युपासनः, समासेवितसाधुसज्जनः गुरुजनकारुण्यतीर्थकृतमज्जनः मित्रीकृतनैकविद्वज्जनः गोविन्दरेड्डीति शुभाभिधानः कोऽपि सुप्रसिद्धः शिक्षको निवसतीति श्रुत्वा कर्णाकर्णिकया तदधिष्ठितां प्राथमिकशालामेव तमन्विष्यन्तः समाययुस्ते सत्पुरुषाः ।

तान् सत्पुरुषान् दृष्टवैव गोविन्दरेड्डी शिक्षकः सादरं प्रणम्य सानन्दमभिनन्द्य सभक्तिभरमभिवन्द्य च स्वगृहमानयत् । न्यवेदयदर्घ्यम् । उपनयत्पाद्यं । प्रायच्छदासनम् । उपानयत्फलानि । समर्पयत् सशर्करं पयः । पर्यपूजयत सश्रद्धम् । उपाचरत्सगौरवम् । अग्राहयदातिथ्यम् ।

तदीयेन पुण्योदर्कतया व्यपगतवैतथ्येन सादरातिथ्येन सप्रश्रयव्याहरेण सातिशयोपचारेण च प्रीताः प्रसन्नाश्च ते शुभपुषः दुरितमुष-

सिद्धिजुषः शश्वतविकीर्णकरुणांबुविप्रुषः सूर्यात्विषः नास्तिक्यद्विषः सर्वजन-
प्रयुक्तशुभाशिषः दूरीकृतकामक्रोधाशीविषा उत्पाटितविषयवासनाशिषः
अपरुषाः अ-परुषाः सत्पुरुषाः गोविन्दं मोचामधुमुचा वाचा दयारसवी-
चीसध्रीचीनयाऽतिसमीचीनया प्रावोचन् ।

प्रिय गोविन्द गोविन्दकृपया श्रेय आप्नुहि
आनन्दमनुविन्द त्वममन्दं जीवितावधौ ॥६२९॥

मत्सेवा न क्वचित्स्यात्ते वत्स व्यर्था परं परम्
गार्हस्थ्यस्वास्थ्यसौभाग्यं तत्स्थिरं लप्स्यसेऽचिरात् ॥६३०॥

सत्सङ्गः पापसङ्घानां भङ्गदो मङ्गलप्रदः
विनागण्यं महापुण्यं न च सञ्जायटीत्यहो ॥६३१॥

महता सुकृतेनैव पूर्वजन्मकृतेन च
भवता भवतापच्छित्सत्सङ्गः प्राप्स्यतेऽञ्जसा ॥६३२॥

तपस्यया महीयांसो गरीयांसो गुरुत्वतः
विद्यया च वरीयांसो विद्वांसस्तेऽभयप्रदाः ॥६३३॥

वशिष्ठाश्च महिष्ठाश्च ज्येष्ठाःश्रेष्ठंशयोगिनः
साधिष्ठाश्च वरिष्ठाःस्युर्ब्रह्मिष्ठा गुरवस्तव ॥६३४॥

दासीकृतेन्द्रियग्रामा वशीकृतमनोऽमलाः
ते कोशीकृतकामाश्च काशीकृतनिजाश्रमाः ॥६३५॥

गोत्रां सगोत्रान् परगोत्रजांश्च
स्वगात्रसंस्पृष्टमथान्यगोत्रम्
पवित्रयन्तो भवितार ईदृग्-
गुणैकपात्रं गुरुमूर्तयस्ते ॥६३६॥

महेश्वराऽनश्वरसुप्रसाद-
प्रासादभूसत्पुरुषोत्तमानाम्
आश्वाशिषां राशिभिरेव रेड्डी
चाश्वासितो निर्वृतमानसोऽभूत् ।६३७॥

ततः कतिपयैरेव अहोभिः पूजारीत्युपनामा स गोविन्दरेड्डी-महोदयः अनगवाडीग्रामतः जमखण्डीसमीपस्थं हूलियाळुग्रामं प्रति शालेयाधिकारिभिः स्थानान्तरित आजगाम ।

तत्र च हुलियाळुग्रामाटिकायां प्राथमिकशालाशिक्षककार्यं अति-दक्षतया व्यपगतौदास्येन महतोत्साहेन निर्वहति स्म पूजारीत्युपाव्हो गोविन्दरेड्डिरयम् ।

वज्रमट्टि होळबसवय्यशुभनामधेयाः शिवानुग्रहबृहद्भागधेयाः महोदयाः शालाध्यापकाः गोविन्दशिक्षकस्य स्वत एव आस्तिकस्य जन्मप्रभृति जगदीशशिवभक्तस्य मनसि समुत्पन्नं धर्मश्रद्धांकुरं स्वोपदेशसारासारैः पल्लवितं पुष्पितं च चक्रुः ।

स्वसजातीयोद्योगमपि योग इति बुद्ध्या, शिक्षणमपि शिवाज्ञादक्ष-रक्षणमिति धिया, पाठबोधनमपि आत्मोद्धारसाधनमिति विचारेण, बालोपदेशमपि देवादेश इति कर्तव्यप्रज्ञया कुर्वाणानां स्वभावसन्तुलित गीर्वाणानां तेषां सहवास-सहाध्यापन-सहालापन-सहासन-सहभोजनादिभिः गोविन्दरेड्डीजीवने महदेव परिवर्तनं समघटिष्ट ।

तस्य मनः शिवोन्मुखं धर्मनिष्ठं अध्यात्मप्रवणं विषयलाम्पट्य-विमुखं सम्बोभवीति स्म । मनसि च अध्यात्मलालसा उद्धारमार्गानु-सिसीर्षा समजनिष्ट ।

गुरुवरानुग्रहं विना परमार्थपथे पदमेकमपि पुरः प्रक्षेप्तुं न क्षमेरन् क्षामज्ञानाः पामरा मादृशा इति विचार्य सद्गुरुसंशोधनार्थं प्रायतत

गोविन्दरेड्डि: । परं चिरमन्विष्यापि बहु प्रयस्यापि अत्यर्थं प्रयत्यापि नाऽसादि योग्यो गुरु: । नाऽवापि समर्थ: मार्गदर्शकः । नालाभि संसाराऽकूपारसन्तरणनिपुण: साधुकर्णधारः ।

ज्ञानं क्वचिद् गोष्पति वित्समानं
सुमाननार्हं वरिर्वति किंतु
न तत्र सौजन्य विनीति-वार्ता
मदाविला एव मुदा सदा विदः ॥६३८॥

केवित्सदात्रैव सदाशिवार्चा
भक्ताभियुक्ताश्च तपोनुरक्ता:
परं परज्ञानकणोऽपि नाणुः
स्थाणुर्न गम्य खलु मूढ भक्त्या ॥६३९॥

केचिन्महापीठमठप्रतिष्ठा
मौढ्याज्जनेड्या गुरुदक्षिणाढ्याः
न भक्ति-बिन्दुर्न विरक्तिगन्धो
न ज्ञानसिन्धोः कणिकाऽपि कापि ॥६४०॥

तिर्यक्चलान्दोलिकयोपलालिता
गजस्थसौवर्णसुमण्टपात्त्रिचता:
कुबेरतुल्यामितवैभवेता
न वै भवे जातु रता मठाधिपाः ॥६४१॥

हाराभिलाषा न हराभिलाषा
भवानुरक्ता न भवानुरक्ता:
सभाजनस्तोत्रसुगौरवोत्का:
यतीश्वरा नेशसभाजनोत्काः ॥६४२॥

शिष्याधिकारोच्चमठाधिपत्य-
चरस्थिरैश्वर्य सुभोगमानान्
प्राप्तुं यतित्वं बहवोऽध्यगच्छन्
किं किं न कुर्याद्यतिधर्मवर्मा ॥६४३॥

सन्यासिवेषो हि जघन्यकृत्या-
न्यन्यानि चान्यायशतानि गूढम्
निन्होतुमद्यास्ति सुमान्यमार्गः
शाटी निगूहेत् शठकृत्यकोटिम् ॥६४४॥

सुज्ञान-वराग्य-तपोजपेश-
पूजोपदेशार्त-जनोद्दिधीर्षाः
नैकत्र सर्वे सुगुणा अभूवन्
अन्विष्यतो दृग्विषया: क्वचिच्च ॥६४५॥

एवं चिरात्सद्गुरुशोधकार्ये
वफल्यशल्यं हृदि गूढमाप्य
नैराश्यजौदास्यविवश्यतोत्थ-
वैरस्यखिन्नः स चचार भूमौ ॥६४६॥

हुल्याळपल्याः स बहिः कदाचित्
कल्ये समुत्थाय नवांशुमाल्ये
मल्यादिवल्यावृतमभ्युपाया-
द्योगाश्रमं मंक्षु यदृच्छयैव ॥६४७॥

तत्रायमाराद्यतिराजमेनं
ददर्श साशङ्कमना मुनीन्द्रम्
दृष्ट्वैव चक्षुःकिरणोपसृष्टा-
कृष्टोऽवसुष्टान्तर आननाम ॥६४८॥

तद्दृष्टिसृष्टैः करुणाकटाक्षै-
र्लक्षीकृतोऽसावरुणारुणाभैः
स्नातो नु तीर्थाप्सु निमज्य जातः
पूतोऽवधौतोऽन्ववधूतपापः ॥६४९॥

प्रक्षालितो दृक्सलिलैश्च शुद्धि-
मापादितोऽयं नु पवित्रितो नु
नवीकृतोऽयं विमलीकृतो वा
मालिन्यमुक्तो विशदीकृतः किम् ॥६५०॥

तत्तेजसा तद्यशसा च देह-
भासत्त्विषा ब्रह्मसुवर्चसा च
प्लुष्टः प्रणष्टो न्विव तस्य चित्ते
सन्यासिविद्वेष इयाय लोपम् ॥३५१॥

चिरात्तपोरुद्धविमुक्तदीर्घ-
निश्वासवातोर्मिरयोद्धुतेव
यतीन्द्रसद्वृत्तसुशीलसाधु-
चारित्र्यशंका लघु विद्रुतासीत् ॥६५२॥

मुहुर्मुहुश्चैत्य समेत्य शम्भु-
शिवार्ययोगीश्वरसाधुवर्यैः
सम्भाष्य सन्दृश्य विमृश्य तेषां
विशोध्य चाचारविचारयोगान् ॥६५३॥

निशम्य भूयोपि निरीक्ष्य सम्यक्
परीक्ष्य साक्षाच्च परम्परातः
नैकोऽपि दोषो विगुणो विशेषो
न स्वार्थलेशो ददृशेऽमुनाऽत्र ॥६५४॥

यथा यथाऽप नैकट्यं काषट्यं नोपलक्षितम्
न वैकट्यं गुणानां तु प्राकट्यं समभूत्तदा ॥६५५॥

यथायथाप सम्पर्कमर्कादिर्कोदयस्य सः
शर्करामधुपर्कातिप्राशितोऽनुभवं ययौ ।६५६॥

न वैरस्यं न वैगुण्यं न स्वार्थो नोपभोगिता
नाशालेशः प्रतिष्ठेच्छा नेषदप्यत्र लक्षिता ॥६५७॥

एवं चिरात्तस्य लब्धः स्वापेक्षितगुणैर्युतः
गुरुः श्रीशम्भुलिङ्गेशः शिवाचार्यो यतीश्वरः ॥६५८॥

तद्गुणैर्मुग्ध एवाभूद् गोविन्दो रेड्डिवंशजः
तदाकृष्टस्तदा हृष्टस्तच्छिष्योऽभूद्विशिष्य सः ॥६५९॥

तपःप्रकर्षाच्च स धर्षितोऽभूत
नैस्पृह्यतोऽस्यातितरां प्रहृष्टः
आकर्षितोऽमानुषसिद्धि-शुद्धि-
प्रभाव-देवीमहिमादिभिश्च ॥६६०॥

विरक्तेऽप्यनुरक्तोऽसौ त्यागिनो योगमाप्य च
भक्तो भृत्यो बभूवाशु गुणलुब्धो यतीशितुः ॥६६१॥

दर्शं दर्शं तस्य चर्या तपश्चर्यां मुहुर्मुहुः
अत्याश्चर्यां सपर्यां च गौर्याः पत्युर्जगद्गुरोः ॥६६२॥

पावनं जीवनं दीक्षादाक्ष्यं दीनोद्धृतौ सदा
परोपकारप्रावण्यं कारुण्यं दुःखितेषु च ॥६६३॥

मतजातिकुलाचारनैरपेक्ष्येण दानिताम्
ज्ञानदानाऽन्नदानादिव्यसनं गुरुयोगिनाम् ॥६६४॥

तपःप्रभावं च महानुभावं
भवानुकम्पाप्रभवं च तेषाम्
यथायथैवानुबभूव रेड्डी
तथा लिलेखात्मगुरोश्चरित्रम् ॥६६५॥

आचार्यवर्यस्य स कन्नडोक्ते
र्वाचा यदाचारपरस्य चारु
चित्रं चरित्रं परमं पवित्रं
धात्रीतलेऽस्त्युत्तममाबबन्ध ॥६६६॥

तत्तस्य भाग्यं विबुधैकयोग्यं
योग्युत्तमानुग्रहतो हि लब्धम्
न पूर्वजन्मार्जितपुण्यराशिं
विनोपलभ्येदृशयोगिसेवा ॥६६७॥

ततश्चिरात्पण्ढरिनाथशर्मा
वाग्गुम्फसंस्मारितबाणदण्डी
शम्भोर्गुरोश्चारुचरित्रचम्पूं
निलिम्पवाचा विबुधोऽगुगुम्फोत् ॥६६८॥

॥ इति नवमस्तरङ्गः ॥

॥ अथ दशमस्तरङ्गः ॥

हुल्याळनामके ग्रामे पूज्योऽस्ति बरगीमठः
चेन्नस्वामी मठाधीशः सर्वेषां प्रीतिभागभूत् ॥६६९॥

दुर्दैवान्निर्दयाक्रान्तिमर्दितस्यार्दितस्य च
पत्नी सुतं सुतां वाऽपि नासूतास्य सतीमणिः ॥६७०॥

तस्य चौरससन्तानाऽभावेऽपि स्वामिनामिनः
चिन्तासन्तानमत्यन्तं सन्ततं सन्ततं ह्यभत् ॥६२१॥

एवं दुरन्तचिन्तातान्तान्तरङ्गः चेन्नस्वामी वृद्धाप्येऽतिवृद्धदुःखोद्रेकेण क्षीणक्षीणः परेतपतिपातलिपूरीपान्थः सम्बभूव । तदा तस्य यावज्जन्मविहितपतिपरिचर्या कृतानेकपुण्यकार्या सुदतीकुलधुर्या सन्ततानुष्ठितशिवशरणचरणसपर्या नीलम्मानाम्नी भार्या सदिच्छया हिरेमठ शिवय्य नामानं स्वसोदरं सादरमङ्गीचकार दत्तपुत्रत्वेन ।

तस्य शिवय्यस्य धर्मपत्नी महान्तम्माभिधाना ललनामणिः श्री शम्भुलिङ्गशिवाचार्याणां निरवग्रहेणानुग्रहेण प्रासूत शुभेऽन्हि पुत्ररत्नमेकम् ।

श्री शम्भुलिङ्गशिवाचार्ययोगीश्वराणां प्रसादासादित इति तस्य बालकस्य नाम शम्भुलिङ्ग इत्येव चकार गुरुभक्ताग्रणीः शिवय्य महोदयः ।

पौत्रमुखमवलोक्य परमानन्दतुन्दिला नीलम्मा गुरुप्रसादादेव स्ववंशाभिवृद्धिं निरीक्ष्य कृतज्ञताभावभरिता योगाश्रमपरिसरे वापीमेकां निर्मापयित्वा गुरुसेवामकार्षीत् यथाशक्ति ।

एकस्मिन् दिने वयसा वर्षिष्ठा वपुषा ह्रसिष्ठा प्रेष्ठ पौत्रलाभ-जनितानन्दबंहिष्ठगुरुभक्तिस्थविष्ठा सैव नीलम्मा ब्रह्मर्षिवृन्दिष्ठं महर्षिमहिष्ठं मुनिजनवरिष्ठं गुरुजनगरिष्ठं यतिश्रेष्ठं श्रीशम्भुलिङ्ग-शिवाचार्यसुधीवर्यं स्वनप्त्रा शम्भुलिङ्गेन सह समुपेत्य व्यजिज्ञपत् "भगवन, अयं बालकः श्रीचरणानामेव करुणा-वरुणालयाणुमणीयमानः वर्धमान आस्ते । गुरोरपीदं गुरवे निवेद्यते वचनमनुसृत्य श्रीचरणानु-ग्रहजनितमेनं श्रीचरण-चरण-परिचरण-सेवाशुश्रूषार्थं समर्पयामः । इतः परं तस्य श्रीमत्कदयासरसीतटकंदलितसुकुमाराङ्कुरायमाणस्यास्य-कुमारस्य श्रीश्रीमन्त एव पालकाः पोषकाः स्तोषकाः भूत्वा रक्षन्तु अक्षततयेति" सम्प्रार्थ्य तं बालकं योगाश्रम एव निक्षिप्य गृहं प्रायात् ।

ततश्चतुर्वर्षानन्तरं वृद्धाप्यक्षीणशक्तिः शक्तियुक्तं शिवमेव भक्त्या चित्ते ध्यायन्ती, कालीपतिकेलीविहारस्थलीयमानं, कैलासलोक-माससाद । स च बालको द्वादशवर्षेभ्यः योगाश्रमे सहर्षप्रकर्षं साधिक-तर्षं च गुरुसेवां सोत्साहं कुर्वाण एवास्तेऽद्यापि ।

सम्पूर्णमवसिते च योगाश्रमस्यावासनिवासपाठशालागोशालाऽतिथि-शाला - पाकशाला - भोजनशाला - सभाङ्गण - समाधिमण्डप -प्राकारोच्च-गोपुरादि-विविध-शिल्पनिर्माण-कर्मणि श्री शम्भुलिङ्गशिवाचार्याः कङ्कणवाडीग्रामनिवासं पूर्णतयैव परित्यज्य ईसवीय १९४० तम वत्सरादूर्ध्वं योगाश्रमे एव चिरन्तनवास्तव्यमकुर्वन् ।

पुनः पञ्चवर्षान् प्रपञ्च-गत-सर्व-पञ्चजन-क्षेमोदञ्चनाय भक्त्युद्रेक समुदञ्चित-रोमाञ्च-कञ्चुकित-कलेवरं योगसमाधिसध्र्यञ्चं सम्यञ्च-मेव आचचार तपोविशेष । आनञ्च च सुरपञ्चानां वञ्चच्चामीकरचारु-

जटामण्डल-मण्डित-खण्डचन्दिरसुन्दरं खण्डपरशुमखण्डध्यानोपासनादिभिः ।

अक्षरोपासनां धेनुक्षरत्क्षीरोपजीवनः
चक्रेऽसावक्षरोत्साहो योगिचक्रेश्वरो गुरुः ॥६७२॥

कष्टकृन्निष्ठुरात्युग्रतपोनुष्ठानपूजनैः
तुष्टुवे तुष्टये भक्त्याकृष्टश्चाष्टवपुः शिवम् ॥६७३॥

पुनः पुनस्तपश्चर्यासपर्यापर्युपासनैः
पर्यायेण कृतैरस्य गौर्या नाथस्तुतोष सः ॥६७४॥

एवं मन्दीकृतकलिरंहसि दूरीकृतलोकांहसि गच्छति कतिचिदने हसि जमखण्डी-हुलियाळु-मुधोळादि-निवासि-सद्भक्तजन-प्रार्थनानुसारेण ईसवीय १९४६ तमवत्सरात्प्रारभ्यत माघपूर्णिमादिने पारमार्थिकमहोत्सवः ज्ञानसत्ररूपेण श्रीचरणैः ।

अविच्छिन्नतया पञ्चत्रिंशद्वर्षेभ्यः प्रचाचलीत्ययं परमार्थमहोत्सवः महतोत्साहेन बृहता वैभवेन । यत्राहूयन्ते मन्दाकिनी-वीची-वृन्द-मन्दीकरणनिपुणैः फुल्लारविन्द-मन्दार-माकन्द-स्वच्छन्द-निष्यन्दन्मकरन्दबिन्दु-सगन्ध-वचःसन्दर्भैः समस्त-श्रोत्र-सन्दोहामन्दानन्द-सन्दान-पटीयांसो भूयांसो विद्वांसः ।

आकार्यन्ते भृङ्गी-पिकाङ्गनाऽङ्गीक्रियमाण-गुङ्गुङ्गान-गुञ्जा-काकलीमाधुर्यमदभङ्गकारि-सङ्गीत-भङ्गी-तानतरङ्ग- सन्तर्पित-रसिक पुङ्गवान्तरङ्गा महीयांसो रागरागिणीमर्मज्ञाः स्वरब्रह्माणः सङ्गीत-गङ्गाधराः ।

उपनिमन्त्र्यन्ते च शाला-कलाशाला-पाठशालादिषु ज्ञान-विज्ञान-तत्त्वज्ञान-साहित्याद्यध्यापयन्त आचार्याः प्राचार्याश्च ।

आनीयन्ते कन्नड-हिन्दी-संस्कृत-महाराष्ट्र्यादि विविध भाषासु दिव्यानि काव्यानि शृङ्गाटकानि नाटकानि हृद्यानि गद्यानि, आस्वाद्यानि पद्यानि च रचयन्तः सरसकवीश्वराः ।

आवाह्यन्ते सन्ततमन्तरङ्गं परतत्त्व-चिन्तन-मन्थन-दृढीभूत-शास्त्रसिद्धान्ताः करतलामलकीकृतवेदान्तास्तत्वज्ञानिनः ।

यत्र च प्रतिवर्षं विहितपुण्योल्लासे माघमासे प्रचलन्ति विद्वद्गोष्ट्यः । प्रवर्तन्ते सङ्गीतसम्मेलनानि । आयोज्यन्ते अध्यात्मसभाः आमेल्यन्ते चर्चाकूटानि । निर्वर्त्यन्ते कलाधरपरिषदः । परीक्ष्यन्ते छात्राः । प्रोत्साह्यन्ते गानगन्धर्वाः । पुरस्क्रियन्ते पण्डिताः । आद्रियन्ते वैणिकाः । सम्मान्यन्ते सामाजिककार्यकर्तारः । प्रशस्यन्ते दातारः सत्क्रियन्ते कलाविदः । सभाज्यन्ते धर्मज्ञाः । पूज्यन्ते यतीश्वराः । वितीर्यन्ते पारितोषिकाणि । दीयन्ते दक्षिणाः । सम्भाव्यन्ते लौकिकाः । महीयन्ते महात्मानः । अर्ह्यन्ते धार्मिकाः । अर्च्यन्ते गुरवः । स्तुत्यन्ते देवताः । उपश्लोक्यन्ते गणाधिपाः । पण्यन्ते प्रमथ गणाधीश्वराः । सर्वेऽपि योग्य-गौरव-धन-विशेष-समर्पणेन यथायोग्यं रजत सुवर्णोर्णवस्त्रपदवीप्रशस्ति प्रदानपुरस्सरं अतितरामाद्रियन्ते योग्य पुरुषाः ।

यत्र च प्रतिवत्सरं विना जातिभेदं, अन्तरा पङ्क्तिभेदं, अपहाय धर्मभेदं, आविपालगोपालाङ्गनं, आपामरपण्डितं, आब्राह्मणान्त्यजं च विधीयतेऽन्नदानं, परिवेष्यन्ते पक्वान्नानि, यथेच्छं भोज्यन्ते च मृष्टान्नानि ।

येन च पारमार्थिकमहोत्सवेन तस्मिन् प्रदेशे संसाधितं धार्मिकजागरणम् । प्रवाहितो भक्तिरसप्रवाहः । सर्वत्र उत्पादिता हरश्रद्धा । निर्मापिता गुरुनिष्ठा । प्रवर्धिता आस्तिक्य भावना । दूरीकृता नास्तिकविचाराः । संसाधिता धार्मिकक्रान्तिः । समुद्भूता वीरशैव-

मतवैजयन्ती। सर्वत्राऽपि निनादितः शैवमतडिण्डिमः। प्रचारिता पञ्चाचार्यविचारधारा। परिचायिता शक्तिविशिष्टाद्वैतविचारप्रणाडिका। जगन्मान्यतामापादिता गणाधीश्वरतत्त्वज्ञानपद्धतिः। सर्वैरङ्गीकारितं शिवसर्वोत्तमत्वम्।

यत्र च भवताः असङ्ख्यभावुकाः श्रावका जिज्ञासवः मुमुक्षवः गुर्वनुग्रहमादित्सवः धार्मिकधुरन्धराः सामाजिकधुरीणाः कलाकाराः छात्राः पण्डिताः समारम्भं दिदृक्षवः उपन्यासभारतीं च विदुषां शुश्रूषवः प्रसादं स्वीचिकीर्षवः पामरा दीना दरिद्राः श्रीलाः सुशीला योगिन स्त्यागिनः भोगिनः विरागिणः सन्यासिनः सांसारिका भक्ता मुक्ता विरक्ताः सुवासिन्यः सीमन्तिन्यः स्थविष्ठा यविष्ठाः श्रेष्ठाः कनिष्ठा उत्तमा मध्यमा अधमाः कर्षका अधिकारिणः मान्याः सामान्याः आहृत्य पादलक्षाधिका एव जनाः प्रतिवर्षं सम्मिलन्ति।

यत्र च सर्वेऽपि भक्ताः आकलयन्ति गुरुपूजां, गृह्णन्ति प्रसादं शृण्वन्ति प्रवचनानि, आकर्णयन्ति सङ्गीतभङ्गीः, आस्वादयन्ति गानरसं आन्दोलयन्ति शिरांसि, अभिनन्दन्ति कार्यक्रमान्। अभिवन्दन्ते सद्गुरून्। संवदन्ते स्नेहितैः। निवेदयन्ति सुखदुःखानि। विस्मरन्ति सांसारिकचिन्ताः। विहरन्ति स्वच्छन्दं। विचरन्ति सानन्दं। प्रविशन्ति अध्यात्मप्रपञ्चं। मज्जन्ति गुरुकरुणाकासारे। हृष्यन्ति हृदये। तुष्यन्ति अन्तरङ्गे। पुनन्ति शरीरं। धन्यं मन्यन्ते चात्मानम्। सार्थकं जानन्ति स्वजीवनम्। सफलं विन्दन्ति च स्वकीयमायुः।

यश्च पारमार्थिक महोत्सवः पूर्वमपूर्वं मरुत्तमहाराजेन कृतयुगे कृतं संस्मारयति यज्ञमहोत्सवं। विस्मारयति च द्वापरे धर्मराजेनाचरितमत्यद्भुतं राजसूययागम्।

एवमेतादृशमनीदृशं महोत्सवं प्रतिवत्सरं अविच्छिन्नतया सोत्साहं कारयितृणां प्रेरयितृणां श्रीशम्भुलिङ्गशिवाचार्याणामसाधारणीं कर्तृ-

त्वशक्ति, असामान्यां सङ्घटनाचातुरीं, अभूतपूर्वं जनानुरागं लोकोत्तरं महिमानं, विलक्षणं प्रभावं, प्रशस्यां तपस्यां, अनन्यां लोकोद्दिधीर्षां च दृष्ट्वा कस्य वा सचेतसश्चेतसि नोदीयादयं विचारः ।

न मानवोऽयं तु नवो हि देवः
सामान्य एषो न परं तु मान्यः
न मस्करीदृक् च नमस्क्रियार्हः
शिष्या विशिष्यास्य वयं हि धन्याः ॥६७५॥

ईसवीये १९५२ तमे वत्सरे विजापूरमण्डलांतर्गतसिंदगीविभागांतःपातिनः करनाळग्रामस्य पट्टाधिकारस्याधिपतिः चिदानंदस्वामिनामा पञ्चदशवर्षदेशीयः तेजःपुञ्जरञ्जनीयः कश्चन वटुः श्री शिवाचार्याणां सन्निधिमुपसृत्य सविनयं सानुनयं साञ्जलिबधं सस्नेहानुबंधं च प्रणिपत्य कुडमलीकृतकरयुगलेन प्रार्थयामास ।

"पूज्याः ! श्रीचरणानां शिष्यत्वमङ्गीकृत्य संस्कृताध्ययनं कर्तुकामोऽत्रागतोऽस्मि । इयत्कालं मया सोलापूरे कस्यांचन चतुष्पाठिकायां अधीयते स्म । परं तत्र पाठनक्रमो न सुव्यस्थितः न समीचीनश्चेति निश्चिन्वानः विपश्चिदपश्चिमानां श्री श्रीमतां चरण सन्निधिमुपसन्नोऽस्मि ।

शिष्यत्वेन अत्रभवंतो भवंतो मां दयया गृण्हंतु । अनुगृण्हंतु च शिष्यपरमाणुमेनम् । अध्यापयंतु अध्यात्मविद्याम् ॥ शिक्षयंतु शास्त्राणि । बोधयंतु काव्यानि । अवगमयंतु गीर्वाणगणगौरवमागूरयत्याः संस्कृतिमायाः वाण्याः स्वारस्यम् । पाठयंतु नाटकानि । उपदिशंतु उपनिषदः । ज्ञापयंतु वेदांतम् । श्रावयतु श्रुतीः । स्मारयंतु स्मृतीः । प्रवदंतु पुराणानि । आवेदयंतु आम्नायसारसर्वस्वम् । निरूपयंतु न्यायशास्त्रं । वेदयंतु व्याकरणं । शंसंतु मीमांसां । व्याख्यांतु साङ्ख्यं । दिशंतु मंत्रोपदेशं । वितरंतु शास्त्रविद्यां । "शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नं" ।

यद्यपि निरंतर-ध्यानोपासनादि-रूप-संतत-तपस्समाध्यनुष्ठानैक व्यसनिनः शम्भुलिङ्गशिवाचार्यप्रमीश्वरस्य नासीदेव काव्यशास्त्राध्यापने आसक्तिः। परं ग्रहणधारणपटोः तस्य वटोः आलोक्य संस्कृतनिष्ठां आलोच्य शास्त्रागमसाहित्यशिक्षाधिगमदीक्षां, अन्वीक्ष्य जिज्ञासावृत्तिं, अनुलक्ष्य अध्ययन प्रवृत्तिं, निशाम्य गुरुभक्तिं, परिशील्य बुद्धिवैशारद्यं, अवेत्य संस्कृतज्ञानोपार्जनात्युत्कटाकांक्षां, विज्ञाय सर्वङ्कषशेमुषीनैपुणीं, अवबुद्धय सौजन्यं, प्रतीत्य सौशील्यं, साक्षात्कृत्य च अन्यान्यान् अनन्यान् सर्वमान्यान् असामान्यांश्च तदीयान् सद्गुणान् तं चिदानंदस्वामिनामानं छात्रं स्वीचकार शिष्यत्वेन।

स काव्यकैलास इति प्रसिद्धं
श्री कालिदासप्रतिभाविलासम्
सुधांशुवच्चामृतबिन्दुवृन्द-
विस्रंस्यपाठीद्रघुवंशकाव्यम् ॥६७६॥

रघूद्वहानां रसभावरम्यं
प्राज्ञैकगम्यं रसिकैर्निशाम्यम्
निशम्य चाधीत्य गुरोश्चरित्रं
वटुर्बभूवाध्ययने पटुस्सः ॥६७७॥

काव्योपनिषदं प्रौढं नैषधं विद्वदौषधम्
श्रीहर्षस्याध्यगाद् हर्षप्रकर्षं समधीत्य सः ॥६७८॥

पुण्यश्लोकनलोदन्तश्लोकानभ्यस्य सद्गुरोः
पुण्यं श्लोकार्थनैपुण्यं यत्नपण्य स लब्धवान् ॥६७९॥

पशुपालकुलोत्पन्नशिशोः प्रौढदशाकृतीः
शिशुपालवधं काव्यमशिक्षिष्ट निरूपयत ॥६८०॥

कल्यमाघविहितावगाहन–
श्छात्र एष पुलकाञ्चितोऽभवत्
शैत्यमत्र तु न कारणं परं
तद्रसामृतसरोवगाहनम् ॥६८१॥

कुमारसम्भवं यत्र शाम्भवं मारमारणम्
सरसं चित्रितं सोऽयं कुमारोऽधीतवान् गुरोः ॥६८२॥

मेघदूत-रस-मेघ-निस्सरद्-
वाग्रसौघ-विघसाशनोऽनघः
नैव मोघमवमंस्त चात्मनः
काव्यशिक्षणपरिश्रमं चिरात् ॥६८३॥

स किरातार्जुनीयाख्यं काव्यमध्यैद् गुरोर्मुखात्
भारवेरर्थभारेण भरितं भारतोत्तमम् ॥६८४॥

श्रीबाणभट्टस्य रसप्रघट्टं
छात्रोऽध्यगीष्टात्र विदां वरिष्ठात्
कादम्बरीगद्यमयप्रबन्धं
सर्वङ्कषो यो निकषः कवीनाम् ॥६८५॥

सुबन्धुनाम्नोऽपि च गद्यबन्धं
श्लेषार्थसिन्धुं सुरसानुबन्धम्
अध्यापयामास पटुं स्वशिष्यं
स शम्भुलिङ्गेशशिवार्ययोगी ॥६८६॥

माघ-मेघादि-काव्यौघ-रससारघ-सारवित्
स सुधीर्मघवांश्छात्रः काव्यव्युत्पत्तिमध्यगात् ॥६८७॥

दण्डिनो दण्डिनो गद्यं हृद्यं सोऽध्यैष्ठ सद्गुरोः
काव्यादर्शं कुमाराणां चरितं भरितं रसैः ॥६८८॥

वाग्देव्याः कुन्तलं रम्यं शाकुन्तलसुनाटकम्
शृङ्गारोत्कटमध्यैत नीतिशृङ्गाटकं गुरोः ॥६८९॥

उत्तरं रामचरितं भवभूत्युत्तमां कृतिम्
अशिक्षत चिदानन्दो विभूतेर्भवसम्मतात् ॥६९०॥

वचो-देवी-वैजयंतीं जयदेवस्य सत्कृतिम्
गीतगोविंदमानंदाद् गेयं गानविदोऽध्यगात् ॥६९१॥

गीतगोविंदसौंदर्यं तालसङ्गीतसङ्गतम्
गानगंधर्व शम्भ्वार्यादन्यः को गदितुं क्षमः ॥६९२॥

वाचामाचार्यताभाजो जगन्नाथस्य सत्कृतीः
स्फुरच्चमत्कृतीर्वेद लहरीमाधुरीझरीः ॥६९३॥

सौंदर्यलहरीमुख्याः क्षीराब्ध्यूर्मिविजित्वरीः
ललिताः कविता जज्ञे शंकराचार्यनिर्मिताः ॥६९४॥

लक्ष्मीसहस्र-रामाङ्घ्रि-पाद-स्तुति-सहस्रकम्
गाथासप्तशतीमध्यैदार्यासप्तशतीमपि ॥६९५॥

कालचक्रहृतं भूयश्चक्रनेमिक्रमोद्गतम्
भासनाटकचक्रं स चक्रे छात्रो मुखोद्गतम् ॥६९६॥

सुश्राव्याणि महाकाव्यान्यन्यान्यपि लघूनि च
मनीषिकविशम्भ्वार्ययोगिधुर्यात्स चाध्यगात् ॥६९७॥

नलचम्वादिचारुपेयगुम्फसौरभसम्पदं
अप्रकम्पानुकम्पात: सम्प्रपेदे गुरोर्वटु: ॥६९८॥

साहित्यपाण्डित्यमहापटुत्व-
साहित्यसौहित्ययुजो यतींद्रात्
सुज्ञानसिंधोरनुविद्य कांश्चिद्
बिंदून् चिदानंद इयाय वित्वम् ॥७९९॥

सानंदं कुवलयानंदं मंदेतरमतेर्गुरो:
नानालङ्कारसङ्कारमशृणोच्छारदाप्रियात् ॥७००॥

साहित्यदर्पणं विद्वत् पाण्डित्यप्रतिबिम्बगम्
चमत्कृतश्चिदानंदो दृष्ट्वा तस्मात्तदध्यगात् ।८०१॥

ध्वन्यध्वन्यध्वनीनात्स ध्वन्यालोकमधीतवान्
विद्वन्मूर्धन्यतो धन्यः प्रबभूव च तत्ववित् ॥७०२॥

रसगङ्गाधरादर्थगङ्गां शम्भु भगीरथ:
आनीय च चिदानंदं पाययामास वित्तमः ॥७०३॥

काव्यप्रकाशसद्ग्रंथमुद्ग्रथग्रंथिरूपिणम्
ममंथ मतिमंथेन शिवाचार्य:सुधीमणि: ॥७०४॥

उन्नीतं नवनीतं तु चिदानंदाय संददौ
रस-ध्वनि-रहस्यार्थ-रस्य-स्वारस्य-रूपि तत् ॥७०५॥

एवं लक्षण-शास्त्राप्त-विलक्षण-पटुत्वत:
वैचक्षण्यं च नैपुण्यं चिदानन्दोऽध्यगाद् गुरोः ॥७०६॥

इत्थं साहित्य-सीमान्तमुल्लङ्घ्यांघ्रि समर्पयत्
वेदान्तप्राङ्गणे शम्भो श्चिदानन्दः कृपाबलात् ॥७०७॥

आदौ पञ्चदशीं गीतामविगीतां ततोऽध्यगात्

तथोपनिषदः काश्चित्स विपश्चिदपश्चिमात् ॥७०८॥

अद्वैतोद्घोषिवेदान्त-शास्त्रान्तस्तत्त्वसाधकं

प्रत्यक्तत्वविवेकाख्यमवेत्प्रकरणं गुरोः ॥७०९॥

एवं पञ्चषवर्षाणि चिदानन्दोऽन्तिके गुरोः

योगाश्रम उषित्वासौ काव्यवेदान्तविद् बभौ ॥७१०॥

एवं योगाश्रमे निवसतः पाठप्रवचनानि कलयतः, परशिवं पूजयतः तपस्तपतः, जपान् जपतः, मंत्रान् पठतः, योगाननुतिष्ठतः, शिष्यानुद्धरतः भक्तान् भावयतः, जनताजनार्दनमाराधयतः, दैन्यं दूरयतः, दुरितानि दारयतः, दुःखदुरवस्था निवारयतः, भवसागरं तारयतः, कृतयुगमवतारयतः, कलिं तिरयतः, धर्मतत्वानि बोधयतः, सतः श्री शम्भु-लिङ्गशिवयोगीश्वरस्य महीयानेव व्यतीयाय पुण्यमयः समयः। सर्वदाऽपि शर्वपूजति सर्वलोकोद्धाराय सिद्धहस्तस्य तस्य सिद्धिपुरुषस्य सूर्योदयात्सूर्यास्तपर्यन्तः सकलोऽपि कालखण्डः अपर्याप्त एव भवति स्म

उपदिशोपनिषदः, उपक्रम तर्कं, वद वेदं, गद वेदान्तं, मीमांसस्व मीमांसां, व्याख्याहि साङ्ख्यं, वन्धि शब्दशास्त्रं, विमृश वीरशैवं, खण्डय पाखण्डदर्शनं, निराकुरु नास्तिक्यं, अपाकुरु भौतवादं, बोधय तत्वानि, निवेदय परमार्थं, साधय शैवसिद्धान्तं, प्रतिपादय शिवसर्वोत्तमत्वं, मोदय भक्तान्, अपनोदय शिष्यचिन्तां, दूरीकुरु दैन्यं, स्फारीकुरु, धार्मिककृत्यानि, ऊरीकुरु लोकोद्धारव्रतं, अङ्गीकुरु जिज्ञासूपनिमन्त्रणं, कुरु प्रवचानि, प्रयच्छ शैवदीक्षां, परिष्कुरु योगाश्रमं, बहिष्कुरु समाज-कण्टकान्, आविष्कुरु अध्यात्मप्रभावं, अपनय दुष्टदौष्ट्यं, परिवर्तय सुधारकान्, प्रचारय धर्मं, प्रसारय शिवभक्तिं, लिख ग्रन्थान्, प्रकटय सत्कृतीः, प्रकाशय ज्ञानज्योतिः, उद्दीपय धर्मदीपं, प्रवर्तय पारमार्थिक-महोत्सवं, निर्वर्तय ज्ञानसत्राणि, आयोजय शैवसभाः, उद्धर श्रद्धालून्,

इति कार्यसहस्रपर्याकुलतया तेषां योगीश्वराणां क्षणमपि न लभ्यते स्म सावकाशः समयः रन्तुं वा विरन्तुं विश्रान्तिसुखमनुभोक्तुं वा ईषदपि ।

एवं सदा सदाशिव-तत्व-चिन्तन-ध्यानोपासनक-प्रवण-मानसानां श्री शम्भुलिङ्गशिवाचार्याणां तपःप्रभावेण महताऽनुभावेन च शतश एव उद्धृताः भक्ताः । सहस्राधिका एव दुश्चिकित्स्यरोगाक्रान्ता उल्लाघ–तामापादिताः । बहूनामेव च दूरीकृतं दारिद्र्यम् । अनेकासामेव सीमन्तिनीनामपाकृतं वन्ध्यात्वम् । असङ्ख्यानां च शिष्याणां परिहृताः कौटुम्बिकास्समस्याः । पराहताः आपदः । विलोपिता वैयक्तिक चिन्ताः । पुनः समीकृता वाणिज्यव्यवहारहारादयः । प्रकटीकृता आध्यात्मिकी शक्तिः । आविष्कृता दैवी सम्पत् । प्रादुष्कृतः तपः–प्रभावः । अभिव्यञ्जितं शापानुग्रहसामर्थ्यम् । आविर्भावितो दिव्यो नव्योऽनुभावः । प्रदर्शितः अलौकिको महिमा । स्फुटीकृता दैविकता, प्रदर्शिता शताऽधिका अमानुषसिद्धयः ।

एवमसङ्ख्यानि कौतुकभरितानि दूरीकृत श्रावकदुरितानि आध्यात्मिकानुभावच्छुरितानि गुरुवर्यं श्री शम्भुलिङ्गशिवाचार्यचारुचरितानि साकल्येन निरूपयितुं पुरुषायुषाऽपि मादृशैः मितमतिभिः न शक्यते । अथाऽपि सुज्ञजनापेक्षानुसारेण कानिचिदेव अदसीयदिव्यशक्तिद्योतकानि तत्संसाधितनैकदैवीसिद्धिसमृद्धिप्रत्यायकानि अमानुषप्रभावनिदर्शकानि मन्त्रसामर्थ्यसाक्षीणि उदाहरण रूपेण निरूप्यन्ते महामहिमनिदर्शनानि ।

कदाचित् विभासमान-प्रभाकर-प्रभा-प्रभासिते प्रभातकाले सरति शीतले मरुति, स्फुरति किरणारुणे अरुणे, किरति मयूखान् मयूख मालिनि, वितरति मुक्ति कमलकोशेभ्यो मधुलिहां, हरति मनो पूर्वस्यां हरिति हरिहयबिम्बे, उच्चरति कलकलविरावं विहगकुले, धरति धरित्री-तले अनुपमां सुषुमां, श्री शम्भुलिङ्गशिवाचार्यस्वामिनः यथात्मनियमं पञ्चपञ्चोषःकाल एव प्रबुध्य स्वर्धनीवीचिनद्धजटाकलापं कलाधराकल

कलितमौलिमण्डनं खण्डपरशुमखण्डभक्त्या निध्याय प्रातर्विधिपूरणाय बहिर्देशमगुः ।

तत्र च सुदूरनिबिडवनान्तराले दैहिककश्मलविसर्जनायोपविष्टेषु यातप्रेष्ठेषु पुरःप्रासर्पद् विसर्पद्दर्प इव मृत्योः कश्चित्सर्पः ।

समीपमपसर्पन्तम । भाग्यवत्पुरुषमिव सुविपुलभोगशालिनं, खलमिव द्विजिव्हाचालक कुबेरकोषमिव मणिमण्डितं, महानुभावमिव बहुजन दत्ताशिषं, जलाशयमिवब हुलविषपूर्णं, युद्धभूमिनिवृत्तमिव मुक्तकञ्चुक, भृत्यमिव मृत्योः, प्रतिनिधिमिव अन्तकस्य, निधिमिव गरलस्य, हनुमद्वालमिव प्रदीर्घाकारेण लम्बायमानं, दुर्विषह विषविषमं, कालाशीविषं निकषाऽन्वैक्षन्त ।

शौचविधि-नियमानुसारेण उत्थातुमनीहमानाः श्री शिवाचार्याः सकटाक्षप्रक्षेपमुदैक्षन्त मंक्षु दिधक्षंत इव दिदक्षन्तं दंशनविचक्षणं विलक्षणं च तं चक्षुःश्रवसम् । रौक्ष्याधिक्षेपलक्षितेन तीक्ष्णतरेण चक्षुषा एवमभिवीक्षित मात्र एव सर्वोर्वीतल-वर्ति-दर्वीकर-कुलसार्वभौम इव उर्वायतदीर्घदेहेन परिलक्ष्यमाणः स दन्दशूको निश्चेष्ट इव जडीकृत इव पङ्गुरिव निष्क्रियः समपद्यत । कुण्डलीकृतदेहेन च प्रणमन्निव पर्यपतद्धरामण्डले ।

यथासमुदाचारं च आचार्याः शौचाचारविधिं परिसमाप्य न्यवृतन् योगाश्रमम् । सोऽयं क्रूरः करालश्च कृष्णसर्पः तद्दिने क्षणनिरीक्षणधृतक्षण इव यदा तदा योगाश्रमप्राङ्गणभूमिमुपसद्य दण्डिकुला मण्डनमणये दण्डप्रणामं विदधदिव, कदाचिद्दंडाकारेण कदाचित कुण्डलाकारेण, क्वचिन्मण्डलीभूय, विना फूत्कारं, विहाय दशनव्यसनं अपहाय क्रौर्यं, विनीत इव अनुनीत इव गृहीत इव अहिंसाव्रतं ग्राहित इव तत्र तत्र तूष्णीं परिपतति स्म । श्री शिवाचार्या आश्रमवासिभ्यस्तमुदपश्यं तद्दिने प्रातःकाले संवृत्तां न्यवेदयन् पूर्वघटनाम् ।

शेषो न भीषयामास रोषं नादर्शयत्क्वचित्
न पफाण फणां क्वापि नादशत्फूत्कृतिं व्यधात् ॥७१२॥

नागोऽनागा बभूवात्र गुरोरस्यानघस्य हि
प्रभावान्नागभूषस्य भक्तान्नागः कथं दशेत ॥७१२

जलधरजालान्तर्हितोष्णमहसि घनाघन-निलीन-चन्द्रमसि धूमयोनि स्तोम-कर्दम-निमग्न-नक्षत्र-भासि घनीभूत-दुर्दिन-तमसि कलुषित-कीलाल सरसि कन्दवृन्द-सान्द्र-विहायसि महापूर-घूर्मंमाण-नदीप्रवाह-पाथसि मूकीभूत-पिकादि-वयसि संस्फुरत्सौदामिनीतेजसि आनन्द-भरित-शिखिमनसि संवर्धित मन्मथ-यशसि मेचकितनभसि कदाचिन्नभसि मासि कामपाल इव धृततमोनीलक्षौमः सुरासुर-समर-काल इव कौशिक-नागाधिप-सञ्चार-भीमः धाराधरनिकर इव चञ्चच्चामीकर-चारु-चपला-स्तोमः धूर्जटिजटाजूट इव क्षीणतेजःशिशुसोमः मर्दितभोमिनीभामः वर्धितकामिनीकामः मध्यमो यामिनीयामः ।

तदा जमखण्डीनगरगतगवळीवीथीगत जनाः श्री शिवाचार्यान् प्रवचनार्थं निनीषवः मरुत्तरयानेनोपाजग्मः :

गवळीगल्ली श्री विठ्ठलमन्दिरे प्रतिवर्षं श्रावणमासे साधुसन्तो मिलित्वा भक्तियुक्तास्त्यक्तान्यव्यापाराः मुक्तसांसारिकचिन्ता मुक्त्या-धायकं भगवन्नामसङ्कीर्तनमखण्डमाकलयन्ति स्म दिवानिशमनिशं भृश-मादरातिशयेन विहितोपोषणाः । तस्मिन्नेव शुभसन्दर्भे तत्त्वजिज्ञासुभि-भिस्तत्रत्यैर्भक्तैर्विरक्तशिखामणयोऽभियुक्तशेखरा आकारिता आसन् आचार्यपादाः

मध्यरात्रिसमये योगाश्रमान्निर्गत्य मरुत्तरयानेन प्रयाणोन्मुखेषु योगि प्रमुखेषु चिदानन्दनामकछात्रभृत्यादिसहितेषु मध्ये मार्गं दक्षिणत वन्यवर्त्म निबिडतमवृक्षलतागुल्मान्तरे रत्नदीपवद्देदीप्यमानः उद्रिच्य-

मानोदर्चीरोचिर्निचयप्रतिहतावलोचकलोचनः प्रभापुञ्जपञ्जरमञ्जुकान्ति-पिञ्जरितपर्यन्तः अणुप्रतिबिम्बमिवांबरमणेः केन्द्रीकृततेजःप्रसर इव नक्षत्रप्रदीपानां, खण्डपरशुशिखण्डादुद्धृत्य स्थापित इव खण्डसुधाकरः कोऽपि प्रचण्डज्योतिःपिण्डः प्रचाकशीति स्म

तद्वाहनस्थिताःचिदानन्द पूजारिशिक्षकप्रभृतयः प्रत्यक्षमेव निरीक्ष्य तादृशं विलक्षणं ज्योतिष्पुञ्जं विस्मयस्तिमिताश्चकितचकिता, वपुषि पुलकिता, जडीकृता, दिव्यज्योतिःसन्दर्शनजनितामन्दानन्दमन्थराः आश्चर्यातिशयमूकीभूता, निष्पन्दतारं चिरमन्वैक्षन्त ससूक्ष्मेक्षणं तदेकबद्धलक्ष्याः ।

समीपमुपागते तु मरुत्तरयाने क्रमेण न्यलीयत क्वापि स कोऽपि तेजःप्रसरः । गुरुमहिम्नैव ईदृशदिव्यज्योति दर्शनं सञ्जातमद्यति सर्वेऽपि मनस्येवानन्दन् अभ्यनन्दश्च श्री श्रीमदाचार्यपादान् । अद्यापि तद्यानगताः गोविन्दरेड्डि चिदानन्दछात्रादयः तद्दिने जातं तद्दिव्यानुभवमविकलं स्मरन्ति सपुलकं च कथयन्ति- सकौतुकमनुभावयन्ति श्रोतॄनपि ।

आचार्यपादानां विजापूरवास्तव्ये संवृत्ता काचन घटनाऽत्रोल्लेखनमर्हति ।

विजयपुरनगरस्य जोहारपेटविभागे लोणि महलिङ्गप्पनामकः गृहस्थः जीवनोपयुक्तपदार्थवाणिज्यव्यवहारं स्वकीयतनुतरापणे कुर्वन्नासीत् । तस्य च सर्वदा उन्निद्रेण दारिद्र्येण उपद्रुतस्याप्यक्षुद्रबुद्धेः भक्तोपद्रवविद्रावके जगद्रक्षाशिक्षाभद्रकारिणि सद्गुणसमुद्र अद्रिजार्धदेहे महादेवे अच्छिद्रैवासीन्निरतिशया भक्तिः । गुरुमठ इति च निरवधिकैव सन्ततानुबद्धा सुश्रद्धा बृहन्मठे ।

तस्य च महालिङ्गप्पस्य छायेव सवितृदेवस्य, ज्योत्स्नेव जैवातृकस्य, स्वाहेव जातवेदसः, अरुन्धतीव वसिष्ठस्य, सद्गुणमालिनी सुस्वभावशालिनी सतीपथसञ्चलिनी भक्तिशीलिनी राजहंसीव कान्त-

मानसानुसारिणी, भागीरथीव गौरीगुरुपादपरिवरणपरायणा, भवानीव परोपसेवानातुरा राधिकेव श्री वल्लभानुबद्धहृदया, पौलोमीव सङ्क्रन्दनोद्विग्नमनःप्रसादनचतुरा सुधामयीव सम्भाषणे नवनीतमयीव हृदये, वात्सल्यमयीव भृत्येषु, चक्रवाकामयीव पतिप्रेम्णि, वेतसमयीव गुरुषु, लावण्यमयीव कलेवरे, विनयमयीव व्यवहारे, नागाम्बानाम्नी शर्मदायिनी काचनासीद् धर्मपत्नी ।

हरनिष्ठौ गुरुभक्तौ धर्मबद्धश्रद्धौ सदाचारिणौ सद्विचारिणौ सम्प्रदायशरणौ समाराधितशरणौ संसेवितगुरुचरणौ विशुद्धमनोवाक्करणौ समासादित महाजनकरुणौ समाशासितपरमेश्वरकटाक्षकिरणौ परिशुद्धान्तःकरणौ तौ उभावपि लोणी दम्पती प्रातःकाल एव प्रतिदिनं जोहारपेटागत स्वगुरुस्थानभूतं बृहन्मठं गत्वा श्री श्री शम्भुलिङ्ग-शिवाचार्याणां दर्शनं पादस्पर्शनं च गृहीत्वा अनुग्रहं सम्पाद्य तदनन्तरमेव इतरकार्याणि कुरुतः स्म

एवं व्यतीतेषु प्रभूतेषु दिनेषु, अतिक्रान्तेषु मासेषु, गच्छत्सु वत्सरेषु दम्पत्योः सन्तानाभावचिन्ता नितान्तमन्तरङ्गे सन्ततान सन्ततसन्तापम्

संसारे नन्दनो नूनं हृदयानन्दनो नृणाम्
तदभावे सुखाभावो जीवनं स्याद् घनं वनम् ७१३

साङ्क्रन्दनं नन्दनं स्यान्नन्दनैर्मर्त्यजीवनम्
विना तु नन्दनैर्नूनं संक्रन्दनमयं वनम् ७१४

अपत्यभावतृप्ताम्बा विवाहानन्तरं ह्यभूत्
अपत्याभावतः खेदं सम्प्रपेदे तु साम्प्रतम् ७१५

पुत्रस्योद्भवने पुंसांबावनं भुवनाधिकम्
भवेत्पुष्पवनं पुत्राभावे पितृवनं घनम् ७१६

एवं सन्तानदारिद्र्येण विद्रुतान्तःकरणा दुःखसमुद्रमग्ना उपद्रवशतच्छिद्रहृदया सुभद्रेव चित्तनिक्षिप्तधनञ्जया, द्रुपदराजपुत्रीव भीमसन्तापसन्तप्ता, सत्यवतीव भीष्मचिन्तानुविद्धा, रतिरिव अङ्गजाभावकर्शिता, किङ्कर्तव्यमौढ्यमभिपन्ना, नितरां खिन्ना, सुतरां विषण्णा चातितरामवसन्ना शतधेव हृदि भिन्ना, अङ्कुशेनेव तुन्ना सुखाशातन्तोरिव विच्छिन्ना, दीनदीना, दूनदूना समाधानहीना वन्ध्यात्वदुःखेन। स्वाङ्गेष्विव लीना अमितशोकसंताना संतानाभावचितासंतापोच्छूना नागाम्बा रहसि सुताभावसमदुःखदुर्ललितं सन्तत्यभावेन स्वं सर्वं स्वं व्यर्थमेव मन्यमानं जुगुप्सितमिव जीवने, आचान्तमिव चिन्ताभिः, दष्टमिव कष्टाशीविषैः बाधितमिव व्याधिभिः, विषयीकृतमिव विषादैः, वशीकृतमिव वैक्लव्येन निगीर्णमिव वैवर्ण्येन, कवलीकृतमिव क्लेशेन, क्षेत्रीकृतमिव क्षयिष्णुतया पीतमिव यातनाभिः, क्रीतमिव कार्पण्येन, जग्धमिव जूत्या आघ्रातमिव प्रेताधिपतिना, ग्रासीकृतमिव त्रासेन, दासीकृतमिव दौःस्थ्येन, विरलं वचसि, तरलं मनसि, विव्हलं वपुषि, आक्रान्तं नैराश्येन, आमृष्टं आधिभिः, अतितान्तं व्यथाभिः निजकान्तमेकान्त उपसृत्य सविनयमभाणीदेणीदृक् ।

न जानेऽहं तु मज्जाने किं मया दुष्कृतं कृतम्
जन्मान्तरे पुत्रजन्म यन्मेऽभून्नात्र जन्मनि ७१७

शिशवो घातिताः किं नु गोवत्साः पशवोऽपि वा
मया दुग्धमुखा दग्धहस्तया मुग्धया पुरा ७१८

मातृत्व वञ्चिताचाहमतिमात्र मपत्रपे
जनानां पुरतः स्थातुं न मात्राऽत्रास्ति मच्छुचाम् ७१९

अम्बा सम्बोधनार्हा स्त्री वन्द्याऽनुस्वारलोपिता
वन्ध्या तु स्याज्जगत्यस्मिन् वध्यैव जनदृष्टितः ७२०

अम्बा तु जगदालम्बा लम्बोदरगुहप्रसूः
चिरमाराधिता किं तु मयाऽसौ न प्रसीदति ७२१

किं तया कान्तया कान्त हन्त या सन्तर्ति कुले
न सन्तनोति सा वंशच्छिन्निकृन्तनिका स्मृता ७२२

शरणं व्रजाव चरणं यतीशितुः
गुरु-शम्भुरूप-हरशम्भुसद्गुरोः
करुणारसेन वरुणालयः स नौ
तरणीभवेच्च तरणे शुगम्बुधेः ॥७२३॥

गुरुरेष शम्भु शिवपूर्वको दिव–
स्तरुरेव संश्रितवतां भजताम्
दययास्य सत्सु विहितोदयया
किमु दुर्लभं नु जगतीवलये ॥७२४॥

स ब्रह्मचर्ये तु सनत्कुमारः
साक्षात्कुमारो विबुधावने च
मारं जयन् हृत्सुकुमार एषः
क्षमो हि नौ दातुमयं कुमारं ॥७२५॥

गुरोरनुग्रहस्सूते मनुजानां शुभं सदा
तेन वन्ध्याप्यहो सूते सत्पुत्रं चित्रमत्र किं ॥७२६॥

वन्ध्यात्वमूलनिन्द्यत्वमपनोदयितुं च नौ
वन्द्यं सर्वाभिनन्द्यं च प्रयाम शरणं गुरुम् ॥७२७॥

एवं विवेकशालिन्या सद्गुणमालिन्या समुपासितजगदम्बया नागमाम्बया अम्बुज मुकुलविडम्बिना करसम्पुटेन अनुनाथितस्तस्या नाथः नागलिङ्गप्पमहोदयः नागाम्बाया अपि विनतायाः, सुनीत्या- अपि सम्पोषितसुरुच्याः, अनसूयाया अपि अत्रिनयनानाकर्षितायाः, सत्य, अपि अनुत्पादितकुमारायाः, सुश्रियोऽपि अचञ्चलाया धर्मवर्मणः स्वदत्त शर्मणः धर्मपत्न्या अनुरूपमाभिजात्यस्य, उचितं वंशगौरवस्य, सदृशं शैवसंस्कृतेः अनुकूलमध्यात्मनिष्ठाया अनुगुणं शिवाचार्यशिष्यताया वदनशुक्तिसम्पुटमुक्तमुक्ताफलोपमं युक्तियुक्तमभियुक्तसंमतमुक्तिजातं लिङ्गप्पः संश्रुत्य, आदृत्य, अनुमत्य, अनुसृत्य, उपसृत्य, गुरुपादमूलो प्रणिपत्य, स्वमपत्याभावमूलकं मनोवैयात्यं विधिवैपरीत्यं च निवेदयामास ।

अनयोश्च हरगुरुनिष्ठयोः दम्पत्योः वैक्लव्यं मनसः, वैह्वल्य- मात्मनः, वैक्लव्यं वपुषः, वैपुल्यमाधीनां वैफल्यमायुषः, वैरस्यं विषयेषु औदास्यं जीविते, नैराश्यमिहजन्मनि समीक्ष्य विद्रुतान्तःकरणाः विहित परोपकरणाः अनुष्ठितसदाचरणाः तेजसा सन्तुलितोष्णकिरणा वर्णोनारुणा रुणाः दीनोद्यत्करुणाः सदाशिवभक्तिस्फुरणाः शिष्याधिव्याधिनिवारणाः साधुशरणाः धरणीतलाभरणायमानाः श्री शिवाचार्यवर्याः तौ दम्पती दृष्टिपातरिव पावयन्तः कटाक्षविक्षेपैरिव क्षालयन्तः अमृतरसैरिव सिञ्चन्तः मधुधाराभिरिव स्नपयन्तः मधुवृष्ट्येव मोदयन्तः पर्जन्यगर्जितो र्जितेन सन्तर्जितनिर्जरनिर्झरिणीवीचीस्वनेन स्वरेण प्रावोचन् ।

हन्त किं तात तान्तोऽसि चिन्तया सन्ततेरिह
अन्तरङ्गे च सन्तापैस्त्वं ताम्यसि निरन्तरम् ॥७२८॥

अराधय शिवं देवं नीराजय गिरेः सुताम्
घोरापदः समुद्धर्तुं मारारेः कोऽपरः क्षमः ॥७२९॥

इच्छामात्राज्जगत्सूते यः सर्वं हि चराचरम्
यदि तस्यानुग्रहः स्यात्किं न सूते सती सुतम् ॥७३०॥

किं तात सन्ताम्यसि हन्त चिन्ता-
सन्तानतः सन्ततमेव पत्न्या
सन्तानशाखीश्वरमन्तरङ्गे
सन्तानलाभाय भजेष्टपूर्त्यै ॥७३१॥

यदि शं लषे स्त्वमनिशं कुरु ह्यसौ
गिरिशं सुभक्ति भरतो दिवानिशम्
भज तं तदस्य यजनं च पूजनं
सुजनं प्रतीष्टसृजनं विधास्यति ॥७३२॥

तव भक्त्या यदि स्थाणौ दयाङ्कुरसमुद्गतिः
तदा वन्ध्यापि विन्देत नन्दनाख्यफलं सती ॥७३३॥

एवं माधुर्यमुद्गिरत्सद्गुरोरशुभनाशमुद्गरायमाणं जलमुग्ध्वनि गम्भीरस्वरमुपदेशवचनमाकर्ण्य गद्गदकण्ठः प्रत्युवाच महालिङ्गप्प-महोदयः। "भगवन् योग्यमेव भवदुदितं, सर्वथा श्लाघ्यं च। आराध्य एव शिवः। सम्पाद्य एव तदनुग्रहः। प्रसाद्य एव गणेश्वरः। आसाद्य एव पञ्चाचार्य कृपाविशेषः। परं मादृशैः पामरैः अमरोत्तमसेवादिमात्र-समुपलभ्यः कथं लभ्येत परमेश्वरप्रसादः। गुरुद्वारा एव हरः प्रसाद कृदिति कथयन्ति चार्या भवादृश आचार्याश्च।

अत एव नः कुलपरम्परागुरुवरा अत्रभवन्तो भवन्त एव भवन्ति भवस्वरूपाः। अतोऽस्मद्गुरुमूर्ति श्रीमत एव हरस्य चरमूर्ति भाव-यित्वा सेवामहे यथाशक्ति। अतः क्रियतामनुग्रहः। स्वीक्रियतां सेवा। अङ्गीक्रियतामयं जनः आत्मीयत्वेन। संस्क्रियतां मन्त्रोपदेशेन। परि-ष्क्रियतां नः आचारविचारादिकं। निराक्रियतामस्मज्जाड्यम्। ऊरी-क्रियतामातिथ्यम्। दूरीक्रियतां सङ्कोचः। पुरस्क्रियतां शिष्य-वात्सल्यम्। परिष्क्रियतां श्रीमतां शिष्यजनोद्दिधीर्षा। अपाक्रियतां नः दुरदृष्टम्। उपक्रियतामयं भृत्यजनः। पवित्रीक्रियतां नः ग्रहा-

ङ्गणं भवतां पादधूलीभिः। सकृदलङ्क्रियतां सन्निधानेन मम मन्दिरम्। उररीक्रियतां मया विधास्यमाना पादपूजा। प्रादुष्क्रियतां मयि शिष्यप्रेम। आविष्क्रियतां श्रीमतां भक्ता शिष्यजनोपचिकीर्षा च इति।

एवं सम्प्रार्थिताः श्री शिवाचार्ययोगीश्वराः शिष्योत्तममनुजिघृक्षन्तस्तदपेक्षामनुरुध्य पादपूजास्वीकरणाय महालिङ्गप्पमहोदयस्य निकेतनमुपाययुः श्रावणसोमवासरे। क्षपाकरकलाभिलक्षितकपर्दः साक्षाद्विरूपाक्ष एव स्वक्षयमक्षयं कर्तुमपेक्षया स्वकुटुम्बस्य च रिरक्षयिषया आत्मनश्च अनुजिघृक्षया समागच्छदिति समुच्छलदुत्साहः समुद्रिच्यमानभक्तिभरोच्छ्रितः महतोत्साहेन गुरुपादपूजां बृहदुत्सवमिव निरवर्तयत ससम्भ्रमसमारम्भं नागलिङ्गप्पः। पादपूजाकाले रूप्यकपञ्चकानि दक्षिणारूपेण समर्पयत्। श्रीमदाचार्यपादास्तु नागलिङ्गप्पदम्पत्योः भक्तियुक्तं पादपूजामात्रं स्वीकृत्य न स्वीचक्रुः दक्षिणाम्।

तन्निरीक्ष्यातिमात्रं खिन्नौ अतितरां च विषण्णौ नागलिङ्गप्पदम्पती निभाल्य गुरुवरेण्याः सान्त्वनपरध्वनौ जगदुः।

न द्वेषान्न त्वयि त्वेषान्न रोषान्नान्यदोषतः
त्वद्दत्ता दक्षिणा त्यक्ता किन्त्वेको नियमो मम ॥७३४॥

यावन्न युवयोर्देवः सन्ततिं नैव दास्यति
तावन्न दक्षिणां क्वापि स्वीकरिष्यामि तद् व्रतम् ॥७३५॥

तथेति त्वं व्यथां चित्ते मा कृथाः सर्वथा वृथा
मम साग्रह संस्तुत्या भर्गस्त्वानुगृहीष्यति ॥७३५॥

एवमाश्वास्य विश्वास्य च दम्पती स्वाश्रमं निववृतिरे आचार्यपादाः।

तथाविधानां च सतां हि वाणी
कथं वृथा स्याद्वितथापि वात्र
वत्सं च तद्वत्सरपूरणात् प्राक्
प्रासूत वात्सल्यमयी च नागा ॥७३७॥

तावेकवर्षान्तर एव काले
फलेर्ग्रहिं वीक्ष्य मनोरथं स्वम्
गुरुग्रहानुग्रहभाग्यवर्षं
हर्षप्रकर्षं ययतुर्विदित्वा ॥७३८॥

तपःसिद्धशिवाचार्यानुग्रहात् स्वमनोरथः
प्रापत्सिद्धिपथं चेति सिद्ध पुत्रफलं तयोः ॥७३९॥

गुरुप्रसादो बलवान् स्वभक्त-
चिन्तावसादो विगलद्विषादः
वन्ध्यानुविन्द्यादपि नन्दनं स्वं
वन्द्याभिनन्द्या च भवेद्धि येन ॥७४०॥

तस्मादयं सिद्धनामा प्रसिद्धः स्यात्सुतस्त्विति
सिद्धेति नाम चक्राते तौ सुतस्य मुदा तदा ॥७४१॥

एवं सफलेऽपि मनोरथे, जातेऽपि सुते, आनन्दतुन्दिलेष्वपि, बन्धुषु प्रसन्नेऽपि चेतसि, सोत्साहमाचरितेष्वपि पुत्रोत्सवेषु, कृतकार्यौ महा-लिङ्गप्पदम्पती व्यस्मरतां गुरुम् । नाचिन्तयतां स्मरारिम् । नाग-णयतां हरगुरुप्रसादम् । नाददतां गुरवे सङ्कल्पितामपि शतार्धरूप्यक परिमितां दक्षिणाम् ।

एवं श्री शिवाचार्यमुखानां गुरुप्रमुखाणां विषये नागप्पदम्पत्योः वैमुख्य रूपमुख्यकारणात् ।

सुतोऽयं कार्श्यमापन्नो रुग्णो भग्नबलोऽभवत्
चिन्ताचक्रभ्रमिभ्रान्तावभूतां दम्पती पुनः ॥७४२॥

एकस्मिन् दिने विजापूरवर्तिबृहन्मठस्य बहिर्वितर्दिकामध्यमध्यासीनेषु अहस्करमहामहोमदतस्करेषु मस्करिवरेण्येषु गुर्वग्रगण्येषु श्री शिवाचार्येषु, चिन्ताक्रान्ता पुत्रानारोग्यभयभ्रान्ता खिन्नस्वान्ता नैकविधौषधोपचारविधानपरिश्रान्ता मनसि नितान्ततान्ता वपुष्यपि बहुक्लान्ता महालिङ्गप्पस्य माता क्षीणक्षीणं, दष्टमिव रोगाहिना, भ्रष्टमिव आरोग्यसौधात् सुदूराकृष्टमिव उल्लाघतासीम्नः दृष्टमिव यमेन, आश्लिष्टमिव आमयैः, आघ्रातमिव अनित्यतया, कटाक्षितमिव क्षयेण, गृहीतमिवः बालग्रहेण, द्वारि मृत्योः सविधे सर्वनाशस्य, उपान्ते अन्तकस्य, सीम्नि, संयमनीपुरस्य, जिव्हायां जीवितेश्वरस्य, वर्तमानं स्वपौत्रं सिद्दप्प शिशुं हस्तप्रकोष्ठाभ्यन्तरे शाययित्वा भिषग्वरभवनं प्रति चिकित्साविधानार्थं नयति स्म । तां च तथाविधं रुग्णशिशुं गृहीत्वा गच्छन्तीं स्थविरां आकार्य स्वसमीपमानाय्य श्री शम्भुलिङ्गशिवाचार्यवर्यः तस्य शिशो र्व्याधिबाधितं शरीरं सकरुणं सानुग्रहं च वरदहस्तेनाममर्श । आचचक्षे च सदयेक्षणं निरीक्ष्य - अम्ब

भगवानगजाजानिरगदङ्करणं शिशोः
आरोग्यरूपसौभाग्यं न चिरात्संप्रयच्छतु ॥७४३॥

शिशुः पशुपतेराशीराशीनासाद्य वर्धताम्
इत्याशासेऽखिलाशेशस्तुतमीशं तदर्थयं ॥७४४॥

चिकित्सकालयं मा त्वं गच्छ वत्सस्य वत्सले
चिकित्सार्थे भजामीशं सर्वरोगहरो हरः ॥७४५॥

स्वयं विषादी भजतां विषादं
निषूदयत्येव वृषध्वजो हरः

तथैव शूली हरते स्वभक्त-
कृतां हि शूलान्यखिलानि मंक्षु ॥७४६॥

तव पौत्रं कृपापात्रमतिमात्रं ममाधुना
त्रिनेत्रस्त्रास्यते नूनं किं त्वया त्रस्यते वृथा ॥७४७॥

एवं समाश्रितभक्तजनसुरतरूणां परमगुरूणां विहितहितरचनेन अभयवचनेन समाश्वासिता गुरुभक्तप्रवरा सा स्थविरा प्रणम्य गुरुपदयोः शिशुमपि पुनः पुनः योगिराजानां राजीवशोभाराजि चरणयुगलयोरुपरि लोठयित्वा तेषां पादपांसुपरागधूसरभासुराङ्गं स्वपौत्रं सानन्दमनीनयत्स्वगेहं गुरुवरवरवचनोपदेशादेशानुसारेण ।

गुरूणां वचनं तथ्यं पथ्यं तत्सत्यमप्यभूत्
आतुरः कातरो बालो लब्धेवोल्लाघताभगात् ॥७४८॥

एवं शुद्धमनस्कानां संसाधित सकलसिद्धीनां सदा सदाशिवपादबद्धबुद्धीनां श्री शम्भुलिङ्गशिवाचार्याभिधसिद्धप्रसिद्धयोगिनां वरद हस्तस्पर्शरूपसिद्धौषधस्य महिम्ना, आशीर्वादभूम्ना च जूतिजग्धः मूर्छामुग्धः रोगदग्धः जीवितसन्दिग्धश्च सः सिद्धनामा बालकः कायकल्पं प्रापित इव पुनर्जन्मयापित इव, सञ्जीविन्योपचरित इव अमृतबिन्दून् प्राशित इव, मृत्युहस्तादाच्छिद्यानीत इव, प्रेतपुरीतः प्रत्यावर्तित इव, पुनर्जीवने प्रवेशित इव आमय मुक्तो ज्वरत्यक्तः आरोग्ययुक्तो विलक्षणतेजः सम्परिष्वक्तः बलेन जुष्टः गुर्वाशीरभिवृष्टः सर्वोत्कृष्टः प्रावर्धत आरोग्यभाग्यसम्पन्नः ।

तद्दिनादारभ्य महलिङ्गप्पमहोदयस्य ग्रहदशैव परिवर्तिताऽभूत् । उत्तरोत्तरोत्कर्षः अधिकाधिकः प्रहर्षः सौभाग्याभिवर्षः सम्पत्प्रकर्षः सन्तानाभिवृद्धिः सर्वमनोरथसंसिद्धिश्च स्वयमेव क्रमेण सम्बभूवुः ।

रामलक्ष्मणभरतशत्रुघ्ना इव चत्वारः चतुराः पुत्राः अमन्दानन्द-तुन्दिलमकुर्वन् महालिङ्गप्पस्य गार्हस्थ्यजीवनम् । अपारामेव सम्पादयामास अकम्पया गुरुगर्वनुकम्पया सम्पदम् । देवमातृक-नदीमातृकाणि नैकक्षत्राणि, सहस्राधिकजनभोजनोपयुक्तानि बहुविधपात्राणि, पत्नी-पुत्रादिकलेवराऽलंकरणानि, मौक्तिकाभरणानि प्रत्नानि, नूत्नानि च नानारत्नानि शारदशशिविशदं च यशः अन्यान्यदपि सर्वं गार्हस्थ्यजीवनोपयुक्तं समपीपदत् ।

लेभे च लाभं न चकार लोभम् नावञ्चयत् कञ्चन पूरुषं वा ।

अथापि वित्तं ननु सञ्चिकाय क्षेत्रं च किञ्चालय काञ्चनादि ॥

अक्रीणाच्च वैभवप्रापणानि नानापणानि ।

किं वहुना गुरुचरणैकशरणः स महालिङ्गप्पमहोदयः ।

सानन्दं ननु मन्दिरं गुणवतीं पत्नीं च रत्नायितां ।
वाणिज्ये पटुताप्रयोज्यविभवं प्राज्यं च भोज्यं सुखम्
आनम्रांस्तनयान् सदा सविनयान् भृत्यांश्च नीत्या युतान्
उर्व्यां सर्वमवाप भाग्यमतुलं गुर्वाशिषा भक्तिमान् ॥७४९॥

अवापत्सामान्योऽव्ययमथमसामान्यविभवं
अनन्यं धन्यत्वं गुरुशरणमान्यत्वमपि यत्
सुभाग्यं सन्तानं सुगुणगृहिणीबान्धवसुखं
त्विदं मेने सर्वं स्वगुरुकरुणालब्धमिति सः ॥७५०॥

क्षणे क्षणेऽस्मिन् ववृधेऽस्य भक्ति-
र्हरे गुरौ शम्भुशिवाभिधाने
दिने दिने भाग्यमपीह तस्य
वृद्धं समृद्धं सुखजीवनं च ॥७५१॥

एवं तस्य सुताः सर्वे महालिङ्गप्पमन्वयुः
शम्भुलिङ्गशिवाचार्यभक्ता एवाभवन्मुदा ॥७५२॥

श्रीमन्महालिङ्गकुटुम्बमेव
श्री शम्भुलिङ्गाङ्घ्रियुगावलम्बम्
भेजेऽविलम्बं सुख-शान्ति-मान-
स्थानर्धि-सौभाग्य-कदम्बमेव ॥७५३॥

आर्या भार्या शम्भु-सेवैक-कार्या
वत्साः श्रीमच्छम्भुसेवोत्सुकाश्च
माहालिङ्गः शम्भुलिङ्गान्तरङ्गः
सर्वे शर्वाम्भोधिभक्तेस्तरङ्गाः ॥७५४॥

॥ इति दशमस्तरङ्गः ॥

॥ अथ एकादशस्तरङ्गः ॥

एकदा सर्वभावुकजनाकर्षणकेन्द्रे श्री शम्भुलिङ्गशिवयोगिना तपोभूमौ सिद्धिक्षत्रे अलकापत्तन इव पुण्यजनाधिष्ठिते, इन्द्रपुर इव सुधर्मालङ्कृते, सुरसदसीव विबुधोपसेविते, कैलासशैल इव शम्भुसनाथे, वृषपर्वास्थान इव कविपुङ्गवमण्डिते, श्वेतद्वीप इव सारस्वतवैभवो द्दीपिते, मृच्छकटिकानाटक इव समादृतशूद्रके, पुष्करक्षेत्र इव ब्रह्मोपलालिते, दिवाकाश इव नक्षत्रवर्जिते, सत्यनारायणाख्यान इव वैश्याभिपूजिते, यज्ञकार्य इव सुमनोविकाससम्पादके, जातिपक्षपातशून्ये दीनदरिद्राश्रये योगाश्रमे प्रतिसांवत्सरिकः प्रवर्तते स्म परमार्थमहोत्सवः ।

तत्र तस्मिश्च विंशति सहस्राधिकानां आपामरपण्डितानां आविपालगोपालानां आरङ्कराजानां आभिक्षुलक्षाधीशानां आपञ्चमपरिव्राजानां च मिलितानां बहूनां जनानां शब्दमय इव कलकलरवैः, नादमय इव वाद्यवृन्दैः, मन्त्रमय इव वेदघोषैः, विद्युन्मय इव इतस्ततः सञ्चरच्चञ्चलाक्षीभिः, विलासमय इव वस्त्राभरणालङ्कृततरुणैः चैतन्यमय इव खेलद्बालयुवकैः, शृङ्गारमय इव अङ्गनाभिः, धर्ममय इव अन्नदानैः पुण्यमय इव प्रवचनैः, तपोमय इव हरगुरुध्यानोपासनैः, प्रशान्तमय इव मौनिमुनिभिः, क्रीडामय इव विविधलीलाभिः परागमय इव जनसंमर्दोत्थपांसुभिः, कैलासमय इव शिवार्चनैः कर्पूरमय इव मन्दहासैः विपणिमय इव नवनिर्मितापणगणैः मुक्तामय इव जनानने सन्दृश्यमानस्वेदबिन्दुभिः, वैराग्यमय इव विरक्तभक्तसाधुसङ्घैः नानारूपे प्रवर्तमाने तस्मिन्परमार्थमहोत्सवे, तत्प्रवर्तकमहाचा-

र्याणां, सर्वजनोद्धारबद्धादराणां, लोककल्याणार्थमेव व्ययीकृतस्वपुण्य-तपःफलसर्वस्वानां, श्री शम्भुलिङ्गशिवयोगीन्द्राणां एकान्तभक्तः अच्छिन्नभृत्यः, अखण्डसेवकः, परमार्थशिष्यः श्री महालिङ्गप्पमहोदयोऽपि सपुत्रं सकलत्रं समित्रपरिवारं च दिदृक्षया महोत्सवस्य, जिघृक्षया गुर्वनुग्रहस्य, बुभुक्षया आध्यात्मिकविचारान्नस्य, मुमुक्षया सांसारिक बन्धनात्, दिधिक्षया पापराशीनां, विसिसृक्षया स्वैश्वर्यस्य योग्यकर्मसु, विविक्षया सन्मार्गे, विवक्षया विविधकार्यभारस्य, योगाश्रमं पूर्वमेवागत्य, गुरुमहोदयानामाशयं च मुखेनानुक्तोऽपि इङ्गितैरेव विज्ञाय निर्गतालस्यं विधूतौदास्यं अगणितकायक्लेशं अनालोचितधनव्ययं निर्विचारलेशं तत्तत्कार्यजातं कुर्वन्नेवासीत् ।

तदेकस्मिन् दिने आश्रमस्यैकस्मिन् कोणेयोगीश्वराणां समन्दस्मितं गम्भीरभावोज्वलं सुप्रशान्तमुखमुद्रं जितसौम्यसमुद्रं स्फुटयोगमुद्र उन्निद्रमिवारविन्दं आलोचकलोकलोचनासेचकं शम्भुलिङ्गशिवाचार्याणामेकं मसृणकागदलिखितमद्राक्षीत् चित्रम् । चतुर्भिः शङ्कुभिः चतुः कोणेषु उत्कीर्य भित्तिलगितं तच्चित्रं पांसुधूसरं उपरितन-छदि-भित्ति-सन्धि - रन्ध्रानुप्रविष्ट-मृण्मय-वर्षावारि-बिन्दु-सन्दोह-स्पन्दनोन्दन-कलुषीकृतं क्लिन्नं मध्ये मध्ये छिन्नविच्छिन्नं चासीत् ।

तदवस्थं च गुरूणां प्रतिकृतिचित्रं निभालयित्वा खिन्नो विषण्णश्च महालिङ्गप्पः सत्वरमेव गुरुवरसन्निधिमुपेत्य, तदनुमतिमपि कथङ्कार मप्यधिगत्य, जोधपुरतः श्रीं शम्भुलिङ्गशिवाचार्य देशिकेन्द्राणां, अमृतशिलामयीं अतिसुन्दरां चञ्चच्चैतन्यभावबन्धुरां चित्रप्रतिमाप्रतिकृतिं विरचय्य आनीय योगाश्रमे संस्थापयामास ।

सा चाद्यापि मञ्जु-प्रभा-पुञ्ज-निर्मित-सुधा-धवल-दीधिति-पञ्जर, पिञ्जरित-परिसर-प्रान्ता निरीक्षक-चक्षु-मरीचि-निचय-प्रतिहन्त्री-स्वच्छाच्छ-श्वेत-कान्ति-कमनीया विद्युत्किरणैरिव निर्मिता, शङ्खभस्मभिरिव विरचिता, कर्पूरोपादानैरिव निष्पादिता, शोषित बिसच्छेदचूर्णै-

रिव घटिता, पेषितमुक्तापरागैरिव विच्छुरिता, शारदारम्भकाभ्रपरमाणुभिरिव रूपिता, पिण्डीभूतशुष्क-क्षीरोदडिण्डीर-खण्डैरिव उत्पादिता श्वेतद्वीपशिलाशकलैरिव संयोजिता, मन्दारकिञ्जल्कैरिव सञ्चर्चिता, सुधारसैरिव सङ्कलिता, तदिन्मयीव कान्त्या, तेजोमयीव त्विषा, कान्तिमयीव सुषुम्ना, मन्दहासमयीव विकसितोष्ठपुटेन, कमलमयीव चक्षुस्सौन्दर्येण, पीयूषमयीव प्रशान्तरोचिषा, गांभीर्यमयीव मौनमुद्रया, तपोमयीव निमीलतलोचनाभ्यां, चैतन्यमयीव चारुतातिशयेन संलक्ष्यमाणा, लक्षाधिक-जन-लक्षवेधन-क्षम-विलक्षण-शिल्प-सौन्दर्य-समुद्भासिता, अमृतशिलासमुट्टङ्किता श्रीजगद्गुरूणां मूर्तिः श्री महालिङ्गप्पकुटुंबस्य निरतिशयगुरुभक्तिसाक्षीभूता योगाश्रमे लालसीति ।

तां च सौधशिलाशकलविनिर्मितां गुरुप्रतिमां सुदूरजोधपूरपुरीतः, आश्रममानाय्य विधिपूर्वकं तत्प्रतिष्ठामहोत्सवमपि महतोत्साहेन निर्वर्तयामास श्री महालिङ्गप्पमहोदयः ।

तदर्थं च सञ्जातं पञ्चविंशतिसहस्ररूप्यकव्ययमपि नाजीगणद् गुर्वनुग्रह-कण-लाभ-क्षणमेव महाक्षणमिति गणयन् अगणितातुलित-सद्गुण-मणि-खणी-भूतः सः भक्तशिरोमणिः ।

तत्कालादारभ्याद्ययावत् सद्गुरुपदपद्मबद्धश्रद्धः गुर्वर्पितसर्वस्वः महालिङ्प्पमहोदयः गुरुपित्रादेशानुसारणचतुराः तस्य चत्वारोऽपि पुत्राश्च, श्रीयोगाश्रमस्य शोभावृद्ध्यर्थं तत्र तदा तदा अथवा सदाऽपि प्रवर्तमान सर्वविध-धार्मिकाध्यात्मिक-सांस्कृतिक-कार्य-क्रमान् यशः किरीटजुष्टानाकलयितुं वपुषा मनसा धनेन दानेन च सर्वविधमपि सहकारं सहयोगं सहायं विधाय धन्यमाकलयन्ति आत्मानम् ।

सार्थकीकुर्वन्ति स्वीयं जन्म सफलयन्ति स्वं मानुष्यकं जीवितम् । पावयन्ति शरीरम् । ततश्च स्वयमपि तेन समश्नुवन्ति पुण्यम् । प्राञ्-

वन्ति भाग्यम् । लभन्ते इहैव इष्टार्थान् । भुञ्जन्ति इहामुत्रचाऽखि-
लानपि गुरुप्रसादजान् भोगान् ।

गुरौ प्रसन्ने करुणोपपन्ने
किं नाम लोकेऽत्र नु दुर्लभं स्यात्
खिन्नोऽवसन्नोऽपि दयां प्रपन्नः
सम्पन्नतामेति गुरोः सुभाग्यैः ॥७५५॥

गुरोर्यदि स्यान्नु दयोदयोऽत्र
स्थाणुर्हि शुष्कोऽपि च पुष्पितः स्यात्
वन्ध्यापि गौः स्यन्दयते च दुग्धम्
पीयूषतामेति विषोऽविषह्यः ७५६॥

ईदृङ्महामहिमशालिमहानुभावाः
मह्यां न सन्ति विपुलाः सफलात्मकायाः
तादृक्षतीव विरळेषु च सिद्धपुंस्सु
श्री शम्भुराट् सुमहितो हितकृत्परेषाम् ॥७५७॥

सोऽयं प्रपञ्च-गत-पञ्चजनेड्य-पञ्चा
चार्य-प्रसाद-समुदञ्चित-योगसिद्धिः
वाक्शुद्धिरष्टाविधसिद्धिसमृद्धिशाली
लोकोदयाय नियुनक्त्यखिलाः स्वसिद्धीः ॥७५८॥

प्राचां ज्ञानसमृद्धिरात्मविदुषामाचारशुद्धिः सतां
साधूनां च तपोबलं मुनिगणस्याध्यात्मसिद्धिः परा
ब्रह्मण्यद्भुतशक्तिरीश्वरपदोर्भक्तिस्तथा योगिनां
साकारा हि वसन्ति चात्र हि मुनावेकत्र शम्भौ गुरौ ॥७५९॥

वन्ध्या अप्यनपत्यताभिधनिमित्तादत्र निन्द्या भुवि
वन्द्याङ्घ्रि-द्वय-दीन-बन्धु-यमिनो यस्यानुविन्द्याऽशिषः
कन्दर्पाबवेन्दु-सुन्दर-मुखान् विन्दन्ति सन्नन्दनान्
नन्दन्तीदृशसद्गुरुं भुवि न को वन्देत मन्देतरः ॥७६०॥

आन्ध्याख्यान्धतमोनिमग्नमनुजा यस्य प्रसादादिह
विन्देयुर्ननु दृष्टिपाटवमथो सन्दर्शनानन्दथुम्
नन्देयु धृतराष्ट्रदुर्धरदशादौस्थ्यस्थितेरुद्धृताः
वन्देरन्नपि तं दयाघननिधिं को नाभिनंदेत्सुधीः ॥७६१॥

लोकोद्धार-परोपकार-जनता-शोकापनोदादिना
क्षोणीक्षेमविधानदक्षयमिनो यस्याशिषा श्रीपुषा
नैका एव मुखोक्ति-शक्ति-विकलामूकाः सुवाकोदया-
ज्जल्पाका मधुपाकरम्यवचना स्तं कः क्षमो वर्णितुम् ॥७६२॥

अस्य श्री यतिपुङ्गवस्य करुणापाङ्गादपाङ्गा ययु-
स्तुङ्गाद्रेरपि शृङ्गलङ्घनकृतौ जङ्घालतां पङ्गवः
रोगार्ता अपि योगिनोऽस्य दयया चोल्लाघतामाप्नुवन्
दारिद्र्याद्दलिताश्च वैभवयुता नैके श्रिया लालिताः ॥७६३॥

एवममीषां च यमीश्वराणां दीन-दलित-हीन-स्खलित-दून दमितामित-जन-स्फुरणयाऽसीमकरुणया उद्धारमितेषु सद्भक्तेषु बेळगलीग्रामाभिजनः लिङ्गराजमहोदयः प्रामुख्यनोल्लेखमर्हति ।

पूर्वोक्तः श्री लिङ्गराजमहोदयः यद्यपि न पण्डितः नापि विद्यावान् । तथापि साधुस्वभावः, हरगुरुभक्तः, अध्यात्मनिष्ठः अकृतपरोपद्रवः, परोपकारशीलः अहिंसकः दानधर्मप्रवृत्तिमान् साधुचरितः, सद्गुणभरितः, भक्तिरसपरिपूरितः, संमान्यसद्गृहस्थः स रामतीर्थाभिधशिक्षकैः सह योगाश्रममुपागत्य वारंवारं श्रीसद्गुरूणाम

त्यद्भुतमहिमानुभावेन विस्मित, तत्प्रभावाकृष्टः, सुतरां हृतहृदयः, नितरामावर्जितमना, अतितरां तद्गुरुभक्तः समजनिष्ट ।

एवं शतशोऽनुभूतगुर्वनुभावप्रभावितः सम्भावितः स्वभावतो भावुकः स लिङ्गराजमहोदयः कदाचिदभ्युद्रिक्तगुरुभक्तिः सद्गुरु-चरणसन्निधिमुपसृत्य प्रार्थयामास सविनयं साञ्जलिबन्धं च–

"भगवन् अहं तु दरिद्रः । भवादृशः पुण्यपुरुषानुपनिमन्त्रयितुं नास्त्येव मम योग्यता । अथापि भवत्पादाम्बुजनिष्ठैव मां मुखरयति प्रचोदयति च ।

अतो वः सम्प्रार्थये सकृदस्मद्गृहमागन्तुम् । श्री श्रीमतां शिव-पूजाऽस्माकं भवने भवेदिति नश्चिरकालीनामपेक्षामाकांक्षां चाभिपूरयन्तु सफलयन्तु च नः सर्वेषामपि दरिद्रकुटुम्बीयानामभ्यर्थनाम् । अनुगृ-ण्हन्तु इमान् दीन दून भक्तान् भवत्पादाब्जसक्तान् । उद्धरन्तु इमान् शिष्यपरमाणूनत्रभवन्तो भवन्तः इति ।

शिष्यवत्सलाश्च आचार्यपादा इमां स्वभक्तस्य प्रार्थनामनुरुध्य श्री लिङ्गराजमहोदयस्य भवनमुपासीसदन् ।

तदा भक्तिभावोद्रिक्तान्तःकरणः गुरुपादरजःशीर्षाभरणः समुपासितशम्भुलिङ्गपूज्यचरणः विहितश्रेष्ठसज्जनपरिचरणः सर्वदाऽपि विधीयमानहरगुरुनामोच्चरणः सदानुष्ठीयमानपरोपकरणः समासादित गुरुकरुणः हरशरणपादैकशरणः शश्वद्विहितसदाचरणः हृदि सन्ततसद्भाव स्फुरणः गुर्वागमनजसन्तोषजपुलकावरणः गुरुपादपङ्केरुहैकशरणः शिरसा तत्पादुकाद्वयोद्धरणः तरुणस्स लिङ्गराजमहोदय "एतद्गुरुरूपेण साक्षाद् हरमूर्तिरेव स्वगृहमागतेति, कलयन् ससम्भ्रममुपसृत्य गुरुवरेण्यान् उच्चासने चोपवेश्य पौनः पुन्येन प्रणिपत्य–

अद्य मे सफलं जन्माप्यद्य मे सार्थकं वपुः
जीवितं सफलं मन्ये चात्मा मे धन्यतामगात् ॥७६४॥

गुरुपादरजोधूल्या गृहं मे पावितं त्विदम्
अद्य मे पितरो नूनं यातारः शिवमन्दिरम् ॥७६५॥

गुरुपादकृपालम्बं कुटुम्बं धन्यमद्य मे
गुरोरनुग्रहं प्राप्य सार्था मे गृहमेधिता ॥७६६॥

सर्वारिष्टानि नष्टानि कष्टानि प्रहतानि च
मङ्गलान्युत्तरङ्गाणि श्रेयो भूयोऽभिवर्धितम् ॥७६७॥

क्षुद्रा दरिद्रा वयमत्र चाज्ञा
यूयं हि यद् ज्ञानगुणैः समुद्राः
नो भद्रमुन्निद्रयितुं त्विहेता-
स्तस्मात्कृतार्थाः करसत्पुमर्थाः ॥७६९॥

इति भक्ति-भरित-गद्गदाक्षरमुद्गीर्य सद्गुरोः अर्घ्यपाद्यादिकं च निवेद्य, पादपूजामहोत्सवं ससंभ्रमसमारंभं समुज्जृम्भयामास कुटुंबेन सह। तत्काले च स्वयोग्यतामतिक्रम्यैव श्रद्धाजाड्यादनाढ्योऽपि आढ्य इवोपढौकयामास गुरुदक्षिणात्वेन रूप्यकशतम्। सानंदं लिङ्गराजोपपादितं पादपूजादिकं सादरं सदयं चाददानोऽपि गुरुतल्लजः श्री शिवाचार्यः शतोत्तरैकरूप्यकात्मिकां तद्दत्तां न प्रत्यग्रही गुरुदक्षिणाम्। तद्दृष्ट्वाऽतिखिन्नमात्मानमेवातिदुर्भाग्यं मन्यमानं विमनायमानं च तं प्रियशिष्यं क्षरत्सुधारसोक्षितेन करुणाकटाक्षेणाभिवीक्ष्य समंदस्मितमगादीत् सः।

न मनाग्विमनायेथा दक्षिणाऽग्रहणान्मम
तत्रास्ति कारणं किंचित्सावधानमनाः शृणु ॥७७०॥

मच्छिष्याग्रेसरस्त्वं हि नैर्धन्याऽधन्यतां गतः
दक्षिणो दक्षिणां दातुं भूयसीं नाधुना क्षमः ॥७७१॥

तल्लक्ष्मीमनुरोत्स्यामि प्रदातुं भक्त तेऽधुना
रूप्यलक्षाधिकैश्वर्यमस्मिन्नैवैकवत्सरे ॥७७२॥

यदा लक्ष्मीकटाक्षेक्षालक्षितस्त्वं भविष्यसि
लक्षाधीशस्तदा त्वत्तः स्वीकरिष्यामि दक्षिणाम् ॥७७३॥

इत्याशीराशिनायोज्य सान्त्वयित्वा स्वशिष्यकम्
गुरवः सम्प्रयाता हि स्वं योगाश्रममश्रमम् ॥७७४॥

तेषां वाणी मधु-द्रोणी-सुधा-वीच्यनुहारिणी
कथंकारं नु मिथ्यात्वं गाहतां व्याहतार्थताम् ॥७७५॥

तद्वर्षे हर्षवर्षाऽसीद्वर्षा कर्षकहर्षिणी
विपुला सुफला भूमिः सफलः कृषिकश्रमः ॥७७६॥

क्षेत्रेषु व्युप्तमात्रेषु सस्यानां पङ्क्तिरैधत
प्रभूतधान्यदात्रीयं भूतधात्री गुरोर्गिरा ॥७७७॥

अत्यद्भुता सस्यवृद्धिर्धान्यवृद्धिस्ततोऽभवत्
धनवृद्धिश्च लिङ्गप्पो क्षणाल्लक्षेश्वरोऽभवत् ॥७७९॥

अलवैश्च यवैर्धान्यैर्गोधूमैर्यावनाळकैः
विपुलैस्तूलजालैश्च गृहं तस्य पिचण्डिलम् ॥७८०॥

अन्यान्यैबहुभिर्धान्यैरल्पान्यैर्धन्यतामगात्
धन्यग्र्यतां च भाग्याढ्य मूर्धन्यत्वं च सोऽभजत् ॥७४१॥

गुरूपज्ञं हि तत्सर्वमिति विज्ञाय शुद्धधीः
कृतज्ञः प्राज्ञशंभ्वार्यसेवां समधिकां व्यधात् ॥७८२॥

एवं समाश्रितसुरतरूणां जगद्गुरूणां निरवग्रहेण अनुग्रहेण लक्ष्मीकटाक्षलक्षितः लक्षाधीशतां चोपगतः लिङ्गराजमहोदयः दिने दिने पदे पदे च आचार्यपादानां कारुण्यातिशयानृण्यमाशंसमानः कामपि सेवां कर्तुं समीहमानः श्री स्वामिनामनुमतिमासाद्य योगाश्रम-

स्थाया अतिगभीरायाः आपातालदीर्घत्वाद्दीर्घिकेतिसार्थाभिधायाः जल-मुद्धर्तुमाश्रमनिवासिनां कायक्लेशमनुलक्ष्य नैकसहस्त्ररूप्यकराशिव्ययेन लोहमय नलिकां योजयामास । तेन च नल्लीति यन्त्रेण अपेक्षण क्षण एव वापीगतमापातालगङ्गाजलं सुलभलभ्यमभूत ।

एवमनेकविधसेवाशुश्रूषाविधिविधानैः सुप्रसन्नेषु श्री चरणेषु लिङ्गराज महोदयः स्वस्य सन्तानाकांक्षां प्रकटीचकार । लिङ्गराज-दम्पती चानन्यभावेन गुर्वाराधनं सर्वार्थसाधनं भक्तियुक्तेन चेतसा चिर-कालमतनुताम् ।

ततः कतिपयैरेवाहोभिरहो फलग्रहिः समभूदस्य मनोरथः । कन्द-र्पसुन्दरो नन्दनः सञ्जातो मातुर्वन्ध्येति मन्दनिन्दानिर्वेदमपाचकार । मन्दिरे चामन्दानन्दमन्दाकिनीमेव स्यन्दयामास वन्धुवृन्दे च ।

एवं गुरूणां करुणाकिरण-कदम्बावलम्बं-लिङ्गराजकुटुम्बं उत्त-रोत्तरमुत्कर्षं प्रहर्षमभ्युदयं चानुविन्द्य तत्प्रान्त एव गुरुभक्तिसम्प्राप्त-सौभाग्यशालि कुटुम्बमिति कीर्ति दशदिशान्तरालपूर्तिमासाद्य सममान्यत सर्वैरपि तद्देशगतसद्गृहस्थैः ।

श्री लिङ्गराज इव तत्पुत्रा अप्यद्य पञ्चपाण्डवा इव धर्मप्रधानाः विजयोल्लासिताः, अधिकाधिकमेव सौभाग्यमनुविन्दन्ति ।

तेषु चैकः गुरुचरणपरिचरणलब्धभाग्यातिशयः कर्णाटकसर्व-कारीयशासने डी. वाय. एस्. पी. ति स्थानं मानं च विन्दात नन्दति नन्दयति च वन्धुसन्दोहं स्वीयसदगुणवृन्देन ।

अन्यः गुरुकरुणाधन्यः मान्यमध्यापकपदमध्यारुह्य अखण्डं ज्ञानदान कार्यं समर्थरीत्या निर्वहति ।

अपरश्च एम्. बी. बी. एस्. इति पदवीमधिगत्य वैद्य-विद्या-वैशारद्य-वैशद्यमधिगत्य जनसेवामेव जगदीश सेवेति बुदध्या कलयन्नास्ते।

इतरश्च कृषिविद्यायां बी.एस्.सी,ति बिरुदभाग् भूत्वा कुलक्रमागते कृषिशास्त्र एव पारंगमताधौरं धरीमाबिभर्ति ।

परश्च विधिशासनाधिनियमशास्त्रे एल्, एल्. बी. पदवीमासाद्य व्यवहार कौशल्यमधिगत्य सुप्रसिद्धिं भजते ।

एवं गुरु चरणैकशरणस्य श्री लिङ्गराजस्य सर्वेऽपि नयविनय शालिनः पुत्राः गुरुभक्तियुक्ताः मातापितृसेवापरायणाः परोपकरैकव्रताः श्री शम्भुलिङ्गशिवाचार्यकरुणाहस्तावलम्बनफलसाक्षीभूता विद्यन्ते विद्योतन्ते चाद्याऽपि ।

॥ इति एकादशस्तरङ्ग ः ॥

॥ अथ द्वादशस्तरङ्गः ॥

हुलियाळुग्रामसीमासन्निकृष्टे शैलपृष्ठोपरिष्ठे योगाश्रमे सत्सु महत्सु महामहिमवत्सु आचार्यवर्येषु तप्यत्सु तपः, तृप्यत्सु दिवि देवेषु, अभिनंदत्सु मुनिमहात्मसु, हृष्यत्सु भक्तेषु, नश्यत्सु लोकानिष्टेषु पुष्यत्सु सन्मंगलेषु, प्रवहत्सु पुण्यराशिषु, सर्वत्रापि संभवत्सु कल्याणेषु, विकसत्सु दशदिक्षु गुरूणां कीर्तिकुसुमेषु, अधिगच्छन्सु सर्वत्र गुरुषु मान्यतां अभिवर्षत्सु प्रशंसापुष्पवृष्टिं भावुकेषु, सत्कुर्वत्सु गुणग्राहि ब्राह्मणेष्वपि गुरुवरं, मानयत्सु क्षत्रियेषु, प्रणमत्सु वैश्येषु आद्रियमाणेषु शूद्रेषु स्तुवत्सु सर्वजनेषु, अभिमन्यमानेषु वीरशैवेषु, तदेतद्, घनतर-गुरुवर-गौरव-गरिमाणं नासहन्त केचन नीचविचारगोचरकुचेतसो दुश्चेतनाः । स्वजातीयेष्वेव कतिचन नामर्षयन्तापरमर्षिप्रवरस्य समुत्कर्षम् ।

परोत्कर्षासहिष्णुता नाम स्वभाव एव दुर्जनानाम् । न खलु खलास्तिलमात्रमपि मृष्यन्ति अभ्युदयं नाम परेषाम् ।

निष्कारणमेव द्विषन्ति सतः । निर्निमित्तमेव द्रुह्यन्ति महद्भ्यः । विनापि स्वप्रयोजनमभ्यसूयन्ति परोपकारकृद्भ्यः । विघ्नमुत्पाद्य प्रहृष्यन्ति सत्कार्याणां पुण्यपुरुषक्रियमाणानाम् ।

एतादृशाः स्वभावत एव परापकारप्रवणाः पिशुनाः श्री शम्भुलिङ्ग शिवाचार्याणां तपोनुष्ठानं विविक्तवासं लोकोपकारं जनानुरागं महायोगं आत्यन्तिकविरागं अत्यद्भुतत्यागं च निरीक्ष्य, समुच्छ्रितमात्सर्याग्नि स्फुलिङ्गप्लुष्टाः केचन दुष्टाः येन केनापि प्रकारेण श्रीमदाचार्यवर्याणां लोकहितार्थमनुष्ठीयमाननिष्कामतपोनुष्ठानस्य प्रत्यूहव्यूहं प्रत्युपस्थापयितुं प्रतीक्षन्ते स्म कमपि सन्धिसमयम् ।

एकस्मिन् वर्षे दुर्भिक्षप्रदेश इति सुप्रसिद्धे बिजापूरप्रान्ते भीकरः समापतितः वग्राहक्षामकालः। वर्षाभावात्तर्षाकुलाः कर्षकाः कर्मकराः दीनदरिद्राः सर्वेऽपि मुमूर्षावस्थायां क्लिश्यन्ति स्म।

शूष्का भूमिः। रुक्षाणि क्षेत्राणि। बुभुक्षिताः क्षेत्राजीवाः। पिपासिताः सामान्यजनाः॥ बुभुक्षोपद्रुताः शूद्राः। निर्जला निर्झराः। छिन्नस्रोतसः पयस्विन्यः। निरापः कूपाः। शून्यानि धान्यागाराणि अदृश्यानि सस्यानि। जिव्हादूर आहारः। उद्भ्रान्तिः क्षुधाशान्तिः। भोजनमशक्ययोजनं। अन्नं स्वप्नोपपन्नं। तृप्तिः सम्पूर्णलुप्तिः। हाहाकारः नित्यजीवनप्रकारः। जीवनं घोरवनं। श्वासोच्छ्वासः महाप्रयास एव च संवृत्तः।

एवं सर्वेष्वपि जनेषु अवग्रह-महाग्राह-गृहीतेष्विव ग्रहणग्रस्तेष्विव मृत्युत्रस्तेष्विव, क्षुधाक्षुण्णेषु पिपासानिर्विण्णेषु अवसानमिवापन्नेषु, अन्नान्नदशातिखिन्नेषु सत्सु क्लिश्यत्सु भ्रश्यत्सु नश्यत्सु च केचन घूका इव अविवेकाः, मत्स्या इवातितुच्छाः, सर्पा इव अतिदर्पाः, व्याला इव हिंसाशीलाः, व्याधा इव परबाधाः, श्वापदा इव जनित लोकापदः, ऋक्षा इव लोकभक्षाः, नक्रा इवातिवक्राः, तिमिङ्गला इव सर्वगिलाः, काका इव स्वार्थोद्रिकाः, महिषा इव परदुर्विषहाः, खरा इव प्रखराः, सारमेया इव अतिहेयाः, मातङ्गा इव मदोत्तरङ्गाः, दुष्टाः नीतिभ्रष्टाः दुर्विचारजुष्टाः सम्भूय मत्तबलीवर्दा इव जनोपमर्दाः, घूका इवा–मङ्गलवाकाः सम्भूय जम्बुखण्डी संस्थानाधीश्वरस्य सविधे आचार्य-पादानां शम्भुलिङ्गयोगिनां तपश्चर्यां विरुध्य, निषिध्य, च आक्षेप-पत्रिकामेकां प्रददुः।

साक्षान्महाराजस्य समक्षमपि स्वयं गत्वा "पूर्वं शम्बूको नाम शूद्रः, रामावतारकाले दण्डकारण्ये तप्यति स्म तपः। तेन रामराज्यस्य समजनि महदेव अनिष्टम्।

श्री वसिष्ठमहर्षिसमादिष्टः रामचन्द्रः तं शम्बकमवधीत् ।

तेन च जनानां कष्टनष्टपरिहारो बभूव। तुष्टिपुष्टयः समुत्कृष्टा बभूवुरिति श्रृणुमः ।

इदानीमपि श्रीमतां राज्यमपि रामराज्यमिव समृद्धं सम्पन्नं च वरीवर्ति । स एव शम्बूकः शम्भुलिङ्गरूपेण पुनरवतीर्य तपस्यां विधाय तद्वदेव श्रीमतां रामराज्ये अनावृष्टि दुर्भिक्षं रोगाद्युपद्रवांश्च सरीसर्ष्टि ।

अस्मद्देशसम्पतित दुर्भिक्षस्य मूलकारणं शम्बूकसदृश शम्भुलिङ्गस्य तपस्या एव ।

अतोऽवश्यं तत्तपोविरोधं कृत्वा अथवा तमेतद्देशान्निष्कास्य राज्यमेतदनावृष्टिरोगाद्युपद्रवेभ्यः मोचयन्तु महाराजा" इति निवेदितवन्तः साग्रहमेव ।

परं जम्बुखण्डी धराधीश्वरः ईदृश मूर्खशिरोमणीनां दुर्भावनाविषदिग्धमसूयाकलुषितं दुर्विचारदुर्ललितं दुरुद्देशपूरितं प्रद्वेषकारितं दारुणं च वचनं श्रुत्वापि न व्यश्वसीत् । विवेकशाली साधुसन्तशरणादि सत्पुरुषसभाजनसत्करणशीलःस महाराजः स्वसंस्थानगतन्यायालयाऽधिकृतं न्यायमूर्ति बाबूराव पटवर्धननामानमाहूय एतद्विषये विचारयामास।

तदा सारासारविचारसमधिगतवस्तुतत्वज्ञानः सः बाबूरावमहोदयः जमखण्डीप्रान्तपृथ्वीपतिं सविनयं व्यजिज्ञिपत् "भूपाल, सज्जनविरोधः साधुजननिन्दा च दुर्जनानां क्षुद्रबुद्धीनां स्वभाव एव ।

अनादिकालत एव परोत्कर्षासहिष्णवः मात्सर्यसमुत्सारितसद्विचाराः दुर्बुद्धिप्रेरिताः दैत्यजनाः दुष्टजनाश्च विरुन्धन्ति निस्वार्थबुध्या महात्मविधीयमानलोकहितार्थकार्याणि ।

प्रतिबध्नन्ति जगत्क्षेमाधानक्षमसाधुव्यवसितम् ।

प्रणाशयन्ति सद्योजनाः ।

आतङ्कमुत्पादयन्ति सामान्यजनताशिवङ्करप्रयत्नांकुराभिवृद्धये ।

विच्छिन्दन्ति श्रेयःसन्तानम् । विभिन्दन्ति सौहार्दकोटिम् ।

विलोपयन्ति शान्तिम् । विघटयन्ति समाजम् । विच्छिद्रयन्ति अन्तःस्नेहम् ।

विद्रावयन्ति सामाजिकस्वास्थ्यम् । पिंषन्ति पारस्परिकं प्रेम । अपघ्नन्ति सार्वजनिकमभ्युदयम् ।

निरुन्धन्ति कल्याणपरम्पराम् । प्रज्वालयन्ति कलहज्वालाम् । सन्धुक्षयन्ति जातिद्वेषजातवेदसम् ।

दूषयन्ति सज्जनचारित्र्यम् । कुर्वन्ति महतां तेजोवधम् । मार्जयन्ति सज्जनविषयिणीं सामान्यजन सद्भावनाम् ।

प्रयतन्ते सत्पुरुषजीवनं कलङ्कितमाकलयितुम् । आरोपयन्ति असतोऽपि सत्सु दोषान् । अपवदन्ति साधुशीलम् ।

प्रसारयन्ति महद्विषये मिथ्यापवादान् । कलुषयन्ति भावुकानामपि मनः । आनन्दन्ति सतामपख्यात्या । मन्यन्ते चात्मानं कृतकृत्यं महापुरुषविषये जनमनसि प्रद्वेषोत्पादनेन सर्वत्र ।

तदेतादृशानां विघ्नसन्तोषिणां पराकारैकधृतव्रतानां समाजकण्टकानां क्षुद्रबुद्धीनां स्वार्थान्धानां निरर्थकमेव परार्थविघटकानां परदुःखशीतलहृदयानां दुष्टानां भ्रष्टानां पापिष्ठानां च दुर्जनानां न श्रद्धेयानि वचांसि । न श्रोतव्या विज्ञप्तयः । नादरणीया विचाराः ।

ईदृश दुर्जनदुर्विचारोपस्थापितेषु विचारविषयेषु जागरूकैर्भवितव्यं महाराजैः। उन्मीलनीयं प्रज्ञाचक्षुः। विचारणीये युक्तायुक्ते। परीक्षणीये साधकबाधके।

श्री शम्भुलिङ्ग शिवाचार्या न वृष्टिविरोधिनः। नापि दुर्भिक्षा–कांक्षिणः। किं तेषां स्नानपानाद्यर्थं नापेक्षितं सलिलम्। जलं बिना-तेषां शिवपूजादिकमेव स्यात्प्रतिबद्धम्। एवमात्मनः आश्रमवासिनां पुरग्रामादिवासिनां समेषामपि मानवानां पशुपक्ष्यादीनां सकलप्राणिनामपि अत्यावश्यकं जलं जलवृष्टिं च निरोद्धुं कथं वा तादशाः असदृशमहाम-हिमोपेता महनीयाः दुर्बुध्या तपन्ति तपः। जपन्ति जपान्। अनुतिष्ठन्ति कर्माणि ?

पूर्वमपि त्रेतायुगे तपोनुष्ठानमनुतिष्ठतीति कारणेन श्री रामचन्द्रः नावधीदेव शम्बूकं नाम शूद्रतपस्विनम्। किं तु देवलोकाधिकारम् एतन्मानवदेहावच्छेदेनैव अपेक्ष्य तपस्तपतीति तत्तपसः दुरुद्देशं सम्य–ग्विज्ञायैव मर्यादापुरुषोत्तमः प्रभुः श्री रामचन्द्रः तमवधीत्।

रामायणे स्वयं शम्बूक एव स्वतपसः स्पष्टमेवाचष्टेऽनिष्टतममुद्देशं श्रीरामस्यैव पुरतः कथयति–

देवत्वं प्रार्थये राम सशरीरो महायशाः
न मिथ्याहं वदे राम देवलोक जिगीषया॥
शूद्रं मां विद्धि काकुस्थ तप उग्रं समास्थितम् ॥ ७८३ ॥

देवलोकं एतेन मानुषशरीरेणैव जेतुं तस्य उग्रं तप आसीत्। नारदमुनिरपि रामं प्रति "अद्य तप्यति दुर्बुद्धिः तेन बालवधोह्ययमि" त्यादिना शम्बूक इन्द्रादि लोकानामाक्रमणेच्छया एव तपस्तप्यतीति जगाद। तस्य दुरुद्देशं सम्यग् ज्ञात्वैव श्रीरामः तं समहरत्।

परमेते तु शान्तमूर्तयः अजातशत्रवः लोकक्षेमाकांक्षिणः जनाभ्युद-यायैव स्वजीवितमेव निवेदितवन्तो महामनसः महाबुद्धयः महोदारचेतस्काः

महनीयचरिताः श्री शम्भुलिङ्गशिवाचार्याः न देवलोकजिगीषया न वा मानवलोकाक्रमणेच्छया नापि यस्य कस्यापि महतः फलस्य ऐश्वर्यस्य भाग्यस्य अधिकारस्य वा आशयाऽनुतिष्ठन्ति तपश्चर्याम् ।

किंतु लोकक्षेमाय आत्मोद्धाराय जगद्धिताय परमेश्वरप्रीतये चैवाऽङ्गीकुर्वन्ति तपोनुष्ठानम् । आचरन्ति शिवोपासनम् । अनुतिष्ठन्ति समाधिम् । तेन किं निरुध्यते वृष्टिः? प्रतिबध्यते सस्यवृद्धिः? व्याहन्यते जनहितम्? ? ? विचार्यतां महाराज! सम्यग्विचार्यताम् । जानेऽहं योगीश्वरान् शिवाचार्यान् ।

साधु वेद्मि च योगाश्रमसत्पुरुषान् । पर्यैक्षिषि च तत्र प्रवर्तमानान् परमार्थोत्सवप्रभृतीन् कार्यक्रमान् । लोकहितं जगत्क्षेमं सर्वजनोत्कर्षमंतरा नान्यंपश्याम्युद्देशं तदाश्रमप्रवर्त्यमानविविधाध्यात्मिकव्यापाराणाम् । यावत्ते मनस्विनः ब्रह्मर्षिवद्वर्चस्विनः महातपस्विनः श्रीमतां राजधान्याः जमखण्डीनगर्या उपकण्ठवनीमधितिष्ठन्ति, अकुण्ठमनुतिष्ठन्ति तपः, आचरन्ति व्रतान्, जपन्ति च जपान्, तावद्यौष्माकीणराज्यसीम्न्यापि नापतन्त्यापदः, नायान्ति ईतयः, न प्रविशन्ति बाधाः, नोपतिष्ठन्ति उपद्रवाः, नाभिभवन्ति भीकररोगाः । न सम्भवति चानिष्टानि ।

अतस्तथाविधालौकिकमहापुरुषाणां योगाचार्याणां निग्रहाग्रहभाजनतां न कदाचिदप्यात्मानमुपनयन्तु महाराजाः इत्येव मामिका सात्त्जलिबन्धापि सनिर्बन्धा महाप्रभुषु निर्मायमभ्यर्थना ।

पुरा खलु पातालकुहरवासिनं कपिलमुनिं कदर्थयित्वा भस्मीबभूव सागरराजन्यकुलम् । महात्मानं जमदग्निमुनीश्वरमपकृत्य निकृत्य च समूलनाशं विनष्टाः कार्तिवीर्यार्जुनवीरपुत्राः ।

गर्गाचार्यमपहस्योपहस्य च यादवकुलकेतवः सर्वेऽपि यदुकुमाराः सर्वनाशमेवाप्नुवन् । कालिदासस्य वचनानुसारेण ईदृशेषु महामहिमसु

महापुरुषेषु तपोधनेषु "गूढं हि दाहात्मकमस्ति तेजः"। तथाविधानां विषये अपचारः अपकारः अपमानो वा ईषन्मात्रोऽपि कृतश्चेद् हन्त्येव समूलघातमपकर्तारम्।

अतो यदि महाप्रभवः अत्रभवन्तो भवन्तः वाञ्छन्ति हितमात्मनः कांक्षन्ति राज्यस्य क्षेमं, अपेक्षन्ते एतन्नगरस्य शुभं, इच्छन्ति निजकुटुम्बस्य कल्याणं, ईहन्ते च समस्तप्रजानामपि अभ्युदयं तर्हि न शिवाचार्याणां सत्कर्मणां मार्गे तिष्ठन्तु प्रतिबन्धकतया।

कदाचिदपि लोकहितार्थमनुष्ठीयमानतत्तपोविघ्नं मनागपि मनसापि नानुतिष्ठन्तु। न जातुचिदप्याक्षिपन्तु विरूपाक्षप्रसादनोद्देशेनाङ्गीकृतं किमपि तेषां पुण्यं कर्म।

यदि शक्यते तदा सर्वविधानामपि तेषां सात्विकव्यापाराणां साहाय्यमारचयन्तु। सौकर्यमुत्पादयन्तु। आनुकूल्यं चोपस्थापयन्तु।

नो चेत् निस्पृहाणां निस्वार्थानां निष्कपटानां निर्मायाणां निरहङ्काराणां निरपेक्षाणां निष्कामकर्मानुष्ठानकर्मठानां कर्मन्दिवृन्दवन्दनीयानां यतिपुरंदराणां जपतपः पाठप्रवचनसदुपदेशशिवार्चनशिवोत्सवादिजनहितोत्कर्षप्रहर्षावहपारमार्थिक व्यापाराणां प्रत्यूहव्यूहानपि वा नोपस्थापयंतु श्रीमंत इत्येव मदीया प्रार्थना महाप्रभूणां सन्निधौ इति।

जमखंडी महीपतिः निष्पक्षपातस्य सत्कुलाभिजातस्य विवेकशीलस्य युक्तायुक्तविचार विचक्षणस्य विलक्षण प्रेक्षावतः प्रकृत्या साधोः न्यायनिष्ठुरस्य श्री पटवर्धन महोदयस्य हितवचनं संश्रुत्य श्री शिवाचार्य विषये समुत्पन्नात्यादरः कुहकिनां कैतवकृतां यत्याक्षेपपत्रिकां तत्रैव तिरस्कृत्य विच्छिद्य विपाट्य च ईदृशमहामहिम्ना मुपरि दूषणाभासप्रक्षेपका एते सर्वेऽपि पिशुनाः शुना समाः उन्मत्तपशुवद् दंड्याः शिक्ष्याश्च तत्क्षणमेवेति क्रुधा त्वगादीत्।

तदा प्रकृत्या मृदुः, स्वभावतः सज्जनः, जात्या न्यायनिष्ठः, स पटवर्धनमहोदयः तथाविधानां विषये औदासीन्यमेव तेषां शिक्षा । अधिकलक्षदानायापि ते नूनमनर्हा एवेति समसूचयत् । ततो विरराम महाराजः तच्छिक्षाग्रहात् ।

कदाचित् लिंगराजदम्पती स्वयं श्री शिवाचार्याणां सन्दर्शनं लब्ध्वा सम्यग्विधाय तपोमूर्तीनां तेषां सपर्यां तेषामाशीराशिमासाद्य, धन्यतामनयतामात्मानम् ।

अनुपदमेव च मघानक्षत्रे यतिमघोनः अमोघानुग्रहप्रभावेण मेघौघैराच्छादितो गगनाभोगो मुसलधारं ववर्ष महेन्द्रः ।

सुजला सुफला च सम्बभूव भगवती वसुन्धरा । सम्भृतजलपात्राणीवादृश्यन्त सर्वाण्यपि क्षेत्राणि ।

तद्वर्षे शतगुणिताऽभूद्धान्यवृद्धिः । सर्वत्रापि समदृश्यत सम्पत्समृद्धिः ।

गुरूणामनुग्रहादेव स अवग्रहः पापग्रह इव सुदूरमपास्तः । सौभाग्योदयश्च सम्पन्नः सर्वत्रापीति जनाः संवदन्ते स्म परस्परम् ।

हन्त अनन्तायां समन्ततो विकसित-वासन्तिका-शेवन्तिका-मल्लिका-चम्पकादि-वल्ली-सम्फुल्लाऽनन्त-कुसुम-सौगन्ध-सन्तर्पित-लोकान्तरङ्गे पान्थ-सीमन्तिनी-चिन्ता-सन्ताप-वर्धक-शकुन्तवरकोकिल-कुल-कलालाप-मुखरित-प्रशान्त-वनान्ते कदाचिद् वसन्ते प्रशान्तिनिशान्तायमानाः दान्ति - शान्ति - हरभक्ति- विरक्ति-मुखानन्त-गुण-विश्रान्तिभूमयः सन्तो महान्तो धीमन्तो निग्रहानुग्रह-शक्तिमन्तः श्रीमन्तो दयावन्तो गुणवन्तश्च श्री शम्भुलिङ्गशिवाचार्ययोगीश्वराः स्वकीये योगाश्रम एव एकान्ते वसन्तः सन्तपन्ति स्म नितान्त भक्त्या अनन्तनागभूषणचिन्तन रूपं विविध-वेदान्त-शास्त्र-ग्रन्थ-प्रवचनादि-रूपं च महत्तरं तपः ।

वल्ली-कुञ्ज-निकुञ्ज-फुल्लसुमनः पुञ्जान्त-गञ्जालुठद्
भृङ्गी-मञ्जुल-गीतगुञ्जनरवैर्वाचालिताशामुखे
चैत्रे चित्र-विचित्र-पत्र-विलसद्-वृक्षातपत्रान्विते
क्षेत्र सायमुपाश्रमं यतिरयं प्रायात्कदाचिच्चरन् ॥७८४॥

सन्ध्या-भासुर-सूर्य-मण्डल-लस-स्वर्णाभ-वर्ण-प्रभा–
पुञ्जैः पिञ्जर-मञ्जु-पञ्जर इव श्रीरञ्जिते भूतले
कन्दर्पाधिक-दर्प-हारिवपुषः कान्त्या गुरुः प्रेक्षकै–
श्चन्द्रः सन्दिदिहे पुरन्दर इति स्कन्दश्च किं सुन्दरः ॥७८५॥

सौरूप्यामृतसिन्धुरस्य विलसत्तारुण्य-सत्पूर्णिमा–
संयोगादतिवेलमेव रुरुचे ह्युद्वेलरोचिःश्रिया
कामं कामजितोपि चाङ्गसुषुमापीयूषयूषं जनाः
स्त्रीबालाश्चषकायितायतदृशो दूरात्पपुः सादरम् ॥७८६॥

लीला-लोलतमाङ्गयष्टि-ललिता लावण्य-लक्ष्मीलसद्–
यावल्लक्षणलक्षिताश्च ललना बह्व्यो-ललन्त्यः श्रिया
आक्रष्टुं बहुधा प्रयत्य विफलास्तन्व्यो गुरुं मन्वते
स्थाणुं स्थाणुनिरन्तरार्चनवशात्ताद्रूप्यमाप्य स्थितम् ॥७८७॥

तत्वं कामजयित्वमिन्द्रियवशित्वं संयमित्वं गुरो–
र्जानानाऽपि च शाम्भवीयसुषुमाकृष्टा च हृष्टान्तरा
काचिद्यौवनकामनीयक-लसत्कामान्धवामा शनैः
शम्भोरन्तिकमाययावजपुषो रामस्य केदारके ॥७८८॥

श्रृङ्गारोत्सवकामिनी तनुरुचा सौदामिनी-शोभिनी
कान्त्युद्भासित-यामिनीश-वदना रूपाढ्य-सीमन्तिनी
लक्कव्वा लकि-नामिनी गुरुवरं क्षेत्रं यदृच्छागतम्
पश्यन्ती सविलासलालसममुं रागालसाऽगाद्रसात् ॥७८९॥

शम्भोरम्भोज-दम्भ प्रशमन-निपुणे पापसम्भेददक्षे
पादे स्वर्णत्रपादे सुरुचिरमहसा भक्तसेवास्पदे सा
भक्त्योद्रिक्तेवयुक्त्या नतिकृतिमिषतश्चारुचामूरुबाल–
व्यालोलालीककेशैर्मृदुमसृणमुपस्प्रष्टुकामोपायाता ।।७९०।।

हसन्ती निर्व्याजं रतिरिव लसन्ती तनुरुचा
श्वसन्ती शम्पेवात्मनि च विकसन्तीव लतिका
दृशवान्तर्भावं कमपि कथयन्तीव युवतिः
स्मितेनैवालापं कलयितुमिवागाच्च पुरतः ।।७९१।।

विना शैत्यं रोमाञ्चनमपि तनौ कम्पनमथोऽ–
न्तरा घर्मोत्तापं वपुषि विपुलं स्वेदमपि च
निरीक्ष्यास्याः कामव्यसनमनुमायाहसदसौ–
सवैलक्ष्योपेक्षं स्वयमयमुपायान्निजकुटीम् ।।७९२।।

परे द्यवि तमस्काण्ड-चण्ड-वेतण्ड-षण्ढ-खण्डन-प्रचण्डोद्दण्ड-पुण्ड–रीकायमाणे पूर्वाचल-गण्ड-शिलाखण्ड-मधिरोहति पुण्डरीकसखे मार्तण्डे दण्डिकुलमण्डनमणिः श्री शम्भुलिङ्गशिवाचार्ययोगीश्वरः समाप्य प्रातराह्निकं विधाय प्राभातिक शिवार्चनं प्रतिदिनमिव आश्रमाद् बहिरङ्गणमुपागमत् ।

तत्र च बहवः एव योगिराजभक्ताः भावुका नरा नार्यश्च सश्रद्धं सबहुमानं सविनयं साञ्जलिबन्धं चोपसृत्य श्री शिवयोगिनां कमलकोमले संसारसन्तरणे उभेऽपि चरणे शिरसा संस्पृश्य हस्ताभ्यां निपीड्य ललाटाग्रेणावघट्य दण्डवत्प्रणिपत्य विविध-प्रकारैर्नमस्कारान् वितेनुः । तत्पादधूलीकणान् मणीनिव शिरसा संधार्य तदाशीराशिमधिगत्य स्वचिता दुःखानि निवेद्य परिहारोपायान् ततो विज्ञाय समाहितमनस्का सानन्दं स्वस्वमन्दिराणि निर्ययुः ।

एवं गतेषु सर्वेष्वपि भक्तजनेषु, विविक्ते च आश्रमाङ्गणे पुनस्सैव पूर्वदिने मेषपाल रामप्पस्य क्षेत्रं वायुसेवनार्थं गतवतां श्रीचरणानां दृष्टिगोचरीभूता लोचक-लोचनासेचक-मेचक-रुचि-रुचिरता-नीचीकृत-चारु-चमरीबाल-मायूरकलाप-व्यालीभोगायत-व्यालोलमृदुमसृण-केश-कलापा, शारद-शर्वरी-शर्वरीसार्वभौमाखर्व-गर्व-सर्वस्वनिर्वापण-निपुण-सुषुमा-सदनायमान-वदनारविन्दा, मन्दमन्द-स्पन्दमान-गन्धवह-स्तनन्धया-न्दोलित-सरो-विकसितेन्दीवरानिन्द्य-सौन्दर्य-संधारि-मनोहारि-नयनद्वन्द्वा, समीरबालक-लोलालक-जालक-विलुलिततिलक-कलिकाकर्षक-ललाट-फलका, चम्पक-सुषुमा-संपद्विलुम्पक-श्री-संपन्न-नासिका, पीताम्बर-करा, म्बुज-संभाविताम्बुधि-संभवकम्बु-शोभाविडम्बन-धुरंधर-कन्धर-सुन्दरा-निजोपगूहनप्रयास-विफलीकरण-सफल-चूतफलोपम-पयोधर-युगल, विजय-सूचक-मेचक-चूचुक-निर्भिद्यमान-कञ्चुक-वञ्चित-विस्रंसमान-चञ्चल-चेलाञ्चल-संवरणव्यापृता, सञ्चारिणीव राकायामिनी, शृङ्गारिणीव स्मरकामिनी, मुहुर्महीमवतीर्णेव मोहिनी, कामवासनेव देहिनी, नदीव सङ्गमोत्सुका, मन्मथमनःप्रवृत्तिरिव रत्युत्कण्ठिता, प्रकृतिरिव पुरुषापेक्षा, त्रिपुरीव बिषमाक्षविडम्बिता, अक्षमालेव वशिष्ठवशीकरणोत्सुका, कमलेव विलासलालसा, पर्वतपुत्रीव शम्भुप्रणयाभिलाषिणी, दुर्योधनबुद्धिरिव धिक्कृतधर्ममार्गा, वर्षासरिदिव उन्मुक्तमर्यादा, महिषीव कलुषितहृदयसरसी, सुभद्रेव यतिविजयाकांक्षिणी, जपमालेव महा-पुरुषहस्ताभिमर्शमभीप्समाना, शूर्पनखीव रामाभिराम-पुरुषसंपर्कापेक्षिणी, सरोजिनीव विकचकमलेक्षणा, प्रावृडिव अम्बरान्तः-प्रदर्शित-पयोधरोन्नतिः, पौलस्त्यसन्ततिरिव सदाऽलङ्कामयमाना, लङ्कणीव पावन-ग्रहण-विफल-प्रयत्नोद्यता, जनस्थानभूमिरिव खरदूषणदुर्ललिता पतङ्गपरम्परेव पावकग्रासबद्धस्पृहा, लक्कव्वाभिधा ललना सविलासमुपाजगाम।

सा चेतस्ततस्तरलतारकं विक्षिपन्ती ससूक्ष्मेक्षणं चक्षुः, निर्मक्षिकं चाभिवीक्ष्य परितः पुण्याश्रमाङ्गणं, मन्दमन्दं निक्षिपन्ती अरविन्द सुन्दर पदयुगलं, प्रक्षिपन्ती सविलासं कुटिलकटाक्षान् समीपमुपसृत्य

श्री शिवाचार्याणां वन्दनव्याजेन पादारविन्द-द्वन्द्वे स्वीयं मस्तकं विन्यसिसिषन्ती स्वकीय-मरालाराल-मसृण-केशकलापेन स्प्रष्टुमुपाययौ गुरूणां पादाग्रम्। तस्याश्च तादृशागतिप्रकारेणैव तदीयं दुरुद्देशं दुर्विचारं च प्रतर्क्य श्रीशम्भुलिङ्गशिवाचार्यवर्याः स्वपदपुण्डरीकपिस्पृक्षुं तस्याः शिखण्डं ज्वलदङ्गारखण्ड इति, विषोल्बण–कुण्डलीशतुण्ड इति च विभाव्य तत्क्षण एव स्वचरणनलिनं पश्चादपाकर्षन्। पुनरपि साभिलाषं सपरितोषं सनेत्रोन्मेषं सविलास–विशेषं वारयोषानिर्विशेषं परित्यक्तलज्जाशेषं च समीपमुपसर्पन्त्यां लक्कव्वललनायां श्री शिवयोगीश्वराः मृदुमधुरस्वरेण अपृच्छन् "कल्याणि, कासि त्वम्। किं ते कार्यमत्र ? किमर्थमागतासि?" इति

तदा सरलमुत्तरीतुमपारयन्तीं स्खलद्वचनाक्षरं "अहं मेषपाल लक्कव्वा। भवतां दर्शनार्थं तथा – – – –" इति किमपि व्याहरन्तीं स्रवस्वेदाम्बुपूर इव तरन्तीं, कुटिलकटाक्षान् किरन्तीं, मन्दं पुरस्सरन्तीं, रागोल्लासेनेव स्फुरन्तीं, स्त्रीसहजामपि लज्जां दूरत एव परिहरन्तीं, कुलटावद् व्यवहरन्तीं तां धृष्टकामिनीं दृष्ट्वा तस्या भावमनुमाय श्री शिवाचार्याः पर्जन्योर्जितगर्जितेनैव तर्जयन्त स्तां प्रति "तिष्ठ तिष्ठ दुष्टे। अपसर दूरतः। पदमेकमितो न्यस्यसि चेत् दण्डनीया भविष्यसि" इति उच्चैरुच्चार्य स्वकरगतं दण्डकाष्ठमुदधरन्। श्री गुरुवरेण्यानां दृष्ट्वा तं रौद्रावतारं भीतभीता भूतावेशादिव कामावेशादुन्मुक्ता सा पश्चादपसरन्ती पलायनपरा बभूव। "इदानीमेवास्या दुष्टस्त्रियः सम्यक्शासनं कार्यं येन न पुनस्सात्र समागच्छेदिति" विचार्य दण्डमुद्यम्यैव तां भीषयितुमभ्यद्रवन् योगीश्वराः।

सापि दण्डिकुलमण्डनमणीनां दण्डाऽघातभीता अभिद्रवन्ती, सङ्गापूरहनुमन्तनाम्नः क्षेत्रे पुरुष-प्रमाण-प्ररूढ-पुष्कल-सस्य-राशौ प्रविवेश। क्षेत्रस्वामिनः हनुमन्तस्य भार्या ईरव्वा खिन्नगात्रीं पलायनपरां तां लक्कवांगनां दृष्ट्वा अप्राक्षीत् "किमेवं पलायसे भूताविष्टेव?

कुत्र वा गताऽसीः ? कुतो वा एवं वेपसे ? इति । अत्रान्तरे एव दण्डधारिणः श्री शिवाचार्यास्तत्रैवागताः । तेषां क्रुद्धमुद्रां, रोषकषायिते लोचने, करोद्धृतं दण्डं, रौद्रावतारं तथा लक्कव्वांगनायाश्च पलायनागमनं, श्वासोत्कम्पं, स्विन्नाङ्गं, भयभ्रान्तमुद्रां च वीक्ष्य ईरव्वा व्यजानात् सर्वामपि इत्थंभूतघटनाम् ।

तत्क्षण एव स्फुटापराधलक्षणां, भीत्या वेपमानां, स्वापराधप्रकाशेन लज्जमानां च तां लक्कव्वाबलां निर्भयं निर्भत्सयन्ती, ईरव्वा समतर्जयत् "दुष्टे, महात्मनां शिवस्वरूपाणां श्री स्वामिनां शुद्धचारित्र्ये कलङ्कपङ्क लेपनदुस्साहसे प्रवृत्तासि। सूर्यमण्डलेधूलिप्रक्षेपेणेव अनेन ते दुस्साहसेन तवैव स्पष्टीभूता दुष्टता भ्रष्टता च । नेतः परं पापीयसी त्वं तादृशानां पुण्यपुरुषाणां समीपमुपसर्प मत्तचित्ते" इत्युपदिश्य श्री श्रीचरणानां साष्टाङ्गवन्दनां विधाय व्यजिज्ञिपत् -

"पूज्याः ! इयमेका बुद्धिशून्या मूर्खमहिला । न जानातीयं श्री श्री स्वामिनां प्रभावं तपोमहिमानं च । पतङ्गीव दीपकलिकाग्रासबद्धस्पृहा स्वात्मनाशव्यापारोद्यताऽसीत् । क्षम्यतामिदमस्या श्चित्तचापल्यम् । अनेन च सन्दर्भेण श्रीश्रीमतां परिशुद्धं जीवनं उज्वलं चारित्र्यं, निष्कलङ्कं व्यक्तित्वं च प्रकाशितम् । क्षमाभूषणा हि भवादृशा योगीश्वराः । अतः पुनरेकवारमस्या मोहान्धमहिलाया इममेकं मन्तुं क्षन्तुं दण्डनाद्विरन्तुं च साञ्जलिबन्धमभ्यर्थये" इति भूयः प्रणम्य ययाचे ।

शान्तमूर्तयः श्रीस्वामिपादाः ईरव्वाङ्गनां प्रति "नाहं कस्मिन्नपि कदाचिदपि द्वेषं त्वेषं रोषं वा कलयामि । परमेषा योषा चित्तचापल्यदोषात् पवित्रमस्मदाश्रमं प्रति नैवं पुनरागच्छेदिति तां भीषयितुं रोषादिव दण्डमुदधरम् । भगवान् नगजारमणः क्षिप्रमेवास्याः प्रयच्छतु सद्बुद्धिम्" इति निगद्य स्वाश्रममुपागच्छन् । एतद्घटनासाक्षीभूता सङ्गापूरहनुमन्तस्य कुटुम्बिनी ईरव्वा नाम्नी नितम्बिनी-

मणिः अद्याऽपि श्री स्वामिचरणानां मनस्थैर्य-जितेन्द्रियत्व-ब्रह्मचर्य-शुद्ध चारित्र्य-परमपावित्र्यद्योतिकां स्वप्रत्यक्षदृष्टामिमां घटनां सन्दर्भवशाज्जनानां पुरतः कथयन्ती जीवन्ती आस्ते हुलियाळुग्रामे ।

परं "न हि क्षेमं सूते गुरुमहिमभूतेष्वविनयः" इति अभियुक्तोक्तयुक्तियुक्तोक्तिमनुसृत्य मोहाद् गुरुद्रोहोद्यता लक्कव्वा तारुण्य एव महदपचाररूपेण महापापेन क्षयरोगाक्रान्ता परेत-पति-पालित-पुरीपान्था बभूव ।

एवं श्री शम्भुङ्गिशिवयोगिनां लोकक्षेमपुषि इन्द्रियस्थैर्यजुषि बहुजनदत्ताभयाशिषि विषयलौल्यद्विषि समग्रेऽप्यायुषि वित्तमोहः वनितामोहः अधिकारमोहः प्रतिष्ठामोहो वा न समाकर्षितुं प्राभवत्तमां यमिसत्तमं अमुं मनीषिमहत्तमं गुरूत्तमम् ।

दम्भोलिपाणि-सम्भावित-रम्भादि-रम्भोरु-दम्भाऽहम्भावविलोपक-सौन्दर्य-शालिन्यः चञ्चच्चञ्चलचञ्चला-सञ्चय-चाकचक्य-चारिम-चौर्य-चञ्चुर-नयनाञ्चलोदञ्चित-पञ्चसायक-लीलाप्रपञ्चाः सञ्चरन्त्य इव सौन्दर्यपाञ्चालिकाः, चञ्चन्त्य इव सुरलोकाऽप्सरसः, शतश एव चञ्चलाक्ष्यः प्रतिदिनं योगीश्वरमेनमुपसृत्य अस्पृशन्त्य एव पदपुण्डरीकयुगलं दूरादेव सहस्राधिक स्त्री पुरुषभक्तैःसह सश्रद्धं प्रणिपत्य, आशीराशीनधिगत्य प्रयान्ति स्म स्वनिकेतनम् ।

परं परञ्ज्योतिस्वरूपस्यास्य योगिपुङ्गवस्य मनसि न कदाचिदप्युदियाय विकारो वा अन्यः प्रकारो वा चित्तचाञ्चल्यस्य ।

सन्तत - परमेश्वर - चिन्तन - वेदवेदान्तमन्थन-नैकग्रन्थग्रन्थिग्रथन-विविधलेखलेखन - परतत्वनिदिध्यासन - परदुःखापनोदन - दीनोद्धरणमुख-बहुमुखकार्य-व्यग्र-मानसस्य परोपकारैक-व्रत-शीलस्य दूरीकृत-सर्व-सांसारिक-दुःख-जालस्य श्री शम्भुलिङ्गशिवाचार्यवर्यस्य नास्त्येव नासीदेव च समयः इच्छा वा धन-कनक-कामिनी-गृहाराम-केदारादि विष-विषम-विषय-विषयक-विचारादिकमाकलयितुम् । यदि कोप्याऽगत्य स्वेच्छ-

यैव प्रयच्छति प्रभूततरं धनं तदा यदृच्छालाभसन्तुष्टो निरिच्छोऽयं पद्मपलाश-स्वच्छाच्छ-मानसो यतीश्वरः निर्भर्त्स्य दातारं, तुच्छीकृत्य तत्प्रदिच्छितामपि महत्सम्पदं निराकृत्य बोधयति धनदुष्परिणामम् ।

स्वरथचक्र-चङ्क्रमण-चूर्णीभूतोदयगिरि-गुहा-परिसर-मञ्जु-कुञ्ज-निकुञ्जप्ररूढ-लक्षलक्ष-गुञ्जा-पुञ्ज-माञ्जिष्ठ-राग-रञ्जितारुणारुण किरण-विकिरण-व्यापार-व्याजेन भूदेव्याः कुङ्कुमपूजामिव वितन्वति भगवति विवस्वति, मन्दं मन्दं वलमाने मलयपवमाने, कल-निनादि-पक्षि-कुल-कलकल-कलरव-वाचालितेषु दिङ्मुखेषु श्री शिवाचार्याः कदाचन स्वाश्रमाद् बहिराऽगत्य वापीतटे शिलाफलके स्वीयकाषाययवस्त्राणि क्षालयन्त उपाविशन् ।

तदा हृष्टपुष्टकलेवरौ निष्ठुर-पादाघात-कम्पित-वसुन्धरौ क्रूर-दृष्टि-निष्ठ्यूतरक्तवर्ण-लोहितायमान-परिसरौ अधिष्ठाने इव नैष्ठुर्यस्य मूर्ती इव कार्कश्यस्य, दूताविव भीतेः, भृत्याविव मृत्योः, प्रतिबिम्बाविव हिडिम्बासुरस्य, डिम्भाविव दम्भस्य, मित्रे इव वृत्रासुरस्य, स्वभावत एव परुषौ द्वौ पुरुषौ, अविदितकुलनामानौ सहसा कुतोऽप्यागत्य स्थानात् ववन्दाते असन्दभक्तिभरेण यतिपुरन्दरमेनम् । तस्य च पुरस्तात् स्वस्वाञ्जलिभरं रूप्यकराशिं निक्षिप्य सविनयमेवं प्रार्थयेताम् "पूज्याः, इयमावयोरल्पसेवा स्वीक्रियतां सदयानुरागम् । न आवयोर्नामधामादिकमभिलषावो वो विवरीतुम् । परं आवामुभावपि श्री श्रीचरणानां परम भक्तौ । जानीवः श्री श्रीमतां दुरभिभवं तपःप्रभावम् । अमानुषं महिमानम् । असाधारिणीं मन्त्रशक्तिम् । लोकोत्तरां परोपकार-व्यसनिताम् । मुनिजनस्पृहणीयामात्मशुद्धिम् । अनधिगतप्रसिद्धिं तपःसिद्धिं च ।

अत इदानीं श्री श्रीमतां सेवायां समुपाहराव: यथाशक्ति द्रव्यम् । स्वीक्रियतां दक्षिणा । क्रियतामनुग्रहः । ह्रियतां नौ पापराशिः ।

भ्रियतामाश्रमपरिवारः । उद्ध्रियतामयं जनः ; आद्रियतामियं सेवा · प्रीयन्तां गुरवः"इति साञ्जलिबन्धं सविनयानुबन्धं च प्रार्थयेतामुभावपि

परं श्री शम्भुलिङ्गशिवाचार्याः "अर्थमनर्थं भावय नित्यं नास्ति ततः सुखलेशः सत्यम् ? ' इत्यभियुक्तोक्तिमनुस्मरन्तः मन्दं हसन्तः प्रावोचन् "वयं तु सन्यासिनः । नास्माकं द्रव्यस्य अपेक्षा । वने वसामः। आश्रमे निवसामः। पिबामः कौपीरपः। अश्नीमः कन्दमूलफलानि। मथ्नीमः वेदशास्त्राणि। ग्रथ्नीमो ग्रन्थान्। ध्यायामः परमेश्वरम्। गायामस्तन्महिमानम्। नयामस्तच्चिन्तन एव कालम्। न यामः क्वाऽपि। नार्थेनास्माकमर्थः कोऽपि। अतो नेदानीं गृण्हीमो भवद्दत्तं धनम। युवाभ्यामेव गृह्यन्तां युष्माकं रूप्यकाणि। न वयं स्पृशामस्तानि" इति स्पष्टमेव निराकुर्वन्।

ततस्तावुभावपि निरुपायौ स्वधनं प्रतिगृह्य तस्मादेव कूपात्स्वामिनामनुमत्या जलमुद्धृत्य यथेच्छमापीय यथेष्टमगच्छतां स्वस्थानम्। तद्दिन एव रात्रौ मरिगुद्दिनामके ग्रामे शङ्करशास्त्रिणो गृहमचूचूरतां तावेव सिन्दूरलक्ष्मणनरसिंहनामानौ प्रसिद्धतस्कराविति प्रससार वार्ता। ततः श्री शङ्करशास्त्री मरुगुद्दिग्राममेव परित्यज्य जम्बुखण्डी नगर एव वितेने सौवस्तिम्।

एवं बहुधा स्वयमागतमपि अप्रार्थितोपनतमपि धनं श्रीचरणाः प्रभूतमल्पं वा न स्वीचक्रुः। नाद्याऽपि स्वीकुर्वन्ति।

वेधा द्वेधा भ्रमं चक्रे कान्तासु कनकेषु च
तासु तेष्वप्यनासक्तः साक्षाद्भर्गो नराकृतिः ॥७९३॥

इति पूर्वतनानामपूर्वोक्तिमनुसृत्य कदाचिदपि कान्तामोह-कनकस्नेह - द्रव्याशापाशादि-वशवर्तितामनुपगच्छन्नयं लसच्छम-दमादि-गुणसमुच्छ्रितः विद्वच्छिखामणिः समुच्छलत्सर्वजनशुभेच्छः यदृच्छालाभतुष्टः

कृच्छ्रगतदीनजनतासमुत्सर्पद्वात्सल्यः, निर्मत्सरः, महत्सुमान्यः, श्रीमच्छम्भुलिङ्गशिवाचार्यः साक्षाच्छ्रीशिव एव मानवरूपेण कृच्छ्रनरकुलसमुद्धाराय सञ्चरतीति मन्यन्ते मनीषिणः। पूजयन्ति पामराः। विश्वसन्ति विमतीयाः। आद्रियन्ते आस्तिकाः।

योगाश्रमे योगविधिप्रयोगं तपःसमाधिं शिवपञ्चाक्षरिजपं ज्ञानोपदेशं ग्रन्थलेखनादिकं च निरलसमविरतमविकलमाकलयन्तो बहुवर्षमूषुः योगीश्वराः श्री शम्भुलिङ्गशिवाचार्याः। ईसवीये १९४३ तमे वत्सरे काष्ठमौनव्रतमवलम्ब्य सदा अम्बिकाजानेः अम्बुजशोभविडम्बिपदयुगलं हृदयान्तरे ध्यायन्तः स्वाध्यायरूपमाचरन्तस्तपः कदाचित् शिवयोगीश्वराः श्री शिवाचार्याः शिवपूजोपयुक्तपुष्पदूर्वादिकमुपाहर्तुमुपागमन् योगाश्रमादतिदूरवर्ति किञ्चन क्षेत्रम्।

क्षेत्रात् प्रत्यावर्तनसमये कश्चन स्वभावतः पिशुनः शुनः सधर्मा धर्माचाररहितः हिताऽहितपरिज्ञानविकलः सकललोकोपद्रवनिरतः क्षुद्रविचारदरिद्रः सङ्गापूरमलकय्यानामकः दुष्टः मेषपालः योगाश्रममुपावर्तमानं धियाऽसमानं महामहिमानमवलम्बितमौनं श्रियार्कोपमानं सदाकलितसदाशिवध्यानं दिव्यज्ञानं शिवाचार्याभिधानं तमेनं यतिमघवानमुपसृत्य एकवचन एव सम्बोधयन्नुवाच "अरे स्वामिन् कुत आयासि? कुत्र वा गच्छसि? किं कार्यं ते आश्रमाद् बहिः? इति

तस्य बुद्धिशून्यस्य उच्छृङ्खलस्य खलस्य आविपालस्य प्रश्नानवलम्बितमौनव्रतत्त्वादनुत्तरन्नेव तूष्णीमतिष्ठत् स योगिवरिष्ठः। तदा-पुनरपि "रे रे यत्यपसद किं जोषं तिष्ठसि? मम प्रश्नानामुत्तरं कुतो न यच्छसि? कि बधिरोऽसि? किं ते मुखमेव नास्ति? किं त्वं मूकः अवाकः?

तदेतस्य मूर्खशिखामणेरजपालस्य षट्प्रश्नान् संश्रुत्याऽपि धृतमौनव्रतत्त्वादनुत्तरन्नेवावतस्थे प्रतस्थे च पुरस्तात् शिवाचार्यः। तद्

दृष्ट्वा कुपित इव कापिशायनमदमत्तकपिरिव आविपालः योगिभूपालानां मौनशीलानां श्री शिवाचार्याणां निरुध्य मार्गं प्रतिबध्य गमनं रोषकषायितेन चक्षुषा दहन्निवावलोक्य तान् मौनिमुनीन् सतिरस्कारं सकोपाविष्कारं सनिन्दावचनपरिष्कारं चागादीत् "रे सन्यासिन् मत्तस्त्वं नोत्तरं ददासि। दण्डिनस्ते दण्डोपाय एव योग्यः। ताडितश्चेत् स्वयमेव मुखं व्याददासि। तिष्ठ शिक्षयामि त्वाम्" इति उक्त्वा स्वकरकलितेन कुठारकठोरेण काष्ठलगुडेन श्रीचरणानामार्गस्करणेऽपि परिस्फुरत्करुणानां अपरित्यक्तमौनव्रताचरणानां वामांसे बलात् प्रजहार।

निरपराधिनां शान्त स्वान्तानां संततपरतान्तानां वनसञ्चरणक्लान्तानां पावितानन्तानां श्री शिवाचार्याणामुपरि मलक्याभिधमूर्ख मेषपाल–बोभूयमानमभियोगं काष्ठाघातप्रहारं च दूरादेव अन्वीक्ष्य तत्रैव श्यामल शाद्वलेषु अजस्तोमं परिचारयन् विवेकशील आविकः कश्चन सरभसमागत्य यतिविडौजस्ताडनोद्यतं मलकय्याभिधमूर्खं निर्भर्त्स्य दूरादपसार्य तर्जयन्नुवाच "आविककुलाङ्गार, अपसर दूरतः। मुञ्च गुरूत्तमान्। तेषां देहं स्प्रष्टुमपि श्वपचस्य मलिनाङ्गस्य नास्ति तेऽधिकारः। परमपवित्रात्मनाम् एतेषां परमहंसावतंसानामंसे प्रहृत्य तेषां मनोहिंसामुपजनयन्नृशंस त्वमनुभविष्यसि तद्दुष्परिणामम्" इति उक्त्वा तत्करगतं काष्ठलगुडमाच्छिद्य तं गर्हयामास। ततः श्रीचरणाः तूष्णीमेव ततः स्वाश्रमं प्रत्यावर्तन्त शान्तमनसा। ईदृशस्य गुरुद्रोहरूपस्य महाऽपराधस्य कटुफलमचिरादेवान्वभून्मेषपालो मलकय्याभिधः। कतिपयदिवसावधावेव स पापिष्ठः योगिराजप्रहारपापोपहतः राजयक्ष्ममहारोगाभिभूतः संबभूव। क्रमेण स रोग उल्बणावस्थां प्रत्यपद्यत। प्रस्फुटितं चर्म, छिन्नभिन्नानि अङ्गानि, कण्डूतिदग्धाः सन्धिबन्धाः, स्रवन्ती पूयशोणितधारा, असह्यो देहदुर्गन्धः, प्राणान्तिका वेदना, दुर्विषहा यातनाः विशङ्कटं सङ्कटम्। तदेतस्य सत्पुरुषद्रोहापराधपरिपाकपरिकर्मितस्य महारोगस्य इतरैर्दुरूहं शोथदाहादिकं यमयातनाशताधिकं सोढुमशक्नुवान्, मेषपालो मलकय्याभिधान. हुलियाळग्रामोपकण्ठस्थिते रिक्तकूपे

आत्मानं पातयित्वा दुर्मरणमुपाजगाम दुर्बुद्धिदुर्ललितः स दुष्टात्मा। हिंस्रः स्वपापेन विहिंसितः खलः" इति प्राचीनोक्तेः प्रत्यक्षनिदर्शनं प्रबंभूव गुरुद्रोहकारी मलकय्यानामको मेषपालः। तद्दिनादारभ्य पापिनः योगाश्रमस्य अभ्यर्णप्रदेशमभ्युपगन्तुमपि बिभ्यति। सामान्यजनानां च श्री शम्भुलिंगशिवाचार्याणां विषये समुदपद्यत भक्तिः। तेषां तपःसिद्धि-शीलशुद्धि-प्रभावसमृद्धि-शापानुग्रह शक्ति,विषयविरक्ति, परमेश्वरभक्ति, लोकोद्दिधीर्षादि सद्गुणगणप्रभावः सर्वेषामपि दृग्गोचरो बभूव।

विद्वदग्रगण्यानां समाचीर्णागण्यपुण्यानां यतिवरेण्यानामेतेषां श्री शम्भुलिङ्गशिवयोगीश्वराणां अकम्पया अनुकम्पया भूयांस एव भक्त-भावुका बहुतरं भावुकं संप्रतिपद्य संप्रति उत्कर्षस्य चरमामेव सीमामुप स्पृश्य परमामेवोन्नतिमभिप्रयांतीति दृष्टचरमेव बहुभिः। श्रुतचरमेव सर्वैः। स्वर्गाऽपवर्गप्रददुर्गापतिभर्गान्तरङ्गभक्तवर्गाग्रेसराणां श्री शिवयोगिनामेतेषां निरवग्रहेणानुग्रहेण दुर्विधिदुर्ग्रहग्राहगृहीताः परःशता एव जनाः दुःखदुर्गतिदौर्भाग्योपसर्गवर्जिताः सौभाग्यशिखराग्रेऽद्य सानन्दं विहरन्तीत्येतत् प्रत्यक्षमेव पश्यामः।

विजापूरनगरगत जोरापूरपेटनिवासिनः हरगुरुपादोपासिनः बीळगीत्युपनामानः हुच्चबसप्पमहोदयाः बाल्यादारभ्यैव श्रीशिवाचार्याणां परमभक्ताः। आचार्यपादानां वचनं तेषां वेदवचनमेव। तेषां सूचनां सन्देशमनुमतिं च विना न किमप्याकलयन्ति स्म कार्यं हुचबसप्प महोदयाः। तेषां पुत्रः सिद्दप्पाभिधोऽपि शम्भुलिङ्गकरुणावरणः तच्चरणैकशरणः तदाज्ञानुसारेण सार्थकीकृतस्वीयकायकरणः व्यापारोद्यमादि विविधो-द्योगोद्यतो विद्योतते स्म। परं वाणिज्यव्यवहारार्थमावश्यकप्राज्यधन-वैधुर्येण क्लिश्यति स्म पिता। दुःख्यति स्म पुत्रः। तयोः मनोवैक्लव्यं कथमपि ज्ञात्वा श्री शिवयोगिनः तावुभावपि आहूय फलमन्त्राक्षतादिकं साशीर्वादसाहाय्यं प्रदाय सर्वविधमपि सौकर्यं प्रकल्प्य अन्वगृण्हन्। श्री गुरूत्तमानां कृपाहस्तावलम्बनेन प्रोत्साहितौ हुच्चबसप्पा सिद्धप्पा महनीयौ 'सुधाकर हिरेमठ एण्ड कम्पनी' इति नाम्ना वस्त्रापणं प्रारभ्य

प्रामाणिकतया निरलसतया च व्यवहारमाकलयताम् । गुरुवर्याणां शुभपुषा आशिषा पितापुत्रयोश्च निरलसपरिश्रमेण च उत्तरोत्तरोत्कर्ष-मुपगच्छन्ती सा संस्था विजापूरनगरे सुप्रसिद्धा लाभदायिका प्रामाणिक परिश्रमप्रयत्नकारिणां सर्वेषामपि तत्र कार्यकारिणां स्वामिभृत्यानां पारिश्रमिकफलसम्पदुपधायिका राराजीति ।

हरशरणा एते श्री गुरुचरणा नूनं करुणाभरणायिता एव । दीन-दलित-दरिद्र-दुःखित-जनोद्वीक्षणक्षणसंस्फुरणा तेषां करुणा बहूनामेव भक्तानां भृत्यानां च दारिद्र्यहरणं दौस्थ्यापसारणं दुरितविदारणं दुःखनिवारणं दुर्गत्युद्धरणं सौख्यवितरणं सौभाग्यपरिष्करणं संसारसन्तारणं च संसाधयन्ती एव द्र्यादृग्गोचरीभवति एतत्प्रान्तोपान्तपरिसर प्रदेश देशवासिनाम् ।

नैकदुरन्तचिन्तासन्तापनितान्तक्लान्तस्वान्तः मुगुटखानहुब्बळ्ळी-ग्रामाभिजनः विविधोन्निद्रदारिद्र्युपद्रवविद्रुतः ईरप्पा मुत्नाळनामकः गुरुभक्तः बुद्धप्रबुद्धं शुद्धब्रह्मोपास्तिलब्धसिद्धिसमृद्धि प्रसिद्धिपराङ्मुखं गूढमूढसमं सिद्धपुङगवमेनं बद्धश्रद्धं स्वकलत्रपुत्रैस्समं समाराध्य सर्वतो मुखीमेव लब्धवानभिवृद्धि सौभाग्यसमृद्धि च । तस्य लौकिकविद्यापारङ्गतः विनयोपेतस्तनयः सौशील्यसौजन्यभूषा सूनृतभाषा अपरित्यक्त भारतीय संस्कृतिसदाचारसद्वेषा चिरपरिश्रमसम्पादित ज्ञानविज्ञानवैदुष्य समुन्मेषा समभ्यस्तविविधपाश्चात्यभाषा गुरुकरुणासंसाधितसद्गुण्यपरिपोषा दूरीकृतस्त्रीसहजमात्सर्यादिदोषा अपरुषा अ-परुषा कदाप्यनालोकितपरपुरुषा योषामणिः स्नुषा च स्वार्जित वैज्ञानिक विलक्षणवैद्यविद्यावैदग्ध्येन अमेरिकासर्वकारीयगौरवमधिगत्य तत्रैव निवसतः अमेरिकाप्रान्ते । गुरु श्री शम्भुलिङ्गशिवाचार्याशीराशि सुसङ्घटितदाम्पत्यव धमधुरसम्बन्धौ तौ उभावपि द्राक्तरजायापती उदर्कभूतिपरिष्करणं सकलसौभाग्यप्रादुष्करणं सुधाकिरणाभरणैक-शरणशरणशिवयोगिकरुणावरणमेव स्वश्रेयस्करणं मन्वानौ यथाशक्ति सेवामपि तन्वानौ तद्वचनानुसारमेव पुनर्जातमिव मारं साक्षादिवं कुमारं

कलिकालावतीर्णमिव सनत्कुमारं सुकुमारमेकं कुमारं लब्ध्वा रम्यं गुरुकरुणापारम्यमभ्युपगम्य सर्वसचेतोनम्यं स्मरतः सर्वदाऽपि। तेषां चारु चरित्रमयचम्पूप्रबन्धस्य लेखन-मुद्रण-शोधन-प्रकटन-प्रकाशनादि कार्यावश्यक द्रव्यदानधौरन्धरीं ससन्तोषं स्वयं प्रेरणयैव गुरुभक्तिपारवश्येन परिवहतः। एवं सर्वप्रकारेण गुरूत्तमसेवाकारणौ तौ द्राक्तरदम्पती बलवता गुरुप्रसादेन उत्तरोत्तरमुत्कर्षं प्राप्नुवन्तावेव विद्येते विद्योतेते वंद्यविद्याविद्योतमानविलक्षणवैशारद्यौ।

सकल-मानव-कुलक्लेशराशीकरण-देशिकानां समुपासित-परमेशानां यतीशानानां श्री शिवाचार्याणामाशीराशिमासाद्य सद्गुरुनामसजातीय नामा शम्भुः द्वादशवर्षेभ्यः निरलसतया अनन्यभक्तिभावेन च अहोरात्रं गुरुचरणचरणपरिचरणं सर्वविधामपि सेवां च सश्रद्धं विदधानः काले काले शिवाचार्याणां स्नान-शिवार्चन-क्षीरप्राशन-ग्रन्थावलोकन-ग्रन्थलेखन-मौन-ध्यान-गुहावास-सविकल्पकसमाधि - निर्विकल्पसमाधि-जप-तपोनुष्ठानादि सकल कार्येषु सर्वविधमप्यानुकूल्यं कल्पयन् विशालमेव योगाश्रमनेदिष्ठं श्रेष्ठं क्षेत्रं तेषां प्रसादरूपेण विन्दति।

एवं एतान् श्री शिवयोगिन एव "पिता माता सुहृद बन्धु" रिति बुद्ध्या अनन्यभक्तिभावेन समुपासमानः गोविन्दरेड्डि महोदयः यावजन्मविहिताया आत्महिताया सेवाशुश्रूषया प्रीतप्रसन्नैः श्री आचार्यपादैः प्रसादीकृतं महोदारं केदारं सम्प्राप्य धन्यधन्यो भूत्वा अद्याऽपि वार्धक्येऽपि भव्यावहमव्याहतं दिव्यानुभावपरिषवणं कलयन्नेवास्ते।

बळगांवमण्डलान्तर्गत रामदुर्गनगरे प्रामाणिकतया व्यापारोद्योगादिकं कल्यन् धर्मनिष्ठहुच्चप्पाबीळगी महोदयानां सत्पुत्रः नागप्पाभिधः तरुणभक्तः स्ववंशपरम्परागुरुवराणां श्री शम्भुलिङ्गयोगीश्वराणां "श्री शम्भुलिङ्गेश्वरविजयचम्पू" महाग्रन्थस्य मुद्रणकार्यं भूरिपरिश्रमं वितन्वन् अकम्पामेव सम्पादयति शिवाचार्यानुकम्पाम्।

एवमगणिता एव भक्तभावुकजनाः श्रींचरणानां करुणावरुणालयस्य श्रीकरान् कांश्चन शीकरानधिगत्य सकलविधान्यपि भूयांसि

प्रेयांसि श्रेयांसि च समनुविन्दन्तः सानन्दं गुरुप्रसादप्रासादे विहरन्तीति प्रत्यक्षमेव प्रेक्षावताम् ।

स्वयं पण्डित-मण्डल-पुण्डरीक-पटल-मार्तण्डायमानाः श्री शिवाचार्याः ज्ञानयोगिनः । मैसूर-बेङ्गळूर-वाराणसी-प्रमुखेषु विद्याकेन्द्रेषु गुरुकुलेषु बहुवर्षानुषित्वा गुरूपसत्तिं कृत्वा, समपीपदन् ज्ञान भाण्डारम् । अध्यजीगमन् विलक्षणामेव शास्त्रपाण्डितीम् । अललम्भन् दुर्लभमेव सारस्वतनिधिम् ।

एतेषां चतुङ्ग-प्रज्ञा-विस्मापिताङ्गिरसानां यतिपुङ्गवानां नैपुण्यं न्याये, वैदुष्यं वेदान्ते, वैदग्ध्यं व्याकरणे, वैचक्षण्यं वैशेषिकनये, मनीषितां मीमांसायां, पटीयस्तां साङ्ख्ये पारङ्गमत्वं सङ्गीते, पाण्डित्यं साहित्ये-वैपश्चितीं वेदोपनिषत्सु, प्रावीण्यं ज्योतिष्ये, कौशलं शैवागमेषु, असामान्यं सर्वविद्वन्मान्यं चास्ति । श्री श्री स्वामिपादानां साहित्य, सङ्गीत - संस्कृत - शास्त्र - श्रुति-स्मृति - गीता - पुराणोपनिषत् -नव्यन्याय-प्राचीनतर्क-पूर्वमीमांसा-उत्तरमीमांसा - व्याकरण-साङ्ख्याद्यसङ्ख्य-विद्या-विद्योतमान-वैशारद्य-विद्वत्ता-वैशद्यादिकं विद्यावाचस्पतीति तद्विरुदस्य याथार्थ्यं विद्योतयति सम्यगेव । तदेतत्सर्वं हृद्ययैव संस्कृत-गद्य-पद्य-पद्धत्या "श्री विद्यावाचस्पतिश्रीशम्भुलिङ्गशिवाचार्यप्रशस्तिमणिमालिका' "श्रीशम्भुलिङ्ग शिवाचार्यस्तुतिशतक", "श्री शम्भुलिङ्गेश्वरविजयचम्पू" "श्री शिवाचार्यशतश्लोकी" इत्यादि प्राकृतसंस्कृतग्रन्थेषु प्रतिपादितमास्तें सम्यक्तयैव ।

एवं स्वयं विद्वद्धौरेयत्वेन विद्याया महतीं . जानानाः, योगीश्वराः-सततं ज्ञानप्रसाराय बद्धादराः सिद्धहस्ताश्च विद्योतन्ते । तेषामेव प्रेरणया योगाश्रम-परिसर-पर्वत-प्रान्त एव शान्तनिकेतनमिव, वनान्त-विद्यापीठ इव प्रारब्धा काऽपि आङ्ग्लशाला यस्याश्च 'श्री शम्भुलिङ्ग-शिवाचार्य-विद्यालय' इति वरीवर्ति शुभतरं नाम । सेयं श्री शम्भुलिङ्गशिवाचार्याणां उत्तराधिकारिणां एस्. ए. इति पदवी

भूषितानां श्री बृहन्मठाध्यक्षाणां श्री श्री विद्यानन्दशिवाचार्याणां दक्षे आध्यक्ष्ये समर्थे च नेतृत्वे प्रचलन्ती आङ्ग्लमाध्यमिकशाला अचिरादेव वाक्सिद्धि - मन्त्रसिद्धि - भावशुद्धि - तपोवृद्धि - महिमसमृद्धि - सम्पन्न - श्री शम्भुलिङ्गयोगीश्वराणां भविष्यवचनानुसारेण कलाशाला भविष्यतीत्यत्र न बिन्दुमात्रोऽपि सन्देहः। एवं श्री शिवाचार्ययोगीश्वराणां दिव्य–सन्निधानप्रभावेण तत्प्रान्तोपान्तप्रदेशेषु ज्ञाननन्दादीप एव प्रजिज्वलिषति समन्तात्। परिजिहीर्षति प्रदीर्घ-कालावधि-घनीभूतमज्ञानतमस्काण्डम्। सर्वत्राप्यद्य श्री शिवाचार्यपुण्यप्रभावेन "प्रज्वालितो ज्ञानमयः प्रदीपः"।

एतच्चम्पूचरित्रनायकाः शिष्यविद्याप्रदायकाः भगवन्महिमगायकाः समुपासितशिवशिवानीस्कन्दविनायकाः योगिजननायकाः शिवार्पितसर्वस्व-कायकाः मोक्षमार्गपरिचायकाः शिवाचार्या जीवत्समाधिमेव गृहीतुं कृतसङ्कल्पाः। भविष्यभेदिन्या सर्ववेदिन्या स्वीयमायुश्शिवायत्तं निश्चिन्वन्तो विपश्चिदपश्चिमाः सांप्रतं पंचनवतिवर्षाधिका एते खलु यतिसत्तमाः श्री परमेश्वरस्य कैलासलोकागमनाज्ञोपनिमन्त्रणं प्रतीक्षमाणा-स्तिष्ठन्ति। अनुतिष्ठन्ति सन्ततं भगवच्चिन्तन-वेदान्त-शास्त्रमन्थन-रूपं महामहत्तरं तपः।

श्री श्रीचरणानां च एतज्जीवत्समाधिसङ्कल्पः श्री शिवप्रेरणयः श्री शिवप्रीत्यर्थमेव समभूदिति तत्सङ्कल्पानुसारमेव भव्यसमाधिमण्टपा तदुपरि दिव्यगुहानिर्माणं च समुचितरीत्या सुसम्पन्नमास्ते। इदानीं तदुपरि बेळगलीत्युपाव्हः लिङ्गराजः लक्षाधिकरूप्यकराशिव्ययेन अमृतशिलामयं सर्वलोकाकर्षकं श्रद्धालुजनप्रहर्षकं भक्तिभावोत्कर्षकं स्थापत्यकलाकौशल्यबन्धुरं च सर्वतोभद्रं परमसुन्दरं दिव्यमन्दिरं निर्मिमाण आस्ते बृहच्छिल्पनिर्माणकर्मालङ्कर्मीणैः जक्कणडङ्कणकल्पैः शिल्पकलाकुशलैः कर्मचारिभिः।

बहोः कालात् पूर्वमेव विजापूरस्थः लोणीत्युपनामा महालिङ्ग-श्रेष्ठीतिनामा शिष्योत्तमः स्वश्रेष्ठगुरुवरेण्यानां श्री शम्भुलिङ्गशिवाचार्य योगीश्वराणां अमृतशिलमयीं सूर्यकरैरिव उन्मीलितां, चन्द्रज्योत्स्नयेव

उन्मेषितां, क्षीरसागरतरङ्गसङ्घेभ्य इव उद्भूतां, अमृतमन्थनादिव उन्नीतां, नवनीतसारेणेव सञ्चर्चितां, कर्पूरपरागैरिव विच्छुरितां, हराट्ट-हासप्रभाङ्कुरैरिव प्रकल्पितां, भक्तिभावोत्पादितां, मन्दस्मितमनोहरां, दिव्यमूर्तिं विरचय्य योगाश्रमे प्रत्यष्ठापयत्।

तस्याश्च गुरुमूर्तेः सेवाशुश्रूषादिकं विधाय प्रदक्षिण-नमस्कार-पूजा-पर्युपासनादिभिः लभन्ते विविधमनःकामनापूर्तिं भक्तजनाः। बहव एव हि वन्ध्या नन्दनमुखसन्दर्शनेन अमन्दमेव अनुविन्दन्ति आनन्दम्। राजयक्ष्मादिरोगाभिभूताः कतिपयदिनमूर्तिसेवया प्राप्नुवन्त्यारोग्यभाग्यम्। दारिद्र्यदुरवस्थोपद्रुतास्तत्सेवया सम्प्राप्तनिष्कम्पसम्पत्सम्पन्ना मोदन्ते। भूतप्रेतपिशाचबाधोपहता अपि तन्मूर्तिदृष्टिपातमात्रेणैव निर्बाधाः निरुपद्रवाः स्वास्थ्यमापद्यन्ते। वाणिज्य व्यवहार-प्राज्य-राज्य-व्यापारेषु हानि-क्लेशमनुभवन्तः कतिपयकालिक-शिवाचार्य-प्रतिमा-सेवार्चादिभिः अचिरादेव परिहृत-सर्व-विशङ्कट-सङ्कटाः दूरीभूत-विपदः प्राप्तसम्पदः मनोरथसिध्या प्राप्नुवन्ति हर्षप्रकर्षम्।

एवं तत्प्रान्तोपवर्तिनामद्य सा अप्रतिमा गुरुप्रतिमा नाम सर्व-मनोरथ-परिपूरकश्चिन्तामणिरेवेति बहूनां भक्तजनानामनुभवः। अगणित दुःखगणा ब्राह्मणाः,तापत्रयवित्रस्ताः क्षत्रियाः, विविध-सांसारिक-समस्या-नश्यन्मनःस्वास्थ्याः क्लेश-चिन्ता-वश्या वैश्याः, क्षुद्र-दुःखदारिद्र्य-दैन्य-दुरवस्था-हृद्रोगाद्युपद्रव-विद्रुताः शूद्राः,दुरन्तानन्त-चिन्ता-सन्ताप-सन्तप्ता-न्तरङ्गा अन्त्यजाः, अन्येऽपि च अन्यान्यमनःस्वास्थ्यविघटक-दुःख-दौस्थ्य-दुरवस्थाद्युपस्थापित-चिन्ताशत-तान्त-क्लान्त-स्वान्ताः सर्वजातीयजनाः अपि विस्मृत्य जातिभेदं, आगत्य योगाश्रमं, उपसृत्य गुरुमूर्तिं, प्रदक्षिणीकृत्य भक्तिभरतः, नमस्कृत्य पौनः पुन्येनः, सम्प्रार्थ्य साञ्जलिबन्धं, निध्याय मनसा, संश्लाघ्य वचसा, संसेव्य वपुषा, नष्टकष्टाऽरिष्टाः लब्धाऽभीष्टा लभते तुष्टिपुष्टीः। सर्वजाति-जनाङ्ग-मङ्गलाधायक-हृदयङ्गम-गुरुः मङ्गल-मूर्ति-समधिष्ठितोऽयं जम्बुखण्डीनेदिष्ठ-योगाश्रमः सकलजातीय-जनानां भक्त्यादरपात्रं काशी-काञ्ची-उज्जैनी-रामेश्वरादि-तीर्थक्षेत्रमिव सम्पद्यते एकं यात्रास्थलम्।

साम्प्रतं षणगवतिवर्षदेशीया ज्ञानवृद्धा वयोवृद्धास्तपोवृद्धा ज्ञानप्रबुद्धाः लोकाभ्युदयाय कटिबद्धा एते सिद्धपुरुषाः योगाश्रमे सन्ततमन्तरङ्गे गौरीकान्तचिन्तनरूपं तपोनुष्ठानमेकान्तभक्त्या सन्तन्वन्ति गुहायाम् । अत्याश्चर्यंकरी खलु श्री शिवयोगितपश्चर्या । नैवान्नं, न वा पानं, नान्यविधः कोऽप्याहारः कदाचिदपि स्वीक्रियते । विगत–चत्वारिंशद् वर्षेषु श्रीचरणैरेकदापि न कृतं भोजनम् । नाऽशितमन्नम् । न जग्धं खाद्यम् । न पीतमन्यपेयम् । केवलं शिवाभिषकपरिपूतं एक तनुतरस्थालीपरिमितं गोक्षीरं सकृदेव परमेश्वरप्रसाद इति सभक्तिभरं प्राश्यते । एकाञ्जलिभरकेवलपयःपानमात्रेण कथ वा जीवन्त्येते जीवोत्तमा इत्येतन्महदेव कौतुकम् । न केवलं जीवन्ति किन्तु पाठ प्रवचन - ग्रन्थलेखन - शिवध्यान - गुरूपदेश - उपन्यास -शिवदीक्षाप्रदानादि विविधशिष्यक्षेमाभ्युदयकारिकार्याणि निरलसतया तन्वन्तः ह्रेपयन्ति तरुणानपि । श्री गुरूत्तमैर्विरचिताः १. वीरशैवसिद्धान्तप्रवेशः, २, अष्टाबरण विवेकः, ३. महिम्नस्तवटीका, ४. आगमपरिज्ञानम्, ५. वेदपरिचयः, ६, वैदिकवाङ्मयरहस्यम्, ७. शिवशक्तिविलासः, ८, तत्त्वज्ञानं, ९, गोरक्षणं, १०. निजमुक्तित्रिपदी, ११. बोधरत्नाकरः, १२, शिवपूजा विधिः, १३. निरञ्जनशतकव्याख्यानप्रभृतयः सद्ग्रन्थाः श्री श्रीचरणानां अगाधं पाण्डित्यं विश्वतोमुखीं प्रतिभां विलक्षणं विषयविवेचनपाटवं तलस्पर्शि शास्त्रवैदुष्यं अपूर्वं ज्ञानविज्ञानवैचक्षण्यं च व्यञ्जयन्ति उत्तुङ्गप्रज्ञाविस्मारिताङ्गिरसानामेतेषां यतिपुङ्गवानाम् ।

एतेषामीदृशमसदृशं प्रचण्डं पाण्डित्यं तपःशक्ति योगसिद्धि समीक्ष्य शताधिका एव पण्डिताः सङ्घसंस्थाः पुरसभादयः पदवीप्रशस्ति-प्रदानपूर्वकं सदकुर्वन् श्रीचरणान् । तत्र द्वित्रपुरसभापण्डितसभादिवि–तीर्णानि मानपत्राणि उदाह्रियन्ते भक्तलोकरोचनाय वाचनाय च–

ॐ तत्सत् ॐ

विद्यानिधि-विद्यावाचस्पत्यादिपदवीं विभ्राजमान
वेदवेदान्तागमाद्यशेषशास्त्रपारङ्गत गानकलानुभव-
रसिक, प्रवचनपटु शिवयोगानन्दनिरत, विजयपुर-
बृहन्मठाधीश अनन्त श्री शम्भुलिङ्गशिवाचार्यवर्याणां

श्री चरणसन्निधौ

आन्ध्र-महाराष्ट्र कर्नाटक पण्डितैः
अत्यन्त भक्तिपूर्वकं समर्पितं
-॥ सन्मानपत्रम् ॥-

विद्यापाथोधि-वाचस्पति-मुख-बिरुदोदार-भूषाकदम्बः
स्फूर्जच्चैवाद्यशेषागम-निगम-गणागाध-वैदुष्य-सिन्धुः
योगे सिद्धिप्रसिद्धि-प्रसरणवशतो वश्यतापन्नपादो-
पान्तप्रान्त-प्रपन्न-प्रथित पृथुधनेशान-पृथ्वीश-वन्द्यः ॥१॥

साटोपं लास्यलीलाभिरतहरजटाजूट-सावेगनिर्यद्-
गङ्गास्रोतोऽतिशायि-श्रुतिमधुर-सुधास्यन्दि-वाणीप्रवाहः
दम्भाऽहम्भाव-दोषाङ्कुर-मरु-हृदयाम्भोज-सम्भावित-श्री-
शम्भुः शं भूतिदायी दिशति भुवि शिवाचार्यसच्छम्भुलिङ्गः ॥२॥

कर्णाटक्षोणि-कर्णाभरण-विजयपूराजमानोरुतेजो-
मूर्त्यन्वारूढ-पीठोज्ज्वल बृहदभिधाभाग्य-भास्वन्मठेशः
राकापीयूषरश्मिच्छविमदहरणस्वच्छकीर्तिप्रकाश-
श्वेतीभूताखिळाशा मुखमुखर जय श्री शिवाचार्यशद्धः ॥३॥

हुल्याळाभिख्यपल्लीपरिसरशिवयोगाश्रमाख्याविराज-
द्विख्यात श्रीगुहायां चिरसमयसमाचीर्णभास्वत्तपस्यः
निष्कामं कामवैरिप्रमथनचतुरश्रीशिवार्चाप्रभाव-
प्रादुर्भूतोरुतेजा जयति यतिशिवाचार्यपच्छम्भुलिङ्गः ॥४॥

कामद्वेषिरतोऽपि सर्वजनताकल्याण कामस्सदा
योगीशोपि गिरीशभक्तिरमणीभोगैकलीनान्तरः
दुष्टानामशिवङ्करो भुवि शिवाचार्याभिधानोऽप्यसौ
लोके चित्रपवित्रचारुचरितः श्रीशम्भुलिङ्गो मुनिः ॥५॥

काष्ठग्राममहामठेशविबुध श्रीसिद्धरामप्रिया–
चन्नाम्बाभिध मातृगर्भ जलधेस्सम्भूतशीतद्युतिः
सङ्गीतादि कलाकलापकुशलीभावं गतः शैशवे
प्रावीण्यं प्रवणात्मना ह्युपगतो गैर्वाणवाण्यामपि ॥६॥

वाणीलास्यविलासरङ्गरसनो गौरीशविश्रान्तिभूः
शान्तोदात्ततमः प्रसन्नहृदयस्यन्दद्दयास्रोतसा
नित्यार्द्रीकृत-दीनहीन-जनता-सन्ताप सन्तान त–
त्प्रेमोल्लासविकासि हास्यमधुराम्भोजोपमास्यःसुधीः ॥७॥

कल्पःकल्पतरोरयं सुमनसामल्पेतरत्कल्पनाऽ
तीतं कल्पयितुं हि कल्पमहसां जल्पज्जनास्यार्गलः
दीनोद्धारकृतिव्रतैकनिरतो मानोन्नतैरावतो
ज्ञानोदारमना मनागपि मुनिर्नैनोऽभिसंसर्गभाक् ॥८॥

कृताघभङ्गो गुणराशितुङ्गः पूतान्तरङ्गः प्रतिभातरङ्गः
शम्भोः पदाम्भोरुह चित्तभृङ्गस्सन्मङ्गलात्मा गुरु शम्भुलिङ्गः ॥९॥

शम्भुलिंगार्चनानिष्ठोऽनिष्ट लिंगस्य भंगकृत्
शम्भुलिंगो गानरंगो जितानंगो जयत्ययम् ॥१०॥

वाराणसीं पापनिवारिणीं तामन्वास्य यो व्याकरणे च तर्के
श्रुत्यन्त विद्यास्वनवद्यहृद्यवैदुष्यमाप्तो मतिमानदूष्यम् ॥११॥

सोऽयं हंसो हंसभास्वत्प्रकाशः प्रीतेः पात्रं हंसवाहप्रियायाः
हिंसादूरः पापविध्वंसकारी क्षेमाशंसी शम्भुलिंगस्समेषाम् ॥१२॥

आचार्यः शतमन्युपूर्वमरुतां वाचस्पतिर्विश्रुतः
प्राचां पूर्वसुपर्वणां स उशना आचार्यतां लब्धवान्
आचार्यो रघुवंशजक्षितिभृतां श्रेष्ठो वसिष्ठो मुनिः
को वाऽभूद्भविता भवत्यथ शिवाचार्यो भवन्तं विना ॥१३॥

शिवो महेशो हि सुरेश्वरादि वृन्दारकाचार्यपदं प्रपन्नः
परं मनुष्योऽपि भवान् विचित्रं लोके शिवाचार्य इति प्रतीतः ॥१४॥

बहवो ह्यशिवाचार्याश्शिष्य वित्तापहारिणः
भवानेकःशिवाचार्यो लोकहृत्तापहारकः ॥१५॥

गुरुरिव विबुधानां वर्य वाचस्पतिस्त्वम्
दितिजगुरुरिव त्वं नीतिविज्ञः कविश्च
हिमकर इव लोके सत्कलाशेवधिर्वा
शिवकरचरितत्वात् त्वं शिवाचार्यवर्यः ॥१६॥

श्रीकण्ठग्रहलालसोऽपि न भवाञ्शेते भुजङ्गे सदा
स्वामिंस्त्वं चतुराननोऽपि न पुनर्नाभिजन्मास्यहो
सम्प्राप्तोऽपि कलाकराभरणतां नो वा शिवाप्रेमभाक
इत्यल्पेतरकल्पनाः कलयितुं चित्ते नृणां कल्पसे ॥१७॥

पल्लीसुजातोऽपि दिशासु राशीभवद्यशोभिः परिशोभसे त्वम्
आमोदतः सर्वजनप्रमोदं पद्मं तनोत्येव हि पङ्कजातम् ॥१८॥

पल्लीजातस्य लोके प्रसृमरसुयशोराशिराशोभते ते
रौप्याद्रौ नन्दिकेशं स्मितरुचिरुचिरां क्षौमगौरीं च गौरीम्
भस्मालेपं महेशं शुचिसुरसरितं तान्मिथोऽन्वेषणार्थम्
सायासव्यग्रचित्तान्विदधति नितरां चित्तविभ्रान्तिकारी ॥१९॥

पूर्वं चैकशिलागुहागृहगतो योगाधिभास्वानभूः
त्वं लक्षाधिकलोकमानसगुहा गेहाधिवासोऽधुना

सिद्धिं साधितवांस्तथापि न गुहानिर्बन्धमुक्तोऽभव :
कोऽप्येतुं क्षमते क्षमातल इह श्री शंकर प्रेरणाम् ॥२०॥

शिवाचार्य शिवाचार शिवाश्चर्यंकरव्रत
चित्रचर्य जगद्धुर्य ते विद्वद्यंसमोऽस्ति कः ॥२१॥

निरस्तं नास्तिक्यं विलयमुपयाता कलिकृतिः
विधर्मो मर्मान्तव्यथमथ विनष्टश्च कुपथः
गता हिंसा हिंसामनृतमनृतत्वं गतमहो
प्रसक्त व्याख्याने शिव शिव शिवाचार्य भवति ॥२२॥

तत्वानामुपदेष्टरि त्वयि सतां चित्तेषु नृत्यत्यहो
भक्त्या पूजन-जाततोष-विवशः प्रत्यालयं श्रीशिवः
दूरादेव पलायनं क्वचिदपि स्थातुं स्थलाभावतः
खेदेनाकुलहृत्कलिः कलयते चीनादिदेशान्तरे ॥२३॥

द्युतितुलितपतंगो वाक्सुधोद्यत्तरंगो
विहितसुजनसंगः प्राप्तशास्त्रप्रसंगः
सदमलसदपांगः शंभुनत्रोत्तमांगो
भसित सित शुभांगो भासते शम्भुलिंगः ॥२४॥

हिन्दी नन्दति ते प्रशस्तरसनारंगांगणे लास्यभाक्
कर्णाटक्यपि कर्णयोर्वितनुते पीयूषवर्षं सदा
धत्ते मोहन मञ्जुला तव महाराष्ट्री महान्तंम हं
गीर्वाणी मधुमाधुरीमधरयेद्वाणी सुधाधोरणी ॥२५॥

वेदानां व्यतनोरलं परिचयं रस्यं रहस्यं स्फुटी-
कुर्वन्वैदिक वाङ्मयस्य जनयन्गोरक्षणे सद्रुचिम्
तत्वज्ञानमुपादिशन्शिवमहाशास्त्र्योर्विलासं जने
सम्यग्दर्शितवांस्तथाऽऽगमपरिज्ञानं दिशन्राजसे ॥२६॥

महितपरमहंसं रामकृष्णं वितृष्णं
प्रथिततमविवेकानन्दसत्स्वामिनं च
सुकृतिविबुध योगीशानमान्यारविंदं
स्मरति विरतिभाग्यं त्वां निरीक्ष्यैव लोकः ॥ २७॥

मेधाकोटिमहीश्वरेण महितो मेधाविमान्यो महान्
जत्तीभूपतिनाऽपि वित्तनिचयैः सन्मानितः सादरम्
बल्लारीमुखनैकपूःपुरसभा सन्मान पत्रार्पणा-
त्सानन्दादरसत्कृतो विजयते श्री शम्भुलिंगो भवान् ॥२८॥

प्राचीनाचार्यदीप्यद्विपुलसुविमलज्ञानमायेव कायम्
विख्यातर्षीन्द्रभास्वद्विततमतपो देहधारीव साक्षात्
सिद्धानां सिद्धिरेषा सतनुरथ महायोगिनां विग्रहेता
दिव्या शक्तिश्च भक्तिर्नृ वपुरधिगता शम्भुलिङ्गोऽद्य भाति ॥२९।

श्री शिवाचार्याणां प्रवचनमालां समाप्तिदिने बागलकोटिगत लौकिक पण्डित पामर भक्तगणसमर्पितं मानपत्रं एतद्दोषभूयिष्ठमपि पौरायां भक्तिभूयिष्ठताद्योतकमित्यत्र प्रकटितम् ।

ॐ तत् सत् परशिवाय नमः ।

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुःसाक्षात्परब्रह्म तस्मै श्री गुरवे नमः ॥

इह खल्वशेषविद्यावीर्यविकवित्तसुकलाकलापानुपमपीठे श्रीशारदयोरेकत्र सङ्गतत्वात् त्रिलोक ललामभूतेऽस्मिन् सुविपुले भरतखण्डे निजकीर्त्याऽभितः सुरभीकृतदिगन्ताः साहित्यपाथोनिधिमन्थनेन ज्ञानामृतं निष्पाद्य श्रुतिविवरं पूरयन्तः प्रतिभाशालिनो वेदोपनिषदागमश्रुतिपुराणेतिहासकाव्यनाटकशिक्षाकल्पव्याकरणछन्दो ज्यौतिषनिरुक्तयोगशास्त्रादि सकलविषयेषु लब्धावसरास्तारागणमध्यगतः सुधाकर इव विद्यावाचस्पतिर्वेदान्ताचार्य इत्यादि नैकप्रशस्तिविभूषिताः कर्नाटजननीजठरजनितसमुज्वलजन्मभाजो विजयपुरपट्टाधीश्वराः प्रणवस्वरूपिणः श्री शम्भुलिङ्ग शिवाचार्यपूज्यपादा अग्रपदमारोहन्तीति सर्वेषां भारतीपरिगृहीतानां भारतवर्षीयाणामभ्युपगमः ।

साकारोऽपि निराकारः सगुणोऽपि निर्गुणः पञ्चवक्त्रवरः पञ्च–ब्रह्मात्मकोऽष्टमूर्तिर्विश्वोद्भवस्थितिलयादि हेतुभूतः श्रीं शम्भुलिङ्गः परशिवः श्री शम्भुलिङ्ग शिवाचार्य पूज्यपादानां रूपेण सद्धर्मनिरूपणाय तत्रापि च श्रीमद्वीरशैवसिद्धान्तप्रतिपादनाय स्वकीयपीयूषसङ्काशास्ख–लितवाग्धारया मानवकोटिसमुद्धरणाय महीमागत इति मे दृढा मतिः।

"विद्ययामृतमश्नुते"। "नहि ज्ञानेन सदृशं पवित्रमिह विद्यते"। "सा विद्या परा विद्या यया मुक्तिर्हि लभ्यते।" "यद्विद्याप्रभावेण भवपाशोऽपि छिद्यते।" इति महास्वामिनो नित्यमुपदिशन्ति।

गिरिजारमणः श्रीखण्डपरशुरनवरतं पूज्यपादारविन्दानां, सद्गुरूणां कृतमौनव्रतानां व्यतीतसप्ततिसमानां हृदयमन्दिरे संमुदा वसति। तेन शङ्करेण सुचिरादेवासादितमूर्जितमेतत्स्थानम्। प्रफुल्लकल्हारहारभासुरासनाऽपि न वहति स्वविद्याभिमानं पूज्यपादानां-पुरतः शारदा।

सद्गुरुचरणनीरजामन्दमरन्दाकृष्टचेतसः सर्वे कामक्रोधलोभ त्रस्ता दारुणज्ञानदुर्भिक्षविहस्ताः संसारकराल कान्तारदावानलप्रखरज्वा-लामालाकुला रोगशोकपरीतापबन्धनव्यसनग्रस्ता भक्तभ्रमरा गुरुचरण परिचरणपरायणा भूत्वांघ्रिपङ्कजं परितो मञ्जु गुंजन्ति। धन्याः खलु ते भक्ता ये सद्गुरुपदसरोरुहसौरभं सन्ततमाघ्राय पूतानि कुर्वते स्वचेतांसि। कृतार्थाः खलु ते जना ये महास्वामिपूज्यपादतोयजसन्निधौ सततं निवसन्ति पीयूषोपमश्रुतिस्मृत्यागमोपदेशामृतं श्रवणाञ्जलिपुट-करणेन पिबन्ति, सद्गुरूणां प्रशान्तराकापतिसन्निभमुखेन्दुदर्शनं प्रत्यहं कृत्वा पवित्री कुर्वते हृत्कमलानि।

अत्र हि भूसुरवीरशैवबाहुजोत्सङ्गसम्भूता यवनाः ख्रिस्तानु-यायिनोऽन्त्यजाश्च सकलात्मभाजः परित्यक्तनैसर्गिकजातिपक्षविरोधा उपशान्तात्मानो गुरुकृपापाङ्गप्रतिपत्तये निःशङ्कमागच्छन्ति प्रतिदिनं श्री सिद्धान्तशिखामणिशास्त्रश्रवणाय। यतो विमलात्मानो गुरवो विश्व

बन्धुत्वप्रोत्तुङ्ग विचारपरिप्लुता नैकनरेन्द्रमुकुटमरीचिजालजटिलीकृत पादपीठाः शरच्छशाङ्ककिरणनिर्मलयशसः प्रख्याततपोज्ञानबलयुक्ताः पण्डितगण मण्डनायमाना अधिगतसकलशास्त्रसमस्ततत्त्वा उद्गीथ-विद्वरेण्या, जातिविषमताक्षुद्रारातिनिर्दलनकारिणो वेदातीतात्म-तत्त्ववेत्तारो गुणग्राहिणस्त्रिभुवनगीतकीर्तयोऽशेषशरीरिनिचयवन्दित-पादपीठाः सद्गुरवः सर्वे स्वकर्मणि रताः परद्रोहपराङ्मुखाः भक्तिज्ञान-बलेनैते प्राप्नुवन्ति परां गतिमित्युपदिशन्ति ।

पूज्यपादा अक्षपात्रं ज्ञानान्नवितरणस्य । उत्पत्तिर्निगमागमानाम् । विजयपताका ज्ञानोपलब्धधवलकीर्तेः । यशोदुन्दुभिर्विद्यादिग्विजयस्य ।। कल्पद्रुमो भक्ताभीष्टसम्पूर्तेः । रत्नाकरो माधुर्यस्य । कोमलता कुसुमस्य । निर्माल्यता मन्दाकिनीशीतलसलिलशीकराणाम् । रमणीयता रजनीनाथस्य । अगाधत्वं सरित्पतेः । क्षमता वसुन्धरायाः । द्रवता जीवनस्य । सत्वं ब्रह्मचर्यस्य । शान्तिरुडुपतेः । गम्भीरता महार्णवस्य । प्रखरद्युतिर्दशशतदीधितेः । पञ्चाननो विषयमृगाणाम् । शरभो धर्मदूषणोन्मत्तद्विरदगण्डभेदस्य । भूतनाथः समस्तभूतगणसमुद्धरणस्य । अस्ताचलो अधर्मस्य । मार्तण्डः सद्धर्मानुसरणस्य । चपलता गरुत्मतः प्रसन्नता सुरेन्द्रोपवनस्य । रमणीयता सृष्टेः । धवलता विशुद्धवृत्तेः । दीपकः सन्मार्गस्य । दिनकरोऽज्ञानध्वान्तस्य । गुरुरपवर्गपदाप्तेः । परमद्युतिर्जीवलोकस्य । दिव्यौषधिर्जीवनवर्धनस्य । आधारयष्टिर्हिम-शैलराजतनयाकान्तदिव्यदर्शनस्य । सद्गुरुरविद्याद्रुमदलनदीक्षायाः । परशुर्वासनाद्रुमस्य । उगमो विश्वाससौहार्दस्य । निवासः सच्चिदानन्द-परशिवस्य ।

धरणिजारमणरमणसकलभुवनाभरणकरुणापाङ्गप्रभावोपजनितसुरतरुसुफलं वागिलकोटिपुरवासिनां तत्रापिच श्रीमद्वीरशैवसमाजबान्धवानां जन्मान्तरसुकृतराशिभिः समासादितं यतः सच्चिदानन्दघनानां श्रीशम्भुलिङ्ग शिवाचार्य सद्गुरूणां चरणाम्बुजरजोभिः पूतं नगरमस्माकं जनाश्च कृतकृत्याः ।

ॐ नमः शम्भवे

विद्यावाचस्पति

श्री शम्भुलिङ्गशिवाचार्यस्तवशतकम्

गङ्गोत्तुङ्गतरङ्गनृत्यनटनारङ्गोत्सवाङ्गाङ्गणो-
द्भास्वत्खण्डसुधांशुमण्डिततडिच्चञ्चज्जटामण्डलः
लीलाभक्षितकालकूटकवलक्ष्वेलां च पीयूषयन्
जम्भारातिविजृम्भिदम्भगिरिराड्दम्भोलिशम्भुः श्रिये ॥

मङ्गलाचरणम्

श्रीमद्रेणुकपादरेणुकणिकाभास्वन्मणीमञ्जरी-
भृङ्गक्तप्रमथान्वयाम्बुधिभवत्श्रीकौस्तुभाश्मायितम्
भक्तासक्तविरक्तयोगियतिराड्वन्दारुवृन्दारकै-
र्वन्द्यश्रीचरणारविन्दमनिशं वन्दे शिवार्यं गुरुम् ॥

॥ १ ॥

त्र्यक्षनामत्रयोल्लासिनामाक्षरविराजितम्
शम्भुलिङ्गशिवाचार्यं वन्दे कर्मन्दि चन्दिरम् ॥

॥ २ ॥

श्रीवीरशैवमत वारिधि वर्धनेन्दुः
सर्वोत्तमोच्चगुणसन्मणिदुग्धसिन्धुः
विद्याविनीतबुधपोषकदीनबन्धुः
विद्योतते भुवि शिवाभिध लिङ्गशम्भुः ॥

॥ ३ ॥

यः श्रोत्रियोत्तमकदम्बललामभूतः
सद्ब्रह्मनिष्ठमुनिवन्द्यपदाम्बुजातः
हंसावतंसगुरुवंशजमौक्तिकाल्यु–
त्तंसायितो विजयते शिवशम्भुयोगी ॥

॥ ४ ॥

वाग्वल्लभ्यमनन्यलभ्यमवनौ यो वाऽभ्युपेतो धिया
हंसोत्तंससुकेतनोऽमलमतिः श्रीसत्यलोकाश्रयः
यः शश्वच्चतुराननोद्गतचतुर्वेदः सदानन्दकोऽ
सौ बाभातिच शम्भुलिङ्गसुशिवाचार्यः स्वयम्भूरिव ॥

॥ ५ ॥

कामोऽयं हि यमायितो यमिमनोऽन्तःसंयमादेर्भुवि
दृष्ट्वा नामगशम्भुलिङ्गकशिवत्रैनेत्रशब्दत्रयम्
बिभ्यन्नाभ्युपयाति यस्य च कुटीराभ्यर्णमभ्यर्चित-
त्र्यक्षानुग्रहरक्षितं व्रतिपतिं वन्दे परं देशिकम् ॥

॥ ६ ॥

पाण्डित्यस्य परोऽवधिर्गुणगणानर्घ्योरुसम्पन्निधिः
साक्षात्सन्निधिरेव दैविक महाशक्तेश्च दैवीश्रियः
विव्यज्ञानमहोदधिर्द्रविणदानोदारताशेवधिः
श्रीशम्भोः प्रणिधिरतपस्सुपरिधिः शम्भुः सुधी राजते ॥

॥ ७ ॥